ঋজুপাঠের দ্বিতীয় ভাগ রামায়ণমাত্র হইতে সংগৃহীত হইয়াছে। রচনা প্রণালী দৃষ্টে সুস্পষ্ট প্রতীতি হয় রামায়ণ অতি প্রাচীন গ্রন্থ। এই প্রাচীন গ্রন্থ মহর্ষি বাল্মীকি প্রণীত বলিয়া প্রসিদ্ধি আছে। কোন কোন আলঙ্কারিকেরা রামায়ণকে মহাকাব্য মধ্যে গণনা করিয়া থাকেন। কিন্তু তাঁহারা মহাকাব্যের যে সকল লক্ষণ নির্দ্দেশ করিয়াছেন সে সমুদায় লক্ষণ কালিদাসাদি প্রণীত রঘুবংশাদি নব্য কাব্য গ্রন্থ সমূহে যেরূপ লক্ষিত হয় প্রাচীন কাব্য রামায়ণে সেরূপ লক্ষিত হয় না। এই গ্রন্থে পৌনরুক্ত, প্রাসঙ্গিক বিষয়ের অতি বিস্তৃত বর্ণনা প্রভৃতি কতিপয় গুরুতর দোষ আছে। যাহা হউক ইহা অনায়াসে নির্দ্দেশ করা যাইতে পারে সংস্কৃত ভাষায় এরূপ প্রাঞ্জল ও প্রসাদ গুণ বিশিষ্ট দ্বিতীয় পদ্যগ্রন্থ আর নাই। রামায়ণের মধ্যে অযোধ্যাকাণ্ডের রচনা যেরূপ চমৎকারিণী ও মনোহারিণী অন্যান্য কাণ্ডের রচনা সেরূপ নহে। এই নিমিত্ত ঋজুপাঠের দ্বিতীয় ভাগে কেবল অযোধ্যাকাণ্ডের উৎকৃষ্ট অংশ সকল সঙ্কলিত হইল। সঙ্কলিত অংশ সকলেরও যে যে ভাগ অনাবশ্যক বোধ হইয়াছে পরিত্যাগ করা গিয়াছে।

শ্রীঈশ্বরচন্দ্র শর্ম্মা।

কলিকাতা। সংস্কৃতকালেজ।
২২এ ফাল্গুন। সংবৎ ১৯০৮।

[illegible]पाठम्

—०—

द्वितीयो [illegible]ः ।

[illegible] ... कैकेयी [illegible] । [illegible]
[illegible] ... [illegible]
[illegible] ... [illegible] । त
[illegible] विलापः ।

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ।
पपात सहसा भूमौ [illegible] ॥ १ ॥
प्रतिलभ्य ततः संज्ञां कैकेयीवाक्यतापितः ।
[illegible] ॥
अहो धिगिति [illegible] नराधिपः ।
[illegible] ॥ ३ ॥
[illegible] ।
[illegible] ॥ ४ ॥

नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ॥
कदा मे जननीतुल्यां वृत्तिं वहति राघवः ।
तस्यैवं त्वमनर्थाय किंनिमित्तमिहोद्यता ॥
मया त्वमविनाशाय भवनं स्वं निवेशिता ।
अविज्ञानान्नृपसुताव्याली तीक्ष्णविषा यथा ॥
जीवलोको यदा सर्वो रामस्याह गुणस्तवम् ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ॥
कौसल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियम् ।
जीवितं चात्मनो रामं नत्वेव पितृवत्सलम् ॥
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ।
अपश्यतस्तु मे रामं नष्टं भवति चेतनम् ॥
तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ।
नतु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥
न हि किञ्चिदयुक्तं वा विप्रियं वा पुरा मम ।
अकरोस्त्वं विशालाक्षि तेन न स्पृहयामि ते ॥
ननु ते राघवस्तुल्यो भरतेन महात्मना ।
बहुशो हि स्म बाले त्वं कथाः कथयसे मम ॥

तस्य धर्म्मात्मनो देवि वने वासं यशस्विनः ।
कथं रोचयसे भीरु नव वर्षाणि पञ्च च ॥
रामो हि भरताद्भूयस्तव शुश्रूषते सदा ।
विशेषं त्वयि तस्मात्तु भरतस्य न लक्षये ॥
सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् ।
विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥
तस्मिन्नार्जवसम्पन्ने देवि देवोपमे कथम् ।
पापमाशंससे रामे महर्षिसमतेजसि ॥
मम वृद्धस्य कैकेयि त्वद्गतस्य गतायुषः ।
दीनं लालप्यमानस्य कारुण्यं कर्त्तुमर्हसि ॥
पृथिव्यां सागरान्तायां यत् किञ्चिदधिगम्यते ।
तत् सर्व्वं तव दास्यामि मा त्वं मे मृत्युमाविश ॥
इति दुःखाभिसन्तप्तं विलपन्तमचेतनम् ।
प्रत्युवाचाथ कैकेयी रौद्रा रौद्रतरं वचः ॥
यदि दत्त्वा वरौ राजन् पुनः प्रत्यनुतप्यसे ।
धार्म्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ॥
यदा समेता बहवस्त्वया राजर्षयः सह ।
कथयिष्यन्ति धर्म्मज्ञ तान् वा किं प्रतिवक्ष्यसि ॥
यस्याः प्रसादे जीवामि या च मामभ्यपालयत् ।
तस्याः कृतं मया मिथ्या कैकेय्या इति वक्ष्यसि ॥

अधर्म्मो धर्म्मो वा सत्यं वा यदि वानृतम् ।
यत्त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥
अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः ।
पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥
भरतेनात्मना चाहं शपे ते मनुजाधिप ।
यथा नान्येन तुष्येयमृते रामविवासनात् ॥
एतावदुक्त्वा वचनं कैकेयी विरराम ह ।
विलपन्तञ्च राजानं न प्रतिव्याजहार सा ॥

श्रुत्वा तु राजा कैकेय्या वचनं तदशोभनम् ।
नाभ्यभाषत कैकेयीं मुहूर्त्तं व्याकुलेन्द्रियः ॥
स देव्या व्यवसायञ्च घोरञ्च शपथं कृतम् ।
ध्यात्वा रामेति निश्वस्य च्छिन्नस्तरुरिवापतत् ॥
दीर्घमुष्णञ्च निश्वस्य राजा परमदुर्म्मनाः ।
दीनयातुरया वाचा इति होवाच कैकयीम् ॥
अनर्थमिममर्थाभं केन त्वमुपदेशिता ।
भूतोपहतचित्तेव ब्रुवती मां न लज्जसे ॥
नृशंसे पापसङ्कल्पे क्षुद्रे दुष्कृतकारिणि ।
न कथञ्चिदृते रामाद्भरतो राज्यमावसेत् ॥
कथं द्रक्ष्यामि रामस्य वनं गच्छेति भाषिते ।
मुखवर्णं विवर्णन्तं यथैवेन्दुमुपप्लुतम् ॥

किं मां वक्ष्यन्ति राजानो नानादिग्भ्यः समागताः।
कैकेय्या क्लिश्यमानेन पुत्रः प्रव्राजितो मया।
यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति॥
किं मां वक्ष्यति कौशल्या राघवे वनमास्थिते।
किं चैनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशम्॥
* सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा।
न मया सत्कृता देवी सत्कारार्हा कृते तव॥
* विप्रकारं च रामस्य सम्प्रयाणं वनस्य च।
सुमित्रा प्रेक्ष्य वै भीता कथं मे विश्वसिष्यति॥
* नहि राममहं दृष्ट्वा प्रवसन्तं महावने।
चिरं जीवितुमाशंसे रुदतीं चापि मैथिलीम्॥
अवर्तत मां सान्त्वैः सान्त्वयन्ती सुदारुणे।
गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः॥
रममाणस्त्वया सार्द्धं मृत्युं त्वां नाभिलक्षये।
बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम्।
* बालिशो बत कामात्मा राजा दशरथो भृशम्।
प्रस्थापयामास वनं स्त्रीकृते यः प्रियं सुतम्॥
इति देशेषु देशेषु मामुद्दिश्य नराधमम्।
नाना वाचश्चरिष्यन्ति रामे प्रव्राजिते वनम्॥
मामं द्वितीयं वचनं [illegible]

स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥
यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः ।
प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति ॥
शुद्धभावो हि भावं मे न तु ज्ञास्यति राघवः ।
वनं पुत्र व्रजेत्युक्तो नैवान्यत्प्रतिवक्ष्यति ॥
प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ।
मा स्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः ॥
हन्तानार्ये ममामित्रे सकामा भव कैकयि ।
त्यजामि भरतं त्वां च जीवितं नेष्टमात्मनः ॥
मृते मयि गते रामे वनं पुरुषपुङ्गवे ।
इदानीं विधवा राज्यं सपुत्रा कारयिष्यसि
[illegible]धैरश्वैर्गजैरेव यो याति सततं स हि ।
कथं पद्भ्यां महारण्ये वत्सो मे विचरिष्यति ॥
यस्य चाहारसमये सूदाः कुण्डलधारिणः ।
अहम्पूर्वाः पचन्ति स्म प्रशस्तं पानभोजनम् ।
स कथं नु कषायाणि तिक्तानि कटुकानि च ॥
फलानि भक्षयन् नित्यं सुतो मे वर्त्तयिष्यति ॥
महार्हवस्त्रसंवीतो भूत्वा चिरसुखोचितः ।
काषायपरिधानस्तु कथं भूमौ निवत्स्यति
[illegible] लोहितो नाम शठाः स्वार्थपरायणाः ।

न ब्रवीमि स्त्रियः सर्व्वा भरतस्यैव मातरम् ॥

परित्यजेयः पितरोऽपि पुत्रान्
भार्य्याःपतींश्चापि कृतानुरागाः ।
सर्व्वं हि नूनं कुपितं जगत् स्यात्
दृष्ट्वैव रामं व्यसने निमग्नम् ॥

विना हि सूर्य्येण भवेत् प्रवृत्तिः
अवर्षता वज्रधरेण वापि ।
रामन्तु गच्छन्तमितः समीक्ष्य
जीवेन्न कश्चित्त्विति चेतना मे ॥

प्रतप्य वा प्रज्वल वा प्रणश्य वा
सहस्रशो वा स्फुटिता महीं व्रज ।
न ते करिष्यामि वचः सुदारुणं
ममाहितं केकयवंशपांशने ॥

अथ भूमौ महाराजं शयानमतथोचितम् ।
पुनराकारयामास क्रुद्धा केकयवंशजा ॥
त्वं कथ्यसे महाराज सत्यवादी दृढव्रतः ।
मम चेमं वरं कस्माद्विधारयितुमिच्छसि ॥
एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ।
प्रत्युवाच परिक्रुद्धो मुहूर्त्तं विह्वलन्निव ॥
मृते मयि गते रामे वनं मनुजपुङ्गवे ।

हन्तानार्य्ये ममामित्रे सकामा सुखिता भव ॥
अपुत्रेण मया पुत्रः श्रमेण महता महान् ।
रामो लब्धो महातेजाः स कथं त्यज्यते मया ॥
शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः ।
कथं कमलपत्राक्षो मया रामो विवास्यताम् ॥
कथमिन्दीवरश्यामं दीर्घबाहुं महाबलम् ।
अभिराममहं रामं वासयिष्यामि दण्डकान् ॥
सुखानामुचितस्येह दुःखैरनुचितस्य च ।
दुःखं नामानुपश्येयं कथं रामस्य धीमतः ॥
नृशंसे पापसंकल्पे रामं सत्यपराक्रमम् ।
किं विप्रियेण कैकेयि प्रियं योजयसे मम ॥

तथा विलपतस्तस्य परिभ्रमितचेतसः ।
अस्तमभ्यगमत् सूर्य्यो रजनी चाभ्यवर्त्तत ॥
सा त्रियामा तदार्त्तस्य चन्द्रमण्डलमण्डिता ।
राज्ञो विलपमानस्य न व्यभासत शर्व्वरी ॥
वृद्धो दशरथो राजा सदैवोष्णं विनिश्वसन् ।
विललापार्तिदुःखार्त्तो गगनासक्तलोचनः ॥
न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते ।
क्रियतां मे दया भद्रे मयायं रचितोऽञ्जलिः ॥
एवमुक्त्वा ततो राजा कैकेयीं संयताञ्जलिः ।

प्रसादयामास पुनः कैकेयीं राजधर्म्मवित् ॥
साधुवृत्तस्य दीनस्य त्वद्गतस्य गतायुषः ।
प्रसादः क्रियतां भद्रे देवि राज्ञो विशेषतः ॥
प्रसीद देवि रामो मे त्वद्दत्तं राज्यमव्ययम् ।
लभतामसितापाङ्गि यशः परमवाप्स्यसि ॥

विशुद्धभावस्य हि दुष्टभावा
दीनस्य ताम्राश्रुकलस्य राज्ञः ।
श्रुत्वा विचित्रं करुणं विलापं
भर्त्तुर्नृशंसा न चकार वाक्यम् ॥
ततः स राजा पुनरेव दुःखितः
प्रियामतुष्टां प्रतिकूलभाषिणीम् ।
समीक्ष्य पुत्रस्य विवासकारणं
क्षितौ विसंज्ञो निपपात मूर्च्छितः ॥

पुत्रशोकार्दितं पापा विसंज्ञं पतितं भुवि ।
विचेष्टमानमुत्प्रेक्ष्य इक्ष्वाकुमिदमब्रवीत् ॥
पापं कृत्वेव किमिदं मम संश्रुत्य संश्रवम् ।
शेषे क्षितितले सन्नः स्थित्यां स्थातुं त्वमर्हसि ॥
आहुः सत्यं हि परमं धर्मं धर्म्मविदो जनाः ।
सत्यमाश्रित्य च मया त्वं धर्म्मं प्रति चोदितः ॥
सत्यं स्वमनुवर्त्तस्व यदि धर्म्मे धृता मतिः ।

प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहम् ॥
समयश्च ममार्य्येमं यदि त्वं न करिष्यसि ।
अग्रतस्ते ततो राजन् परित्यक्ष्यामि जीवितम् ॥

एवं प्रचोदितो राजा कैकेय्या निर्विशङ्कया ।
उद्भ्रान्तहृदयश्चापि विवर्णवदनोऽभवत् ॥
विक्लवाभ्यां च नेत्राभ्यामपश्यन्निव भूमिपः ।
कृच्छ्राद्धैर्य्येण संस्तभ्य कैकेयीमिदमब्रवीत् ॥
यस्ते मन्त्रकृतः पाणिरग्नौ पापे मया धृतः ।
तं त्यजामि स्वजं चैव तव पुत्रं सह त्वया ॥
सपुत्रया त्वया नैव कर्तव्या सलिलक्रिया ।
व्याहन्तास्यशुभाचारे यदि रामाभिषेचनम् ॥
तां तथा ब्रुवतस्तस्य भूमिपस्य महात्मनः ।
प्रभाता शर्वरी सा तु चन्द्रनक्षत्रशालिनी ॥

पितुरालयमागत्य तं तथाविधं दृष्ट्वा कैकेयीमुखाच्च कार्यं यत्
तदुपश्रुत्य रामस्य वनप्रस्थानाङ्गीकारः ।

सन्ददर्शासने राम आसीनं पितरं शुभे ।
कैकेय्या सहितं दीनं मुखेन परिशुष्यता ॥
स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् ।

करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥

तमार्जवसमायुक्तमनार्य्या सत्यवादिनम् ।
उवाच रामं कैकेयी वचनं भृशदारुणम् ॥
पुरा देवासुरे युद्धे पित्रा ते मम राघव ।
रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥
अथास्य याचितो राजा भरतस्याभिषेचनम् ।
गमनं दण्डकारण्ये तव चाद्यैव राघव ॥
यदि सत्यप्रतिज्ञं त्वं पितरं कर्त्तुमिच्छसि ।
आत्मानञ्च नरश्रेष्ठ मम वाक्यमिदं शृणु ॥
त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ।
भरतश्चाभिषिच्येत यदेतदभिषेचनम् ।
त्वदर्थे विहितं राज्ञा तेन सर्व्वेण राघव ॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः ।
अभिषेकमिमं त्यक्त्वा जटाचीरधरो भव ॥
भरतः कोसलपतेः प्रशास्तु वसुधामिमाम् ।
नानारत्नसमाकीर्णां गजाश्वरथसङ्कुलाम् ॥
एतत् कुरु नरेन्द्रस्य वचनं रघुनन्दन ।
सत्येन महता राम तारयस्व नरेश्वरम् ॥

तदप्रियममित्रघ्नो वचनं मरणोपमम् ।
श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत् ॥

एवमस्तु गमिष्यामि वनं वस्तुमतन्द्रितः ।
जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन् ॥
इदन्तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः ।
नाभिनन्दति दुर्द्धर्षो यथापूर्व्वमरिन्दमः ॥
महाननुग्रहो मे स्यादाज्ञप्तस्य महात्मना ।
मयि भृत्ये च पुत्रे च किं राज्ञो देवि गौरवम् ॥
दैवतं हि प्रभुश्चैव पिता राजा गुरुश्च मे ।
तस्याज्ञां शिरसादाय करिष्यामि यथात्थ माम् ॥
मन्युर्नैव त्वया कार्य्यो देवि ब्रूमि तवाग्रतः ।
यास्यामि भव सुप्रीता वनं चीरजटाधरः ॥
व्यलीकमिदमेकन्तु हृदयं दहते मम ।
स्वयं यन्नाह मां राजा भरतस्याभिषेचनम् ॥
अहं हि सीतां राज्यञ्च प्राणानिष्टान् धनानि च
हृष्टो भ्रात्रे स्वयं दद्यां भरताय प्रणोदितः ।
किं पुनर्मनुजेन्द्रेण स्वयं पित्रा प्रणोदितः ॥
तदाश्वासय हीमन्त्वं किं न्विदं यन्महीपतिः ।
वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ॥
गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादद्यैव नृपशासनात् ॥
दण्डकारण्यमेषोऽहं गच्छाम्येव हि सत्वरः ।

ततो ववन्दे चरणौ कैकेय्याः सुसमाहितः ॥
रामेत्युक्त्वा तु वचनं बाष्पपर्याकुलेक्षणः ।
शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ॥
तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहम् ।
रामोऽपि भयमापन्नो व्यथिताकुलमानसः ॥
अचिन्तनीयं नृपतेस्तं शोकमुपधारयन् ।
बभूव संरब्धतरः समुद्र इव पर्वणि ।
चिन्तयामास चतुरो रामः पितृहिते रतः ।
किंस्विद् यदद्य नृपतिर्न मां प्रत्यभिनन्दति ॥
अन्यदा मां पिता दृष्ट्वा कुपितोऽपि प्रसीदति ।
तस्य मामद्य सम्प्रेक्ष्य किमायासः प्रवर्तते ॥
अथ दाशरथिर्दीनो विलीनवदनद्युतिः ।
कैकेयीमभिसम्भाष्य रामो वचनमब्रवीत् ॥
कच्चिन्मया नापराद्धमज्ञानाद् येन मे पिता ।
कुपितस्तन्ममाचक्ष्व त्वमेवैनं प्रसादय ॥
अप्रसन्नमनाः किं नु सदा मां प्रति वत्सलः ।
विषण्णवदनो दीनो नहि मां प्रतिभाषते ॥
शारीरो मानसो वापि कच्चिदेनं न बाधते ।
सन्तापो दारुणो देवि दुर्लभं हि सदा सुखम् ॥
एतदाचक्ष्व मे देवि तत्त्वेन परिपृच्छतः ।

किन्निमित्तमपूर्वोऽयं विकारो मनुजाधिपे ॥

एवमुक्ता तु कैकेयी राघवेण महात्मना ।
उवाचेदं सुनिर्लज्जा धृष्टमात्महितं वचः ॥
न राजा कुपितो राम व्यसनं नास्य किञ्चन ।
किञ्चिन्मनोगतं त्वस्य त्वद्भयान्नानुभाषते ॥
प्रियं त्वामप्रियं वक्तुं वाणी नास्य प्रवर्त्तते ।
तदवश्यं त्वया कार्य्यं यदनेन श्रुतं मम ॥
एष मह्यं वरं दत्त्वा पुरा मामभिपूज्य च ।
पश्चात्तु तप्यते राजा यथान्यः प्राकृतस्तथा ॥
धर्म्ममूलमिदं राम विदितञ्च सतामपि ।
तथा कुरु यथा सत्यं न त्यजेत् त्वत्कृते नृपः ॥
यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते ।
ततोऽहमभिधास्यामि नैष वक्ष्यति तत् स्वयम् ॥

एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतम् ।
उवाच व्यथितो रामस्तां देवीं नृपसन्निधौ ॥
अहो धिङ्नार्हसे देवि वक्तुं मामीदृशं वचः ।
अहं हि वचनाद्राज्ञः पतेयमपि पावके ॥
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ।
नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ॥
तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम्

अविचार्य पितुर्वाक्यात् समा वस्तुं चतुर्दश ॥

अथ सा तस्य तद्वाक्यं श्रुत्वा रामस्य केकयी ।
प्रीतिप्रफुल्लनयना त्वरयामास राघवम् ॥
एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादिहावर्त्तयितुं नराः ॥
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलम्बनम् ।
राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि ॥
व्रीडान्वितः स्वयं यच्च नृपस्त्वां नाभिभाषते ।
नैतत् किञ्चिन्नरश्रेष्ठ मन्युरेषोऽपनीयताम् ॥
यावत्त्वं न वनं यातः पुरादस्मादतित्वरन् ।
पिता तावन्न ते राम स्नास्यते भोक्ष्यतेऽपि वा ॥

तदप्रियमनार्य्याया वचनं दारुणोदयम् ।
श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत् ॥
यत्तत्रभवतः किञ्चिच्छक्यं कर्त्तुं प्रियं मया ।
प्राणानपि परित्यज्य सर्वथा कार्य्यमेव तत् ॥
नह्यतो धर्म्मचरणं किञ्चिदस्ति महत्तरम् ।
यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ॥
अनुक्तोऽप्यत्रभवता भवत्या वचनादहम् ।
वने वत्स्यामि विजने वर्षाणीह चतुर्दश ॥
यावन्मातरमापृच्छे सीताञ्चानुनयाम्यहम् ।

ततोऽद्यैव गमिष्यामि दण्डकानां महद्वनम् ॥
भरतः पालयेद्राज्यं शुश्रूषेच्च पितुर्यथा ।
तथा भवत्या कर्त्तव्यं स हि धर्म्मः सनातनः ॥
रामस्य तु वचः श्रुत्वा नृपः शोकपरिप्लुतः ।
बाष्पपूर्णेक्षणो दीनः प्ररुरोद महास्वनम् ॥

वन्दित्वा चरणौ रामः शोकार्त्तस्य पितुस्तदा ।
कैकेय्याश्चाप्यनार्य्याया निष्पपात महाद्युतिः ॥
तं बाष्पपरिपूर्णाक्षः पृष्ठतोऽनुजगाम ह ।
लक्ष्मणः परमक्रुद्धः सुमित्रानन्दवर्द्धनः ॥
गमने च मतिं चक्रे वनवासाय लक्ष्मणः ।
अनुचिन्त्य विना रामं नाहं जीवितुमुत्सहे ॥
न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् ।
सर्व्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ॥
प्रतिषिध्य शुभं छत्रं व्यजने च स्वलङ्कृते ।
विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान् ।
धारयन् मनसा दुःखमिन्द्रियाणि निगृह्य च ।
प्रविवेशात्मवान् वेश्म मातुरप्रियशंसिवान् ॥
तदा सर्व्वोऽप्यभिजनः श्रीमतः सत्यवादिनः ।
नालक्षयत रामस्य कञ्चिदाकारमानने ॥
उचितञ्च महाबाहुर्न जहौ हर्षमात्मवान् ।

शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मनः ॥
वाचा मधुरया रामः सर्व्वं सम्मानयन् जनम् ।
मातुः समीपं धर्म्मात्मा प्रविवेश महायशाः ॥
तं गुणैः समतां प्राप्तो भ्राता विपुलविक्रमः ।
सौमित्रिरनुवव्राज धारयन् दुःखमात्मनः ॥

वनं गन्तुं कृतनिश्चयस्य रामस्य मातरमामन्त्रयितुं
तदन्तःपुरप्रवेशः ।

रामस्तु भृशमायस्तो निश्वसन्निव कुञ्जरः ।
जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥
सोऽपश्यत् पुरुषं तत्र वृद्धं परमपूजितम् ।
उपविष्टं गृहद्वारि तिष्ठतश्चापरान् बहून् ॥
दृष्ट्वैव तु तदा रामं ते सर्व्वे समुपस्थिताः ।
जयेन जयतां श्रेष्ठं वर्द्धयन्ति स्म राघवम् ॥
प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृता
प्रणम्य रामस्तान् वृद्धान् तृतीयायां ददर्श सः ।
स्त्रियो बालाश्च वृद्धाश्च द्वाररक्षणतत्पराः ॥
वर्द्धयित्वा प्रहृष्टास्ताः प्रविश्य च गृहं स्त्रियः ।
न्यवेदयन्त त्वरितं राममातुः सुतागमम् ॥

प्रविश्य तु तदा रामो मातुरन्तःपुरं शुभम् ।
ददर्श मातरं तत्र हावयन्तीं हुताशनम् ॥
सा चिरादात्मजं दृष्ट्वा मातृनन्दनमागतम् ।
अभिचक्राम संहृष्टा किशोरं वडवा यथा ॥
स मातरमुपक्रान्तामुपसंगृह्य राघवः ।
परिष्वजत धर्मात्मा माता चैव परन्तपः ।
परिष्वक्तस्य बाहुभ्यामवघ्रातस्य मूर्द्धनि ॥
तमुवाच दुराधर्षं राघवं सुतमात्मनः ।
कौशल्या पुत्रवात्सल्यादिदं प्रियहितं वचः ॥
वृद्धानां धर्मशीलानां राजर्षीणां महात्मनाम् ।
प्राप्नुह्यायुश्च कीर्त्तिञ्च धर्मञ्चाप्युचितं कुले ॥
सत्यप्रतिज्ञं पितरं राजानं पश्य राघव ।
अद्यैव त्वां स धर्मात्मा यौवराज्येऽभिषेक्ष्यति ॥
दत्तमासनमालभ्य भोजनेन निमन्त्रितः ।
मातरं राघवः किञ्चित् प्रसार्याञ्जलिमब्रवीत् ॥
देवि नूनं न जानीषे महद्भयमुपस्थितम् ।
इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च ॥
गमिष्ये दण्डकारण्यं किमनेनासनेन मे ।
विष्टरासनयोग्यो हि कालोऽयं समुपागतः ॥
चतुर्दश हि वर्षाणि वत्स्यामि विजने वने ।

कन्दमूलफलैर्जीवन् हित्वा मुनिवदामिषम् ॥
भरताय महाराजो यौवराज्यं प्रयच्छति ।
मां पुनर्दण्डकारण्यं विवासयति तापसम् ॥
स षट् चाष्टौ च वर्षाणि वत्स्यामि विजने वने ।
आसेवमानो वन्यानि फलमूलैश्च वर्त्तयन् ॥
सा निकृत्तेव शालस्य यष्टिः परशुना वने ।
पपात सहसा देवी देवतेव दिवश्च्युता ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव ।
रामस्तूत्थापयामास मातरं गतचेतसम् ॥
सा राघवमुपासीनमसुखार्त्ता सुखोचिता ।
उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥
यदि वत्स न जायेथा मम शोकाय राघव ।
अद्य नैतादृशं दुःखं पश्येयमहमप्रजाः ॥
एक एव हि वन्ध्यायाः शोको भवति मानसः ।
अप्रजास्मीति सन्तापो न ह्यन्यः पुत्र विद्यते ।
सा बहून्यमनोज्ञानि वाक्यानि हृदयच्छिदाम्
अहं श्रोष्ये सपत्नीनामवराणां वरा सती ॥
अतो दुःखतरं किं नु प्रमदानां भविष्यति ।
मम शोको विलापश्च यादृशोऽयमनन्तकः ॥
त्वयि सन्निहितेऽप्येवमहमासं निराकृता ।

किं पुनः प्रोषिते तात ध्रुवं मरणमेव हि ॥

तदक्षयं महद्दुःखं नोत्सहे सहितुं चिरात् ।
विप्रकारं सपत्नीनामेवं जीर्णापि राघव ॥

अपश्यन्ती तव मुखं परिपूर्णशशिप्रभम् ।
कृपणा वर्त्तयिष्यामि कथं कृपणजीविका ॥

स्थिरं नु हृदयं मन्ये ममेदं यन्न दीर्य्यते ।
प्रावृषीव महानद्याः स्पृष्टं कूलं नवाम्भसा ॥

तथा तु विलपन्तीं तां कौशल्यां राममातरम् ।
उवाच लक्ष्मणो दीनस्तत्कालसदृशं वचः ॥

न रोचते ममाप्येतदार्य्ये यद्राघवो वनम् ।
त्यक्त्वा राजश्रियं गच्छेत् स्त्रिया वाक्यवशं गतः ॥

विपरीतस्य वृद्धस्य विषयैश्च प्रधर्षितः ।
नृपः किमिव न ब्रूयात् कैकेय्याभिप्रणोदितः ॥

नास्यापराधं पश्यामि नापि दोषं तथाविधम् ।
येन निर्वास्यते राष्ट्राद्वनवासाय राघवः ॥

न तं पश्याम्यहं लोके परोक्षमपि यो नरः ।
अमित्रोऽपि निरस्तोऽपि अस्य दोषमुदाहरेत् ॥

देवकल्पमृजुं दान्तं रिपूणामपि वत्सलम् ।
अवेक्षमाणः को धर्म्मं त्यजेत् पुत्रमकारणात् ।

तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः ।

वपुः को हृदये कुर्य्याद्राजन्तमनुस्मरन् ॥

यावदेव न जानाति कश्चिदर्थमिमं नरः ।

तावदेव मया सार्द्धमात्मस्थं कुरु शासनम् ॥

मया पार्श्वे सधनुषा तव गुप्तस्य राघव ।

कः समर्थोऽप्रियं कर्त्तुं कृतान्तस्येव तिष्ठतः ॥

निर्म्मनुष्यामिमां सर्व्वामयोध्यां मनुजर्षभ ।

करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये ।

भरतस्याथ पक्ष्यो वा यो वास्य हितमिच्छति ।

सर्व्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते ॥

प्रोत्साहितोऽयं कैकेय्या सन्तुष्टो यदि नः पिता

अमित्रभूतो निःशङ्कं वध्यतां बध्यतामपि ॥

गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।

उत्पथप्रतिपन्नस्य कार्य्यं भवति शासनम् ॥

बलमेष किमाश्रित्य हेतुं वा कं नरोत्तम ।

दातुमिच्छति कैकेय्यै उपस्थितमिदं तव ॥

त्वया चैव मया चैव कृत्वा वैरमनुत्तमम् ।

कास्य शक्तिः श्रियं दातुं भरतायारिशासन ॥

अनुरक्तोऽस्मि भावेन भ्रातरं देवि तत्त्वतः ।

सत्येन धनुषा चैव शपामि तव सन्निधौ ॥

दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ।

प्रविष्टं तत्र मां देवि त्वं पूर्व्वमवधारय ॥
हरामि वीर्य्याद्दुःखं ते तमः सूर्य्य इवोदितः ।
देवि त्वं पश्य मे वीर्य्यं राघवश्चैव पश्यतु ॥
हनिष्ये पितरं वृद्धं कैकेय्यासक्तमानसम् ।
कृपणं तं स्थितं बाल्ये वृद्धभावेन गर्हितम् ॥
एतत्तु वचनं श्रुत्वा लक्ष्मणस्य महात्मनः ।
उवाच रामं कौशल्या रुदती शोकविह्वला ॥
भ्रातुस्ते वचनं पुत्र लक्ष्मणस्य श्रुतं त्वया ।
यदत्रानन्तरं कार्य्यं कुरुष्व यदि रोचते ॥
नचाधर्म्यं वचः श्रुत्वा सपत्न्या नाम भाषितम् ।
विहाय शोकसन्तप्तां गन्तुमर्हसि मामितः ॥
धर्म्मज्ञ यदि धर्म्मिष्ठ धर्म्मं चरितुमिच्छसि ।
शुश्रूष मामिहस्थस्त्वं चर धर्म्ममनुत्तमम् ॥
शुश्रूष जननीं पुत्र स्वगृहे नियतो वसन् ॥
यथैव राजा पूज्यस्ते गौरवेण तथा ह्यहम् ।
त्वां साहमनुजानामि न गन्तव्यमितो वनम् ॥
त्वद्वियोगान्न मे कार्य्यं जीवितेन सुखेन वा ।
त्वया सह मम श्रेयस्तृणानामपि भक्षणम् ॥
यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकलालसाम् ।
अहं प्रायमिहासिष्ये न च शक्ष्यामि जीवितुम् ॥

विलपन्तीं तथा दीनां कौशल्यां जननीं ततः
उवाच रामो धर्म्मात्मा वचनं धर्म्मसंहितम्॥
नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम।
प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम्॥
नाहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्त्तये।
पूर्व्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते॥
तदेतत्तु मया कार्य्यं नियतं वचनं पितुः।
पितुर्हि वचनं कुर्व्वन्न कश्चिदवहीयते॥
तामेवमुक्त्वा जननीं लक्ष्मणं पुनरब्रवीत्।
वाक्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्व्वधनुष्मताम्॥
तव लक्ष्मण जानामि मयि स्नेहमनुत्तमम्।
विक्रमञ्चैव सत्त्वञ्च तेजश्च सुदुरासदम्॥
मम मातुर्महद्दुःखमतुलं शुभलक्षण।
अभिप्रायमविज्ञाय सत्यस्य च शमस्य च॥
धर्म्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम्।
धर्मसंश्रितमेतत्तु पितुर्वचनमुत्तमम्॥
संश्रुत्य च पितुर्वाक्यं मातुर्वा प्रियदर्शन।
न कर्त्तव्यं वृथा वीर धर्म्ममाश्रित्य तिष्ठता॥
सोऽहं न शक्ष्यामि पितुर्नियोगमतिवर्त्तितुम्।
पितुर्हि वचनाद्वीर कैकेय्याहं प्रचोदितः॥

वदेहीं विक्रजानाय्यां सत्यधर्माश्रितां मतिम् ।
धर्ममाश्रय मा तीक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ॥
एवमुक्त्वा सौहार्दात् भ्रातरं लक्ष्मणाग्रजः ।
उवाच भूयः कौशल्यां प्राञ्जलिः शिरसा नतः ॥
अनुमन्यस्व मां देवि गमिष्यन्तमितो वनम् ।
शापितासि मम प्राणैः कुरु स्वस्त्ययनानि तु ॥
शोकः सन्धार्य्यतां मातर्हृदये साधु मा शुच ।
वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः ॥
अम्ब संहृत्य सम्भारान् दुःखं हृदि निगृह्य च ।
वनवासकृता बुद्धिर्मम धर्म्यानुवर्त्यताम् ॥

इति ब्रुवति रामे तु लक्ष्मणोऽवाक्शिरा इव ।
ध्यात्वा मध्यं जगामाशु सहसा दुःखहर्षयोः ॥
ततस्तु बद्ध्वा भ्रुकुटीं भ्रुवोर्मध्ये नरर्षभः ।
निशश्वास महासर्पो बिलस्थ इव रोषितः ॥
तस्य दुष्प्रतिवीक्ष्यं तत् भ्रुकुटीसहितं तदा ।
बभौ क्रुद्धस्य सिंहस्य मुखस्य सदृशं मुखम् ॥
अग्रहस्तं विधुन्वंस्तु हस्ती हस्तमिवात्मनः ।
अधश्चाग्रा वीक्षमाणस्तु तिर्य्यक् भ्रातरमब्रवीत् ॥

लोकविद्विष्टमारब्धं त्वदन्यस्याभिषेचनम्।
नोत्सहे सहितुं वीर तत्र मे क्षन्तुमर्हसि॥
येनैवमागता द्वैधं तव बुद्धिर्महामते।
सोऽपि धर्म्मो मम द्वेष्यो यदासङ्गाद्विमुह्यसि
कथं त्वं कर्म्मणा शक्तः कैकेयीवशवर्त्तिनः।
करिष्यसि पितुर्वाक्यमधर्म्मिष्ठं विगर्हितम्॥
मनसापि कथं कामं कुर्य्यास्त्वं कामवृत्तयोः।
तयोरहितयोर्नित्यं शत्वोः पित्रभिधानयोः॥
यदीयं प्रतिपत्तिस्ते दैवी चापि तयोर्मता।
तथाप्युपेक्षणीयं ते न मे तदपि रोचते॥
विक्लवो वीर्य्यहीनो यः स दैवमनुवर्त्तते।
वीराः सम्भावितात्मानो न दैवं पर्य्युपासते॥
लोकपालाः समस्तास्ते नाद्य रामाभिषेचनम्
न च कृत्स्नास्त्रयो लोकाः विहन्युः किं पुनः पि
यैर्विवासस्तवारण्ये मिथो राजन् समर्थितः।
अरण्ये ते विवत्स्यन्ति चतुर्दश समा ध्रुवम्॥
अहं तदाशां धक्ष्यामि पितुस्तस्याश्च या तव।
अभिषेकविघातेन पुत्रराज्याय वर्त्तते॥
न शोभार्थाविमौ बाहू न धनुर्भूषणाय मे।

न गन्तुं कृतमतिं कृतघ्नं शरणागतम् ॥
निवर्त्तयितव्योऽहं सर्व्वथा रघुनन्दन ।
हि राम त्वया त्यक्तो जीवेयमिति मे मतिः ॥
निवर्त्तयितुं शक्या बुद्धिरेषा मम स्थिरा ।
भवाननुजानातु ममानुगमनं वने ॥
सोऽनुनीतो बहुविधं लक्ष्मणेन यशस्विना ।
ढामित्यब्रवीद्रामो लक्ष्मणं भ्रातृवत्सलम् ॥
ह यास्यामि सौमित्रे त्वयाहं गहनं वनम् ।
वान् हि परमो बन्धुः सखा भक्तः प्रियश्च मे
एवं राघववचः श्रुत्वा लक्ष्मणानुनयं तथा ।
र्धमृणाश्च निश्वस्य कौशल्या वाक्यमब्रवीत्
दि धर्म्मं पुरस्कृत्य पुत्त्र वर्त्तितुमिच्छसि ।
तो मे वचनं धर्म्मज्ञ शृणु धर्म्मभृतां वर ॥
वं हि लब्धो मया कष्टैस्तपोभिर्नियमैस्तथा
वचनं ते त्वया कार्य्यमतः पुत्त्र विशेषतः ॥
आशया परया राम शिशुस्त्वं परिपालितः ।
तत् समर्थोऽद्य मां दीनां परिरक्षितुमर्हसि ॥
पश्य मामद्य पुत्त्र त्वं जीवितेन वियोजिताम् ।
न सकामां सपत्नीं मे कैकेयीं कर्त्तुमर्हसि ॥
यच्चापि राम शक्ताहं विप्रकारान् पर्य्यविधान्

क्रोढुं यत्कार्णे कैकेय्याः परिभूता विशेषतः ॥
नित्यं कालं सपत्नीभिर्भृशं विप्रकृता सती ।
पुत्रच्छायां समाश्रित्य भवेयं सुख्यमानसा ॥
साहमद्य न शक्ष्यामि जीवितुं शर्व्वरीमिमाम् ।
फलिना पादपेनेव फलकाले वियोजिता ॥
मा पुत्रक वचः कार्षीः स्त्रीविधेयस्य भूपतेः ।
कामकारप्रवृत्तस्य दुष्कृतेरसुदैरिव ॥
योऽतीत्य धर्म्मं पौराणमिक्ष्वाकूणां कुलोचितम् ।
त्वामतिक्रम्य भरतमभिषेक्तुमिहेच्छति ॥
अपि चेयं पुरा गीता गाथा सर्व्वत्र विश्रुता ।
मनुना मानवेन्द्रेण तां श्रुत्वा मे वचः कुरु ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
कामकारप्रवृत्तस्य न कार्य्यं भवतो वचः ॥
पितॄन् दश च मातैका सर्व्वां वा पृथिवीं विभो ।
गुरुत्वेनाभिभवति कोऽस्ति मातृसमो गुरुः ॥
पतिता गुरवस्त्याज्या माता तु न कथञ्चन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥
साहं ते पितृतो राम धर्म्मतो गौरवाधिका ।
माननीया विशेषेण यथा धर्म्मविदो विदुः ।
अतो ममापि ते कार्य्यं शासनं पुत्रवत्सल ।

भिविच्यस्व धर्मेण राज्यं राजीवलोचन ॥

यदि त्वमेतन्मम भाषितं हितं
कुलोचितं सत्पुरुषैर्निषेवितम् ।
यथावदुक्तं न करिष्यसे ततो-
ऽचिरेण यास्यामि यमक्षयं सुता ॥

अथानुनेतुं चक्रेऽसौ मातरं वनमास्थितः
स्नितैर्मधुरैर्वाक्यैर्हेतुमद्भिश्च राघवः ॥
न चैव भवत्यास्तु राजा प्रभवति प्रभुः ।
प्रभुत्वमतस्तेऽस्ति मम देवि निवर्त्तने ॥
ातुमर्हसि मेऽनुज्ञां देवि धर्मभृतां वरे ।
नवामाय वर्षाणि नव पञ्च च सुव्रते ॥
भर्त्ता हि दैवतं स्त्रीणां भर्त्ता चेश्वर उच्यते ।
ततस्ते शासनं भर्त्तुर्न व्याहन्तव्यमेव हि ॥
पुनरागमनं मे त्वमाशंसयितुमर्हसि ।
पतिव्रता नित्यमेव भर्त्तुराज्ञापरा सती ॥
... प्रतिसु एष्यामि त्वत्प्रसादादहं पुनः ।
... देवि मा कार्षीरिदयं शोकमण्वपि ॥
... ... विस्तीर्णो राज्ञामिततेजसाम्
... ...आचारधर्मज्ञासि च सुव्रते ।
... ... भर्त्ता देवि प्रसीद मे ।

मत् स्नेहान्नार्हसे मातर्मतं तस्यातिवर्त्तितुम् ॥
निर्विकारं गुरोराज्ञा मया कार्य्या विशेषतः ।
श्रेयो ह्येवं भवत्याश्च मम चैव भविष्यति ॥
न ते राजा किञ्चिदपि वक्तव्यो मदपेक्षया ।
प्रतीपमप्रियं वापि नच कार्य्यं प्रसीद मे ॥
कैकेयी वा महाभागा भरतो वा महायशाः ।
अल्पमप्यप्रियं वाक्यं न वक्तव्यं प्रसीद मे ॥
यथाहमिव द्रष्टव्यो भरतः सर्व्वथा त्वया ।
कैकेयी भगिनीवच्च द्रष्टव्या स्नेहतस्त्वया ॥
पित्रा दत्तं यौवराज्यं भरतो यद्यवाप्स्यति ।
तत्र दोषोऽस्ति कस्तस्य भरतस्य महात्मनः ॥
अभिसृष्टं पुरा राज्ञा कैकेयी भर्त्तुर्वरम् ।
यदि गृह्णाति कस्तस्या दोषस्तत्र ब्रवीहि मे ॥
राजा च प्राक् प्रतिश्रुत्य ददात्यस्यै यदा वरम् ।
भीतोऽनृतात्तत्र दोषः को राज्ञः सत्यवादिनः ॥
श्रुतधर्म्मार्थतत्त्वो हि साधुः सद्वृत्तमास्थितः ।
सत्यज्ञः सत्यवाक् राजा नहि धर्म्माच्चलिष्यति ॥
प्रसीदाम्नयामि त्वां नानुशास्मि कथञ्चन ।
अनुजानीहि मां मातर्वनवासाय दीक्षितम् ॥
इत्युक्ता जननीं रामो धर्म्मार्थानुगतं वचः ।

स्थितां ध्यानपरां दीनां पुनर्वचनमब्रवीत् ॥
त्वया देवि मया चैव स्थेयं नृपतिशासने ।
राजा भर्त्ता गुरुश्चैव सर्व्वेषामीश्वरश्च नः ॥
इमानि तानि वत्स्येऽहं वर्षाणि नव पञ्च च ।
वनात् पुनरुपावृत्य स्थास्यामि तव शासने ॥

इत्युक्ता सा प्रियं पुत्रं वाष्पपर्य्याकुलं वचः ।
उवाचेदं सपत्नीनां मध्ये वस्तुं न मे क्षमम् ॥
नय मामपि पुत्र त्वं वनं वन्यं मृगाकुलम् ।
यदि ते गमने बुद्धिः कृता पितुरपेक्षया ॥

तां तथा ब्रुवतीं रामः पुनर्व्वचनमब्रवीत् ।
जीवन्त्या हि स्त्रिया भर्त्ता दैवतं न पुनः सुतः ।
भवत्या मम चैवाद्य राजा प्रभवति प्रभुः ॥
नो नाथोऽयं नेतुं त्वामितो नगराद्वनम् ।
विवासयन्तु न्याय्योऽहं जीवपत्या त्वयापि च ॥
महात्मा चामहात्मा च पतिरेव गुरुः स्त्रियाः ।
किं पुनर्व्यपतिर्देवि महात्मा दैवतञ्च ते ।
भरतश्चापि धर्म्मात्मा विनीतो गुरुवत्सलः ।
संशयं यथैवाहं पुत्रस्ते धर्म्मतस्तथा ॥
त्तोऽधिकतरां पूजां भरतादप्यवाप्स्यसि ।
हि किञ्चिदकल्याणं तस्मादाशङ्कयाम्यहम् ॥

यथा च मयि निष्क्रान्ते पुत्रशोकेन मे पिता ।
अतिमात्रं न सन्ताप्येत्तथा त्वं कर्त्तुमर्हसि ॥
या धर्मचारिणी नारी पतिं पतिपरायणा ।
नानुवर्त्तेत धर्म्मेण सा सद्भिर्न प्रशस्यते ॥
भर्तृव्रता भर्तृपरा नारी भर्त्तृपरायणा ।
इह कीर्त्तिं परां प्राप्य प्रेत्य स्वर्गे महीयते ॥
तस्मात् सदैव भर्त्तुस्त्वं शुश्रूषानिरता भवेः ।
स्थातुमर्हसि धर्मो हि सत्स्त्रीणामेष शाश्वतः ॥
गार्हस्थ्यधर्मव्रतया देवाराधनशीलया ।
भर्त्तृचित्तानुवर्त्तिन्या भर्त्ता सेव्य इह त्वया ॥
वर्षेह भर्तृसहिता मदागमनकाङ्क्षिणी ।
द्रक्ष्यसे भर्त्तृसहिता ममाभ्यागमनं पुनः ॥

तं समीक्ष्य व्यवसितं पितुर्निर्देशपालने ।
कौशल्या वाष्पसंरुद्धा वचो धर्मिष्ठमब्रवीत् ॥
अदृष्टदुःखो धर्मात्मा सर्व्वभूतप्रियंवद ।
मयि जातो दशरथात् कथमुञ्छेन वर्त्तयेत् ॥
यस्य भृत्याश्च दासाश्च स्वाद्वन्नानि भुञ्जते ।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम् ॥
कः श्रद्दध्यादिदं श्रुत्वा कस्य वा न भवेद्भयम् ।
गुणवान् दयितो राज्ञो राघवो यद्विवास्यते ॥

मा विहीनामिह मां शोकाग्निरतुलो महान् ।
क्ष्यति यथा कक्षं चित्रभानुर्हिमात्यये ॥
था हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति ।
ा त्वानुयास्यामि वात्सल्यादिति मे मतिः ॥
इति मातुर्निगदितं वाक्यं स करुणाक्षरम् ।
वा रामोऽब्रवीद्वाक्यं कौशल्यां शोकविह्वलाम्
केय्या वञ्चितो राजा मयि चारण्यमाश्रिते ।
त्या च परित्यक्तो न नूनं वर्त्तयिष्यति ।
र्तुः किल परित्यागो नृशंसः केवलं स्त्रियाः ।
त्वया न कर्त्तव्यो मनसापि विगर्हितः ॥
वज्जीवति काकुत्स्थः पिता मे जगतीपतिः ।
श्रूषा क्रियतां तावत् स हि धर्मः सनातनः ॥
हं त्वयानुगन्तव्यो भर्त्ता हि तव दैवतम् ।
मेहैव वसन्ती त्वमाधारयितुमर्हसि ॥
ज्ञा हि ते प्रभवति प्राणानां जीवितस्य च ।
नुगन्तुमतो देवि न मामर्हसि सर्वथा ॥
ते सानुनयं वाक्यं श्रुत्वा धर्मसंहितम् ।
मेणोक्तं बभाषेऽथ कौशल्या साश्रुलोचना ॥
छ पुत्र शिवं तेऽस्तु कुरु त्वं पितृशासनम् ।
स्तिमन्तरिष्टं त्वां द्रक्ष्यामि पुनरागतम् ।

शुश्रूषानिरता भर्त्तुर्भविष्यामि यथात्थ माम् ।
यच्चान्यदपि कर्त्तव्यं करिष्ये तत् सुखी व्रज ॥

वनप्रस्थानकाले पितरमामन्त्रयितुं
रामस्य तद्भवनप्रवेशः ।

दत्त्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु ।
जग्मतुः पितरं द्रष्टुं सीतया सह राघवौ ॥
पदातिं सानुजं दृष्ट्वा ससीतञ्च जनास्तदा ।
ऊचुर्बहुविधा वाचः शोकोपहतचेतसः ॥
यं यान्तमनुयाति स्म चतुरङ्गबलं महत् ।
तमेकं सीतया सार्द्धमनुयाति स्म लक्ष्मणः ॥
ऐश्वर्यस्य रसज्ञः सन् कामानाञ्चाकरो महान् ।
नेच्छत्येवानृतं कर्त्तुं वचनं धर्मगौरवात् ॥
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ।
तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ॥
अङ्गरागोचितां सीतां रक्तचन्दनसेविनीम् ।
वर्षमुष्णञ्च शीतञ्च नेष्यत्याशु विवर्णताम् ॥
अद्य नूनं दशरथः सत्त्वमाविश्य भाषते ।
न हि राजा प्रियं पुत्रं विवासयितुमर्हति ॥

निर्गुणस्यापि पुत्रस्य कथं स्याद्विनिवासनम् ।
किं पुनर्यस्य लोकोऽयं जितो वृत्तेन साधुना ॥
आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः ।
राघवं शोभयन्त्येते षड्गुणाः पुरुषर्षभम् ॥
तस्मात्तस्योपघातेन प्रजाः परमपीडिताः ।
औदकानीव सत्त्वानि ग्रीष्मे सलिलसंक्षयात् ॥
पीडया पीडितं सर्वं जगदस्य जगत्पतेः ।
मूलस्येवोपघातेन वृक्षः पुष्पफलोपगः ॥
मूलं ह्येष मनुष्याणां धर्मसारो महाद्युतिः ।
पुष्पं फलञ्च पत्रञ्च शाखाश्चास्येतरे जनाः ॥
ते लक्ष्मण इव क्षिप्रं सपत्न्यः सहबान्धवाः ।
गच्छन्तमनुगच्छामो येन गच्छति राघवः ॥
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च ।
एकदुःखसुखा राममनुगच्छाम धार्मिकम् ॥
समुद्धृतनिधानानि परिध्वस्ताजिराणि च ।
उपात्तधनधान्यानि हृतसाराणि सर्वशः ॥
रजसाभ्यवकीर्णानि हीनसम्मार्जनानि च ।
मूषकैः परिधावद्भिरुद्बिलैरावृतानि च ॥
अपेतोदकधूमानि भिन्नभाजनवन्ति च ।
अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम्

वनं नगरमेवास्तु यत्र गच्छति राघवः।
अस्माभिश्च परित्यक्तं पुरं सम्पद्यतां वनम्॥
बिलानि दंष्ट्रिणः सर्वे सानूनि मृगपक्षिणः।
त्यजन्त्वस्मद्भयाद्भीता गजाः सिंहा वनान्यपि॥
इत्येवं विविधा वाचो नानाजनसमीरिताः।
शुश्राव राघवः श्रुत्वा न विचक्रेऽस्य मानसम्॥
स तु वेश्म पुनर्मातुः कैलासशिखरप्रभम्।
अभिचक्राम धर्मात्मा मत्तमातङ्गविक्रमः॥

प्राग्द्वारमागते रामे सभार्ये सहलक्ष्मणे।
बाष्पदुर्दिनाक्षो दीनो विललापातुरो नृपः॥
हन्तानार्ये सकामासि सकामा भव कैकयि।
मृते मयि गते रामे वनं मनुजकुञ्जरे॥
त्यजामि भरतं त्वां च जीवितं चेदमात्मनः।
भूत्वेह विधवा राज्यं निर्घृणा रक्षिता मया॥
नाहं विहीनो रामेण त्यक्ता जीवितमात्मनः।
भविष्यामि न ते पापे भूय एवं वशानुगः॥
येन मन्त्रयसे मूढे किं समन्त्रयसे शुभम्।
मज्जीवितविनाशाय कस्तेऽदान्मतमीदृशम्॥
अरण्यं गच्छतां रामो भरतश्चाभिषिच्यताम्।
इति कस्य मतं पापे मोघायासस्य दुरात्मनः॥

गते रामे कथं राज्यं भरतः पालयिष्यति ।
ज्येष्ठे तिष्ठति राज्यार्हे धीरे राजीवलोचने ॥
कालरात्रीव निहिता भार्यारूपेण कैकयी ।
कथं त्वं प्राणपुत्रेण मयाद्य भर्त्रा विना ॥
स्त्रीणां धिगस्तु नार्याणां कृतघ्नानां विशेषतः ।
त्यजन्ति वशगान् भर्तॄन् या लक्ष्मीं धनतृष्णया ॥
निर्घृणे निरनुक्रोशे कीदृशं हृदयं तव ।
शरणार्थं याचमानं वत्सं त्वं त्यक्तुमिच्छसि ॥
नृशंसे भान्तु ते लोकाः परोक्षेऽपि सनातनाः ।
यस्मात् प्रियेण पुत्रेण वियोजयसि दुःखितम् ॥
उचितः शिबिकायानं गजयानञ्च मे सुतः ।
कान्तारवनदुर्गेषु कथं पद्भ्यां चरिष्यति ॥
स्वादूनामन्नपानानामुचितोऽयं ममात्मजः ।
सुकुमारो विलासी च मृष्टाभरणभूषितः ॥
कटुतिक्तकषायाणि मूलानि च फलानि च ।
वल्कलाजिनसंवीतः स कथं भक्षयिष्यति ॥
यदि नाम स धर्म्मात्मा ममातिक्रम्य शासनम् ।
नेच्छेद्गन्तुं प्रियं मे स्यान्नतु वत्सः करिष्यति ॥
हा शुद्धभाव धर्मात्मन् विनीत गुरुवत्सल ।
मयासि पितृमान् पुत्र स्त्रीवश्येन हतात्मना ॥

शीलवृत्तगुणज्येष्ठं प्राणैः प्रियतरं सुतम् ।
कथं त्यक्तुं गुणारामं रामं मे धावते मतिः ॥
स्त्रीवशोऽहमनार्य्योऽहं सर्व्वथैव धिगस्तु माम् ।
शुश्रूषु दयितं पुत्रं स्त्रीजितो यस्त्यजाम्यहम् ॥
किं मां वक्ष्यति लोकोऽयं दुष्टं पापकारिणम् ।
यः पुत्रं स्त्रीकृते सद्यस्त्यजाम्यनपकारिणम् ॥
वशिष्ठो वामदेवश्च जाबालिः काश्यपस्तथा ।
किं मां वक्ष्यन्ति ते दृष्ट्वा किमन्ये ब्रह्मवादिनः ॥
विश्वामित्रादयः सिद्धास्तपोवननिवासिनः ।
दृष्ट्वा पृथिवीपालाः किञ्च वक्ष्यन्ति साधवः ॥
पतितोऽस्म्ययशस्को लोके पतितश्चास्मि सर्व्वथा ।
कैकेय्यै राज्यलुब्धायै ह्यनिरूप्य वरद्वयम् ॥
हा हतोऽस्मि प्रनष्टोऽस्मि दग्धोऽस्मि व्याकुलेन्द्रियः
कैकेय्या वशमागत्य लुब्धायाः पापतोहितः ॥

इति राजा दशरथः पुत्रशोकाकुलेन्द्रियः ।
अनिन्ददात्मनात्मानं सुरां पीत्वेव वेदवित् ॥
एवं विलपतस्तस्य दुःखार्त्तस्य महीपतेः ।
उपेत्यावेदयामास सुमन्त्रो राममागतम् ॥
प्रवेश्यतां राम इति वाक्यमुक्त्वा नराधिपः ।
तीव्रशोकसमाविष्टो भूयो मोहमुपागतः ॥

मुहूर्त्तमिव निःसंज्ञो भूत्वा शोकपरायणः ।
प्रतिलेभे पुनः संज्ञां सिंहासनगतो नृपः ॥
लब्धसंज्ञञ्च तं भूयः सुमन्त्रः पृथिवीपतिम् ।
उपेत्य प्राञ्जलिर्वाक्यमुवाचेदं सुदुःखितम् ॥
अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः ।
ब्राह्मणेभ्यो धनं दत्त्वा सर्व्वेषां चोपजीविनाम् ॥
स त्वां पश्यतु भद्रं ते रामः सत्यपराक्रमः ।
सर्व्वान् सुहृद आपृच्छ्य त्वां इदानीं दिदृक्षते
गमिष्यति महारण्यं तं पश्य जगतीपते ।
वृतं राजगुणैः सर्व्वैरादित्यमिव रश्मिभिः ॥
स सत्यवाक्यो धर्म्मात्मा गाम्भीर्य्ये सागरोपमः ।
उवाच राजा तं सूतं सुमन्त्रानय मे सुतम् ॥
स सूतो राममादाय लक्ष्मणं मैथिलीं तथा ।
जगामाभिमुखस्तूर्णं सकाशं जगतीपतेः ॥
सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशाम्पतिः ।
तमसंप्राप्य दुःखार्त्तः पपात भुवि मूर्च्छितः ॥
तं रामोऽभ्यपतत् क्षिप्रं लक्ष्मणश्च महारथः ।
विसंज्ञमिव दुःखेन सशोकं नृपतिं तथा ॥
तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ ।
पर्य्यङ्के सीतया सार्द्धं रुदन्तः समवेशयन् ॥

अथ रामो मुहूर्त्तस्य लब्धसंज्ञं महीपतिम् ।
उवाच प्राञ्जलिर्भूत्वा शोकार्णवपरिप्लुतम् ॥
आपृच्छे त्वां महाराज सर्व्वेषामीश्वरोऽसि नः ।
प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् ॥
लक्ष्मणञ्चानुजानीहि सीता चान्वेतु मां वनम् ।
कारणैर्बहुभिस्तथ्यैर्वार्य्यमाणौ न चेच्छतः ॥
अनुजानीहि नः सर्व्वान् शोकमुत्सृज्य मानद ।
लक्ष्मणं माञ्च सीताञ्च प्रजापतिरिवात्मजान् ॥
प्रतीक्षमाणमव्यग्रमनुज्ञां जगतीपतेः ।
उवाच राजा संप्रेक्ष्य वनवासाय राघवम् ॥
अहं राघव कैकेय्या वरदानेन मोहितः ।
अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् ।

एवमुक्तो नृपतिना रामो धर्म्मभृतां वरः ।
प्रत्युवाचाञ्जलिं कृत्वा पितरं वाक्यकोविदः ॥
भव वर्षसहस्रायुः पृथिव्या नृपते पतिः ।
अहं त्वरण्ये वत्स्यामि न मे राज्यस्य काङ्क्षिता ।
नव पञ्च च वर्षाणि वनवासे विहृत्य ते ।
पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप ॥
रुदन्नार्त्तः प्रियं पुत्रं सत्यपाशेन संयतः ।
कैकेय्या नोद्यमानस्तु मिथो राजा तमब्रवीत् ॥

श्रेयसे वृद्धये तात पुनरागमनाय च ।
गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयः ॥
नहि सत्यात्मनस्तात धर्माभिमनसस्तव ।
सन्निवर्तयितुं बुद्धिः शक्यते रघुनन्दन ॥
अद्य त्विदानीं रजनीं पुत्र मा गच्छ सर्वथा ।
एकाहं दर्शनेनापि साधु तावच्चराम्यहम् ॥
मातरं मां च सम्पश्यन् वसेमामद्य शर्वरीम् ।
तर्पितः सर्वकामैस्त्वं श्वः काल्ये साधयिष्यसि ॥
दुष्करं क्रियते पुत्र सर्वथा राघव प्रिय ।
त्वया हि मत्प्रियार्थन्तु वनमेवमुपाश्रितम् ॥
न चैतन्मे प्रियं पुत्र शपे सत्येन राघव ।
छन्नया चलितस्त्वस्मि स्त्रिया भस्माग्निकल्पया ।
वञ्चना या तु मे लब्धा तां त्वं निस्तर्तुमिच्छसि ।
अनया वृत्तसादिन्या कैकेय्याभिप्रणोदितः ॥
न चैतदाश्चर्यतमं यत्त्वं ज्येष्ठः सुतो मम ।
अपानृतकथं पुत्र पितरं कर्त्तुमिच्छसि ॥

अथ रामस्तदा श्रुत्वा पितुरार्त्तस्य भाषितम् ।
लक्ष्मणेन सह भ्राता दीनो वचनमब्रवीत् ॥
प्राप्स्यामि यानद्य गुणान् को मे श्वस्तान् प्रदास्यति
अपक्रमणमेवातः सर्वकामैरहं वृणे ॥

इयं सराष्ट्रा सजना धनधान्यसमाकुला।
मया विसृष्टा वसुधा भरताय प्रदीयताम्॥
यस्तु युद्धे वरो दत्तः कैकेय्यै वरद त्वया।
दीयतां निखिलेनैव सत्यस्त्वं भव पार्थिव॥
अहं निदेशं भवतो यथोक्तमनुपालयन्।
चतुर्दश समा वत्स्ये वने वनचरैः सह।
मा विमर्शो वसुमती भरताय प्रदीयताम्॥
नहि मे कांक्षितं राज्यं न सुखं वा तथा प्रियम्।
यथा निदेशं कर्तुं वै तवैव रघुनन्दन॥
अपगच्छतु ते दुःखं मा भूर्बाष्पपरिप्लुतः।
नहि क्षुभ्यति दुर्धर्षः समुद्रः सरितांपतिः॥
नैवाहं राज्यमिच्छामि न सुखं न च मेदिनीम्।
नैव सर्वानिमान् कामान् न स्वर्गं न च जीवितम्।
त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ।
प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे॥
न च शक्यं मया तात स्थातुं क्षणमपि प्रभो।
स शोकं धारयस्वेमं नहि मेऽस्ति विपर्ययः॥
अर्थितो ह्यस्मि कैकेय्या वनं गच्छेति राघव।
मया चोक्तं व्रजामीति तत् सत्यमनुपालये॥
मा चोत्कण्ठां कृथा देव वने रंस्यामहे वयम्।

प्रशान्तहरिणाकीर्णे नानाशकुनिनादिते ॥
पिता हि दैवतं तात देवतानामपि स्मृतम् ।
तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ॥
चतुर्दशसु वर्षेषु गतेषु नरसत्तम ।
पुनर्द्रक्ष्यसि मां प्राप्तं सन्तापोऽयं विमुच्यताम् ॥
येन संस्तम्भनीयोऽयं सर्वो बाष्पाकुलो जनः ।
स त्वं पुरुषशार्दूल किमर्थं विक्रियां गतः ॥

फलानि मूलानि च भक्षयन् वने
गिरींश्च पश्यन् सरितः सरांसि च ।
वनं प्रविश्यैव विचित्रपादपं
सुखी भविष्यामि तवास्तु निर्वृतिः ॥

एवं स राजा व्यसनाभिपन्न-
स्तापेन दुःखेन च पीड्यमानः ।
आलिङ्ग्य पुत्रं परिनष्टसंज्ञो
भूमिं गतो नैव विवेद किञ्चित् ॥

देव्यः समस्ता रुरुदुः समेता-
स्तां वर्जयित्वा नरदेवपत्नीम् ।
रुदन् सुमन्त्रोऽपि जगाम मूर्च्छां
हाहाकृतं तत्र बभूव सर्वम् ॥४=

४५

मातापितरावामन्त्र्याभिवाद्य च सीतया लक्ष्मणेन च सह रामस्य वनप्रस्थानम् ।

अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः ।
उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् ॥
तञ्चापि समनुज्ञाप्य धर्मज्ञः सह सीतया ।
राघवः शोकसंमूढो जननीमभ्यवादयत् ॥
अन्वक्षं लक्ष्मणो भ्रातुः कौशल्यामभ्यवादयत् ।
अथ मातुः सुमित्राया जग्राह चरणौ पुनः ॥
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ।
हितकामा महाबाहुं मूर्ध्न्युपाघ्राय लक्ष्मणम् ॥
सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने ।
रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ॥
व्यसनी वा समृद्धो वा गतिरेष तवानघ ।
एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ।
इदं हि वृत्तमुचितं कुलस्यास्य सनातनम् ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥
लक्ष्मणं त्वेवमुक्त्वासौ कौशल्यानन्दवर्द्धनम् ।
सुमित्रा गच्छ गच्छेति पुनः पुनरुवाच तम् ॥

ततः सुमन्त्रः काकुत्स्थं प्राञ्जलिर्वाक्यमब्रवीत् ।
विनीतो विनयज्ञश्च मातलिर्वासवं यथा ॥
रथमारोह भद्रं ते राजपुत्र महायशः ।
क्षिप्रं त्वां प्रापयिष्यामि यत्र मां राम वक्ष्यसे ॥
तं रथं सूर्यसङ्काशं सीता हृष्टेन चेतसा ।
आरुरोह वरारोहा कृत्वालङ्कारमात्मनः ॥
अथ ज्वलनसङ्काशं चामीकरविभूषितम् ।
तमारुरुहतुस्तूर्णं भ्रातरौ रामलक्ष्मणौ ॥
सीतातृतीयावारूढौ दृष्ट्वा रथमचोदयत् ।
सुमन्त्रः संमतानश्वान् वायुवेगसमान् जवे ॥

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ ।
आर्त्तशब्दो हि संजज्ञे स्त्रीणामन्तःपुरे महान् ॥
अनाथस्य जनस्यास्य दुर्बलस्य तपस्विनः ।
यो गतिः शरणञ्चासीत् स नाथः क्व नु गच्छति ॥
न क्रुध्यत्यभिशप्तोऽपि क्रोधनीयानि वर्जयन् ।
क्रुद्धान् प्रसादयन् सर्वान् समदुःखः क्व गच्छति ॥
कौशल्यायां महातेजा यथा मातरि वर्त्तते ।
तथा यो वर्त्ततेऽस्मासु स महात्मा क्व गच्छति ॥
कैकेय्या क्लिश्यमानेन राज्ञा संचोदितो वनम् ।
परित्राता समस्तस्य जगतः क्व नु गच्छति ॥

इति सर्व्वा महिष्यस्ता विवत्सा इव धेनवः ।
रुरुदुश्चैव दुःखार्त्ताः सस्वरञ्च चिरश्रमाः ॥
अत्यजन् कवलान् नागा गावो वत्सान् न पाययन्
पुत्रं प्रथमजं दृष्ट्वा जननी नाभ्यनन्दत ॥
दिशः पर्य्याकुलाः सर्व्वास्तिमिरेणेव संवृताः ।
न वाति पवनः शीतो न शशी सौम्यदर्शनः ।
न सूर्य्यस्तपते लोकं सर्व्वं पर्य्याकुलं जगत् ॥
अकस्मात् आगतः सर्व्वो जनो दैन्यमुपागमत् ।
आहारे वा विहारे वा न कश्चिदकरोन्मनः ॥
वाष्पपर्य्याकुलमुखो राजमार्गगतो जनः ।
न हृष्टो लक्ष्यते कश्चित् सर्व्वः शोकपरायणः ॥

मातामहावासात् प्रत्यागतस्य भरतस्य पितुरालये
पितरमपश्यतो मातुरालयप्रवेशः ।

अपश्यंस्तु ततस्तत्र पितरं पितुरालये ।
जगाम भरतो द्रष्टुं मातरं मातुरालये ॥
अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतम् ।
उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमासनम् ॥
स प्रविश्यैव धर्म्मात्मा स्वं गृहं श्रीविवर्ज्जितम् ।
भरतः प्रतिजग्राह जनन्याश्चरणौ शुभौ ॥

तं मूर्ध्नि समुपाघ्राय परिष्वज्य यशस्विनम् ।
अङ्के भरतमारोप्य प्रष्टुं समुपचक्रमे ॥
अद्य ते कतिचिद्रात्र्यश्च्युतस्यार्य्यकवेश्मनः ।
अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥
आर्य्यकस्ते सुकुशली युधाजिन्मातुलस्तव ।
प्रवासाच्च सुखं पुत्र सर्व्वं मे वक्तुमर्हसि ॥
एवं पृष्टस्तु कैकेय्या प्रियं पार्थिवनन्दनः ।
आचष्ट भरतः सर्व्वं मात्रे राजीवलोचनः ॥
अद्य मे सप्तमी रात्रिश्च्युतस्यार्य्यकवेश्मनः ।
अम्बायाः कुशली तातो युधाजिन्मातुलश्च मे ॥
राजवाक्यहरैर्दूतैस्त्वर्य्यमाणोऽहमागतः ।
यदहं प्रष्टुमिच्छामि तदम्बा वक्तुमर्हति ॥
शून्योऽयं शयनीयस्ते पर्य्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे ॥
राजा भवति भूयिष्ठमिहाम्बाया निवेशने ।
तमहं नाद्य पश्यामि द्रष्टुमिच्छन्निहागतः ॥
तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
अजानन्तमजानन्ती राज्यलोभेन मोहिता ॥
या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥

तच्छ्रुत्वा भरतो वाक्यं धर्म्माभिजनवान् शुचि।
पपात सहसा भूमौ पितृशोकबलार्द्दितः॥
हा हतोऽस्मीति कृपणं दीनां वाचमुदीरयन्।
निपपात महाबाहुर्बाहू विक्षिप्य वीर्य्यवान्॥
तमार्त्तं देवसङ्काशं समीक्ष्य पतितं भुवि।
निकृत्तमिव शालस्य स्कन्धं परशुना वने।
माता मातङ्गसङ्काशं चन्द्रार्कसदृशं सुतम्।
उत्थापयित्वा शोकार्त्तं वचनञ्चेदमब्रवीत्॥
उत्तिष्ठोत्तिष्ठ किं शेषे राजपुत्र महायशः।
त्वद्विधा नहि शोचन्ति सन्तः सदसि सम्मताः॥

स रुदित्वा चिरं कालं भूमौ परिविवृत्य च।
जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः॥
अभिषेक्ष्यति रामं नु राजा यज्ञं नु यक्ष्यते।
इत्यहं कृतसङ्कल्पो हृष्टो यात्रामयासिषम्॥
तदिदं ह्यन्यथाभूतं व्यवदीर्णं मनो मम।
पितरं यो न पश्यामि नित्यं प्रियहिते रतम्॥
अम्ब केनात्यगाद्राजा व्याधिना मय्यनागते।
धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम्॥
न नूनं मां महाराजः प्राप्तं जानाति कीर्त्तिमान्।
उपजिघ्रेद्धि मां मूर्ध्नि तातः सन्नम्य सत्वरम्॥

क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ।
यो हि मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥
यो मे भ्राता पिता बन्धुर्यस्य दासोऽस्मि सम्मतः ।
तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥
पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः ।
तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम ॥
आर्ये किमब्रवीद्राजा पिता मे सत्यविक्रमः ।
पश्चिमं साधु सन्देशमिच्छामि श्रोतुमात्मनः ॥

इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ।
रामेति राजा विलपन् हा सीते लक्ष्मणेति च ।
स महात्मा परं लोकं गतो गतिमतां वरः ॥
इति मां पश्चिमां वाचं व्याजहार पिता तव ।
कालधर्मपरिक्षिप्तः पाशैरिव महागजः ॥
सिद्धार्थास्तु नरा राममागतं सह सीतया ।
लक्ष्मणञ्च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥
तच्छ्रुत्वा विषसादैवं द्वितीयाप्रियशंसनात् ।
विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥
क्व चेदानीं स धर्मात्मा कौशल्यानन्दवर्द्धनः ।
लक्ष्मणेन सह भ्रात्रा सीतया च समागतः ॥
तथा पृष्टा यथान्यायमाख्यातुमुपचक्रमे ।

मातास्य युगपद्वाक्यं विप्रियं प्रियशङ्कया ॥
स हि राजसुतः पुत्र चीरवासा महावनम् ।
दण्डकान् सह वैदेह्या लक्ष्मणानुचरो गतः ॥
तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया ।
स्वस्य वंशस्य माहात्म्यात् प्रष्टुं समुपचक्रमे ॥
कच्चिन्न वै परधनं हृतं रामेण कर्हिचित् ।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥
कच्चिन्न परदारान् वा राजपुत्रोऽभिमन्यते ।
कस्मात् स दण्डकारण्ये भ्रूणहेव विवासितः ॥
एवमुक्ता तु कैकेयी भरतेन महात्मना ।
उवाच वचनं हृष्टा वृथापण्डितमानिनी ॥
न वा परधनं किञ्चित् हृतं रामेण कर्हिचित् ।
कश्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥
न रामः परदारांश्च चक्षुर्भ्यामपि पश्यति ॥
मया तु पुत्र श्रुत्वैव रामस्येहाभिषेचनम् ।
याचितस्ते पिता राज्यं रामस्य च विवासनम् ॥
स स्ववृत्तिं समास्थाय पिता ते तत्तथाकरोत् ।
रामस्तु सहसौमित्रिः प्रेषितः सह सीतया ॥
तमपश्यन् प्रियं पुत्रं महीपालो महायशाः ।
पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान् ॥

त्वया त्विदानीं धर्म्मज्ञ राजत्वमवलम्ब्यताम् ।
त्वत्कृते हि मया सर्व्वमिदमेवंविधं कृतम् ॥
मा शोकं मा च सन्तापं धैर्य्यमाश्रय पुत्रक ।
त्वदधीना हि नगरी राज्यं चैतदनामयम् ॥

श्रुत्वा तु स पितुर्नाशं भ्रातरौ च विवासितौ ।
भरतो दुःखसन्तप्त इदं वचनमब्रवीत् ॥
किन्नु कार्य्यं हतस्येह मम राज्येन शोचतः ।
विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥
दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः ।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम् ।
कुलस्य त्वमभावाय कालरात्रिरिवागता ॥
त्वां प्राप्य हि पिता मेऽद्य सत्यसन्धो महायशाः
तीव्रदुःखाभिसन्तप्तो वृत्तो दशरथो नृपः ॥
विनाशितो महाराजः पिता मे धर्म्मवत्सलः ।
कस्मात् प्रव्राजितो रामः कस्मादेव वनं गतः ॥
न त्वार्य्योऽपि च धर्म्मात्मा त्वयि वृत्तिमनुत्तमाम्
वर्त्तते गुरुवृत्तिज्ञो यथा मातरि वर्त्तते ॥
तथा ज्येष्ठा हि मे माता कौशल्या दीर्घदर्शिनी
त्वयि धर्म्मं समास्थाय भगिन्यामिव वर्त्तते ॥
तस्याः पुत्रं कृतात्मानं चीरवल्कलवाससम् ।

अपापदर्शिनं शूरं कृतात्मानं यशस्विनम् ।
प्रव्राज्य वनवासाय कथं पापे न शोचसि ॥
अहं हि पुरुषव्याघ्रावपश्यन् रामलक्ष्मणौ ।
केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे ॥
अथापि मे भवेच्छक्तिर्योगैर्बुद्धिबलेन वा ।
सकामां न करिष्यामि त्वामहं पुत्रगर्द्धिनीम् ॥
न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम् ।
यदि रामस्य नापेक्षा त्वयि स्यान्मातृवत् सदा ॥
उत्पन्ना तु कथं बुद्धिस्तवेयं पापदर्शिनी ।
साधुचारित्रविभ्रष्टे पूर्वेषां नो विगर्हिता ॥
अस्मिन् कुले हि सर्वेषां ज्येष्ठो राज्येऽभिषिच्यते ।
अपरे भ्रातरस्तस्मिन् प्रवर्त्तन्ते समाहिताः ॥
नहि मन्ये नृशंसे त्वं राजधर्ममवेक्षसे ।
गतिं वा न विजानासि राजवृत्तस्य शाश्वतीम् ॥
न तु कामं करिष्यामि तवाहं पापनिश्चये ।
यया व्यसनमारब्धं जीवितान्तकरं मम ॥
एष त्विदानीमेवाहमप्रियार्थं तवानघे ।
निवर्त्तयिष्यामि वनाद्भ्रातरं स्वजनप्रियम् ॥
निवर्त्तयित्वा रामञ्च तस्याहं दीप्ततेजसः ।
दासभूतो भविष्यामि सुस्थिरेणान्तरात्मना ॥

इत्येवमुक्त्वा भरतो महात्मा
प्रियेतरैर्वाक्यगणैस्तुदंस्ताम् ।
शोकार्दितश्चापि ननाद भूयः
सिंहो यथा मन्दरकन्दरस्थः ॥

तां तथा गर्हयित्वा तु मातरं भरतस्तदा ।
रोषेण महताविष्टः पुनरेवाब्रवीद्वचः ॥
राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि ।
परित्यक्तासि धर्मेण मा मृते रुदती भव ॥
किन्नु तेऽदूषयद्रामो राजा वा भृशधार्मिकः ।
ययोर्मृत्युर्विवासश्च त्वत्कृते सममागतौ ॥
कैकेयि नरकं गच्छ मा च तातसलोकताम् ।
यत्त्वया हीदृशं पापं कृतं घोरेण कर्मणा ॥
त्वत्कृते मे पिता हतो रामश्चारण्यमाश्रितः ।
अयशो जीवलोके च त्वयाहं प्रतिपादितः ॥
मातृरूपे ममामित्रे नृशंसे राज्यकामुके ।
न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥
कौसल्या च सुमित्रा च याश्चान्या मम मातरः ।
दुःखेन महताविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥
न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः ।
राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥

यत्त्वया धार्म्मिको रामो नित्यं सत्यपरायणः ।
वनं प्रस्थापितो वीरः पितापि त्रिदिवं गतः ॥
एकपुत्रा च साध्वी च विवत्सा यत्त्वया कृता ।
तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥
आनाय्य च महाबाहुं कोशलेन्द्रं महाबलम् ।
स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥
न ह्यहं पापसङ्कल्पे पापे पापं त्वया कृतम् ।
शक्तो धारयितुं पौरैरश्रुकण्ठैर्निरीक्षितः ॥
सा त्वमग्निं प्रविश वा स्वयं वा विश दण्डकान् ।
रज्जुं बधान वा कण्ठे नहि तेऽन्यत् परायणम् ॥
अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे ।
कृतकृत्यो भविष्यामि विप्रवासितकल्मषः ॥
इति नाग इवारण्ये तोमराङ्कुशतोदितः ।
पपात भुवि संक्रुद्धो निःश्वसन्निव पन्नगः ॥
अथ तत्राययौ भ्रातुस्तत् श्रुत्वा लक्ष्मणानुजः ।
स तमुत्थापयामास शत्रुघ्नो भरतं तदा ॥
श्रुत्वा प्रव्राजितं रामं कुब्जाभेदितया तया ।
कैकेय्या दुःखशोकार्त्तः शत्रुघ्नोऽथाब्रवीदिदम् ॥
विद्वानार्य्योऽनवद्यश्च सर्व्वभूतहिते रतः ।
स्त्रिया नाम वनं रामः कथं प्रव्राजितोऽवशः ॥

बलवीर्यास्त्रसम्पन्नो लक्ष्मणो लक्ष्मिवर्द्धनः ।
किं नाभिषिक्तवान् रामं कृत्वापि पितृनिग्रहम् ॥

इत्येवं भाषमाणेऽथ शत्रुघ्ने लक्ष्मणानुजे ।
प्राग्द्वारेऽभूत्तदा कुब्जा शुभ्राभरणभूषिता ।
चन्दनागुरुदिग्धाङ्गी महार्हाम्बरसंवृता ॥
समीक्ष्य तां ततो द्वाःस्थो भृशं पापस्य कारिणीम् ।
गृहीत्वा त्वरितं कुब्जां शत्रुघ्नाय न्यवेदयत् ॥
यस्याः कृते गतो रामो न्यस्तदेहः पिता च ते ।
सेयं पापा नृशंसा च कुरुष्वास्या यथामति ॥
तामभ्यासगतां दृष्ट्वा शत्रुघ्नो मन्थरां तदा ।
चकर्ष विनिहत्योर्व्यां गलेकृत्य रुषान्वितः ॥
क्रोशन्त्यावदनं तस्याः पूरयामास पांशुना ।
अन्तःपुरचरान् सर्व्वान् प्रत्युवाच रुषान्वितः ।
यन्मूलन्तु महद्दुःखं भ्रातॄणां मे तथा पितुः ।
तामिमां मन्थरां क्रुद्धो नेष्यामि यमसादनम् ॥
शत्रुघ्नेनैवमुक्ता तु सखीजनसमावृता ।
गृहीतोरःस्थले कुब्जा सर्व्वं गृहमनादयत् ॥
ततश्च भृशसन्तप्तास्तस्याः सर्व्वसखीजनः ।
क्रुद्धमाज्ञाय शत्रुघ्नं न्यवारयत सर्व्वशः ॥
आमन्त्रयत कैकेयीं कुब्जापरिजनस्तदा ।

यथायमभिसंक्रुद्धो निःशेषान् नः करिष्यति ॥
सानुक्रोशां भरतस्याद्य दीनानाथबान्धवाम् ।
कौशल्यां शरणं यामः सा हि नोऽद्य परायणम् ॥
स चापि रोषताम्राक्षः शत्रुघ्नः शत्रुतापनः ।
विचकर्ष भृशं कुब्जां क्रोशन्तीं पृथिवीतले ॥
तामाकृष्य च शत्रुघ्नः कैकेयीसन्निधौ तदा ।
कैकेयीमभिनिर्द्दिश्य प्रोवाच परुषं वचः ॥
ययासत्याशुभं कर्म्म कुलक्षयकरं कृतम् ।
असत्कर्त्री साद्य कैकेयी कथं त्वां मोक्षयिष्यति ॥
मूलं नस्त्वमनर्थस्य कुलक्षयकरस्य च ।
तस्मात् कुब्जेऽहमद्य त्वां नयामि यमसादनम् ॥
इत्युक्त्वा भृशसंक्रुद्धः शत्रुघ्नो लक्ष्मणानुजः ।
विचकर्ष बलात् कुब्जां निष्टनन्तीं महीतले ॥
तस्यैवं परुषैर्वाक्यैः कैकेयी तेन तर्ज्जिता ।
शत्रुघ्नभयसंविग्ना पुत्रं शरणमभ्यगात् ॥
तं प्रेक्ष्य भरतः क्रुद्धं शत्रुघ्नं वाक्यमब्रवीत् ।
अवध्या सर्व्वभूतानां प्रमदा क्षम्यतां त्वया ॥
हन्यामहमिमां पापां कैकेयीं स्वयमेव हि ।
यदि रामो न धर्म्मात्मा त्यजेन्मां मातृघातिनम् ॥
रोषं संयच्छ धर्म्मज्ञ हतैवेयं कुकर्म्मणा ।

यदैवेयं परप्रेष्या कुब्जा स्त्री च विशेषतः ॥
इमामपि हतां कुब्जां यदि जानाति राघवः ।
त्वाञ्च माञ्चैव धर्म्मात्मा नाभिसम्भाषयिष्यति ॥
इति तद्वचनं श्रुत्वा शत्रुघ्नो भरतेरितम् ।
संयच्छन्नात्मनो रोषं तां मुमोच च मन्थराम् ॥
सा क्षिप्ता सहसोत्थाय मन्थरा भयविह्वला ।
कैकेयीमभिगम्यार्त्ता ययाचे शरणं तदा ॥
सा पादमूले कैकेय्या मन्थरा निपपात ह ।
विनिश्वसन्ती दुःखार्त्ता करुणं विललाप च ॥

गर्हयन्नेव जननीं दुःखशोकाकुलेन्द्रियः ।
भरतोऽवेक्ष्य शत्रुघ्नमिदं वचनमब्रवीत् ॥
पुत्रशोकपरिद्यूनां भर्त्तृश्मशानकर्षिताम् ।
कौशल्यामेव सहितो मया पश्याद्य दुःखिताम् ।
माता मम च शत्रुघ्न कैकेयी भर्त्तृघातिनी ।
इदं कृतवती पापं सर्व्वलोकविगर्हितम् ॥
इदन्तु मे महद्दुःखं शत्रुघ्न हृदि वर्त्तते ।
किं नु वक्ष्यामि कौशल्यामतिमात्रं विलज्जितः ॥
इत्युक्त्वा भरतो वाक्यं शत्रुघ्नसहितस्तदा ।
रुरोदार्त्तस्वनेनोच्चैः पूरयन्निव तद्गृहम् ॥
तस्य श्रुत्वार्त्तनादं तं भरतस्य महात्मनः ।

रुदतस्तत्र कौशल्या सुमित्रामिदमब्रवीत् ॥
आगतः क्रूरकर्म्मायाः कैकेय्या भरतः सुतः ।
तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम् ॥
एवमुक्ता सुमित्रां तां विवर्णवदना कृशा ।
प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥
स तु राजात्मजश्चापि शत्रुघ्नसहितस्तदा ।
प्रतस्थे भरतो यत्र कौशल्याया निवेशनम् ॥

ततः शत्रुघ्नभरतौ कौशल्यां प्रेक्ष्य दुःखितौ ।
पर्य्यष्वजेतां दुःखार्त्तां पतितां नष्टचेतनाम् ॥
रुदन्तौ रुदती दुःखात् समेत्यार्य्यां मनस्विनी ।
भरतं प्रत्युवाचेदं कौशल्या भृशदुःखिता ॥
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम् ।
सम्प्राप्तं वत कैकेय्याः शीघ्रं क्रूरेण कर्म्मणा ॥
प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम् ।
कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिनी ॥
क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति ।
दीर्घबाहुः स यत्रास्ते सुतो मे सुमहायशाः ।
अथवा स्वयमेवाहं सुमित्रानुचरी सुखम् ।
अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः ॥
कामं वा स्वयमेवाद्य तत्र मां नेतुमर्हसि ।

स तपस्तप्यते यत्र पुत्र हे पितुराज्ञया ॥
इदं हि तव विस्तीर्णं धनधान्यसमाचितम् ।
हस्त्यश्वरथसम्पूर्णं राज्यं भोगाय वर्त्तताम् ॥
एवं विलपमानां तां प्राञ्जलिर्भरतस्तदा ।
कौशल्यां प्रत्युवाचेदं शोकैर्बहुभिरावृताम् ॥
आर्य्ये कस्मादजानन्तं गर्हसे मामकिल्बिषम् ।
विपुलाञ्च मम प्रीतिं स्थिरां जानासि राघवे ॥
कृता शास्त्रानुगा बुद्धिर्मा भूत्तस्य कदाचन ।
सत्यसन्धः सतां श्रेष्ठो यस्यार्य्योऽनुमते गतः ॥
कारयेत् यो महत् कर्म्म भर्त्ता भृत्यमवेतनम् ।
अधर्म्मो योऽस्य सोऽस्यास्तु यस्यार्य्योऽनुमते गतः
परिपालयमानाय राज्ञे भूतानि पुत्रवत् ।
तस्मात्तु द्रुह्यतां पापं यस्यार्य्योऽनुमते गतः ॥
बलिषड्भागमुद्धृत्य नृपस्यारक्षितुः प्रजाः ।
अधर्म्मो यस्तु सोऽस्यास्तु यस्यार्य्योऽनुमते गतः ॥
उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता ।
स नाशयतु दुष्टात्मा यस्यार्य्योऽनुमते गतः ॥
अल्पतां पक्षमाश्रित्य सत्ये विवादमानयोः ।
पापं स समवाप्नोतु यस्यार्य्योऽनुमते गतः ॥
यदि पापं कृतघ्नस्य यत्पापं तस्करस्य च ।

तत् सर्व्वं समवाप्नोति यस्यार्य्योऽनुमते गतः ॥
पुत्रदारैश्च भृत्यैश्च स्वगृहे परिवारितः ।
स एको मिष्टमश्नातु यस्यार्य्योऽनुमते गतः ॥
राजस्त्रीबालवृद्धानां वधे यत् पापमुच्यते ।
भृत्यत्यागेन यत् पापं तत् पापं प्रतिपद्यताम् ॥
कपालपाणिः पृथिवीमटतां चीरसंवृतः ।
भिक्षमाणो यथोन्मत्तो यस्यार्य्योऽनुमते गतः ॥
मद्ये प्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यशः ।
कामक्रोधाभिभूतस्तु यस्यार्य्योऽनुमते गतः ॥
मास्य धर्म्मे मनो भूयादधर्मं च निषेवताम् ।
अपात्रवर्षी भवतु यस्यार्य्योऽनुमते गतः ॥
संचितान्यस्य वित्तानि विविधानि सहस्रशः ।
दस्युभिर्विप्रलुप्यन्तां यस्यार्य्योऽनुमते गतः ।
यदग्निदायके पापं यत् पापं गुरुनिन्दके ।
मित्रद्रोहे च यत् पापं तत् पापं प्रतिपद्यताम् ॥
सतां लोकात् सतां कीर्त्तेः सज्जुष्टात् कर्मणस्तथा ।
भ्रश्यतु क्षिप्रमद्यैव यस्यार्य्योऽनुमते गतः ॥
अपास्य मातृशुश्रूषामनर्थे सोऽवतिष्ठताम् ।
दीर्घबाहुर्महावक्षा यस्यार्य्योऽनुमते गतः ॥
बहुभृत्यो दरिद्रश्च ज्वरदोषसमन्वितः ।

स यायात् सततं क्लेशं यस्यार्य्योऽनुमते गतः ।
आशामाशंसमानानां दीनानामूर्द्धचक्षुषाम् ।
अर्थिनां वितथां कुर्य्यात् यस्यार्य्योऽनुमते गतः ॥
मायया रमतां नित्यं परुषः पिशुनोऽशुचिः ।
बालवत्सां स गां दोग्धु यस्यार्य्योऽनुमते गतः ॥
धर्म्मदारान् परित्यज्य परदारान् निषेवताम् ।
त्यक्तधर्म्मरतिर्मूढो यस्यार्य्योऽनुमते गतः ॥
पानीयदूषके पापं तथैव विषदायके ।
यत्तदेकः स लभतां यस्यार्य्योऽनुमते गतः ॥
तृषार्त्ते सति पानीये विप्रलम्भेन योजयन् ।
यत् पापं लभते तत् स्यात् यस्यार्य्योऽनुमते गतः

एवमाश्वासयन्नेव दुःखार्त्तो निपपात ह ।
विहीनां पतिपुत्राभ्यां कौशल्यां पार्थिवात्मजः ॥
तदा तं शपथैः कष्टैः शपमानमचेतनम् ।
भरतं शोकसन्तप्तं कौशल्या वाक्यमब्रवीत् ॥
मम दुःखमिदं पुत्र भूयः समुपजायते ।
शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥
दिष्ट्या न चलितो धर्म्मादात्मा ते शुभलक्षण ।
वत्स सत्यप्रतिज्ञो हि सतां लोकमवाप्स्यसि ॥
इत्युक्त्वा चाङ्कमानीय भरतं भ्रातृवत्सलम् ।

परिष्वज्य महाबाहुं रुरोद भृशदुःखिता ।
एवं विलपमानस्य दुःखार्त्तस्य महात्मनः ।
शोकाच्च शोकसम्भाराद्बभूव लुलितं मनः ॥

लालप्यमानस्य विचेतनस्य
प्रनष्टबुद्धेः पतितस्य भूमौ ।
मुहुर्मुहुर्निःश्वसतश्च दीर्घं
सा तस्य शोकेन जगाम रात्रिः ॥

स प्राप्तो व्यसनं घोरं क्षीणवर्णस्वरेन्द्रियः ।
भरतो न रराजार्त्तः शशीव समभिप्लुतः ॥
मरणेन पितुर्दीनो रामप्रव्राजनेन च ।
कैकेय्याश्चाप्यनार्याया धर्मत्यागेन पीड़ितः ॥
उत्क्रामन्त्या जनन्याहं धर्ममार्गान्निषेधितम् ।
अगाधपारे महति पातितः शोकसागरे ॥
यन्निमित्तं मृतो राजा रामश्चापि विवासितः ।
अपापः पापतां नीतो मात्राहं पापदर्शिना ॥
विहीनश्चन्द्रसूर्याभ्यां यथा मेरुर्न शोभते ।
तथा पित्रा च भ्रात्रा च शून्यं पुरमिदं भृशम् ॥
सोऽहं पित्रा सहाग्निं वा वनं रामेण वा सह ।
प्रवेक्ष्यामि विना ताभ्यां नहि जीवितुमुत्सहे ॥
शान्तस्य यदि रामस्य पादौ तौ शुभलक्षणौ ।

सर्वाश्रये वनस्थोऽहं तस्मै राज्यादरं भवेत् ।
शुश्रूषमाणश्चरणौ इते वन्येन जीवनः ।
अहमार्य्यस्य वत्स्यामि तस्यार्य्ययोऽग्रसादरम् ॥
आर्य्यरामस्य पूर्णेन्दुसदृशं चारु लोचनम्
मम शोको मुखं वीक्ष्य न स्यात् पितृवियोगजः ॥
इति श्रुत्वा वचो धन्यं भरतस्य महात्मनः ।
अमात्या बन्धुवर्गाश्च दुःखादश्रूण्यवर्त्तयन् ॥

नतवाक्शिरसं भूमिं चरणाग्रेण राघवम् ।
विलिखन्तमथोवाचेदं वशिष्ठो भगवानृषिः ॥
आपत्स्वसङ्गो धृतिमान् यः सम्यक् प्रतिपद्यते ।
कर्त्तव्यकार्य्याणि तमाहुः पण्डितं बुधाः ॥
स त्वं धैर्य्यमुपाश्रित्य विधूय शोकजं ज्वरम् ।
कर्त्तुमर्हस्यसंमूढ स्नानमन्त्यक्रियां पितुः ॥
पिता ते पुत्रशोकार्त्तो रामे प्रव्राजिते वनम् ।
त्वय्यनागच्छति प्राणानिष्टांस्त्यक्त्वा दिवं गतः ॥
अनाथ इव धर्म्मात्मा लोकनाथः पिता तव ।
निर्ह्रियेत कथं नाम सुतत्रात त्वया विना ॥
इत्यस्माभिर्विचार्य्यैव तैलद्रोण्यां स शायितः ।
तस्य निर्हरणं तात पितुस्तत् कर्त्तुमर्हसि ॥
परिसाधय मा वत्स त्वं मा च शोके मनः कृथाः ।

भवद्भिर्ज्ञातिभिर्यो ये न शोच्या भवद्विधैः ।
पुरुषैरागतज्ञानैस्त्वद्विधैर्ब्रह्मवादिभिः ॥
तस्मात् त्वं स्वस्थमात्मानं मा भूर्भरत शोकिभिः ।
[illegible] काल: शक्यते नातिवर्त्तितुम् ॥
एवमुक्तो वशिष्ठेन भरतो धीमतां वरः ।
वशिष्ठमभिवीक्ष्येदमुवाचार्त्ततरो वचः ॥
भवत्येवं ब्रवीति ते दीप्यतीव मनो मम ।
[illegible] भ्रियते राज्ञे नाथत्वं मयि कीदृशम् ॥
किन्तु तत्र नयध्वं मां यत्र राजा पिता मम ।
कच्चिदेतस्य संस्कारं भवद्भिः सहितोऽधुना ॥
नेदानीं हृदयं मेऽद्य स्फुटिष्यति सहस्रधा ।
[illegible] भवन्तस्तं राजानं हीनजीवितम् ॥
ततो वशिष्ठप्रमुखाः सर्व्वे ते नृपमन्त्रिणः ।
अनयन् भरतं तत्र यत्र राज्ञः कलेवरम् ॥
ततः प्रविश्य भरतः सह राजपरिग्रहैः ।
ददर्श पितरं प्रेतं राममातुर्निवेशने ॥
तं गतासुं पितरं दृष्ट्वोपहतत्विषम् ।
[illegible] राजन्निति विक्रुश्य पपात धरणीतले ॥
[illegible] शोकः संज्ञां लब्ध्वा भूयः सुदुर्म्मनाः ।
[illegible] संप्रेक्ष्य पितरं [illegible]

राजंस्तिष्ठसि किं शेषे भरतोऽहमुपागतः ।
तवाज्ञया महाराज शत्रुघ्नसहितस्त्वरन् ॥
मम मातामहस्तात कुशलं त्वामपृच्छति ।
प्रणम्य शिरसा तद्वद्युधाजिन्मातुलस्तु मे ॥
ततः कुतश्चित् संप्राप्तमङ्कमाधाय मां नृप ।
त्वं हि मूर्द्ध्न्युपाघ्राय प्रतिनन्दसि भूमिप ॥
स इदानीमनुप्राप्तं कस्मात्त्वं नाभिभाषसे ।
नापराध्यामि ते किञ्चिदहं राजन् प्रसीद मे ॥
धन्यः स रामो येनाज्ञा अगा ते व्रजता वनम् ।
लक्ष्मणश्चापि धन्योऽसौ यो राममनुनिर्गतः ॥
अधन्योऽहमपुण्यश्च सर्व्वं मां प्रति सम्भ्रमात् ।
दुःखेन महताविष्टः प्राणान् संत्यक्तवानसि ॥
नूनञ्च तौ न जानीतो मृत्युं ते रामलक्ष्मणौ ।
यथा हि वनमुत्सृज्य नागताविह दुःखितौ ॥
मातृदोषादप्रियस्ते यदि तावदहं नृप ।
शत्रुघ्नमपि तावत्त्वमभिभाषितुमर्हसि ॥
निर्व्वास्य चीरवसनं रामं लक्ष्मणमेव च ।
स्त्रीहेतोः किमसि प्राणांस्त्यक्त्वा राजन् दिवं

एवं विलपतस्तस्य भरतस्य महात्मनः ।
श्रुत्वा नृपविपद्रामा रुरुदुर्भृशदुःखिताः ॥

विलपन्तं तथा तत्र भरतं शोकविह्वलम् ।
वशिष्ठो वदतां श्रेष्ठो जाबालिश्चेदमूचतुः ॥
मा शोच भरत श्लाघ्य नैष शोच्यो महीपतिः ।
आनन्त्यधर्मसंभूतः कथमस्य त्वमर्हसि ॥
नायं शोच्यस्तव पिता स्वकर्मजितलोकभाक् ।
कृती नायं सुता यस्य यूयं रामपुरोगमाः ।
यथात्मानो महात्मानो लोके प्रथितपौरुषाः ॥
एवमुक्तो वशिष्ठेन भरतो धर्मकोविदः ।
त्यक्त्वा शोकमिदं वाक्यमुवाच वदतां वरः ॥
क्रन्दन्ति यद्भवन्तो मां तथा वर्द्धितं मे मतिः ।
वनवासं पितुः स्नेहो स्वयं पोषयतीव माम् ॥
संस्तम्भितो भवद्भिस्तु गुरुभिर्हितवादिभिः ।
त्यक्त्वा शोकं करिष्यामि पितुरौर्द्ध्वदेहिकम् ॥
आनयन्तु यथोद्दिष्टं भवन्तो श्रेयमान्विषः ।
सांस्कारिकं पितुर्मेऽद्य सर्वं सम्भारमुत्तमम् ॥
तस्यां रात्र्यां व्यतीतायां भरतं सूतमागधाः ।
सुप्तं प्रबोधयिष्यन्तस्तुष्टुवुर्मधुरस्वराः ॥
सहसा चाभ्यहन्यन्त दुन्दुभ्यः सुमहास्वनाः ।
प्राध्माप्यन्त सुघोषाश्च शङ्खवेणुगणाः पृथक् ॥
स तूर्य्यघोषः सुमहान् पूरयन्निव तां पुरीम् ।

बोधयामास भरतं शोकव्याकुलमानसम् ॥
प्रतिपद्याथ भरतस्तं प्रबोधकविस्तरम् ।
नाहं राजेति चाप्युक्त्वा ततः शत्रुघ्नमब्रवीत् ॥
पश्य शत्रुघ्न कैकेय्या कुर्व्वन्त्या लोकगर्हितम् ।
अयशः पातितं मूर्ध्नि ममासन्नकलागमः ॥
राजधर्मानुगा राज्ञः पितुर्मे तद्विनाकृता ।
परिभ्रमति राजश्रीर्निष्कर्णा नौरिवाम्भसि ॥
इत्येवं भरतं तत्र विलपन्तं पुनः पुनः ।
दृष्ट्वा प्ररुरुदुः सर्व्वाः शोकार्त्ता नृपयोषितः ॥
भरतेन ततः सार्द्धं वशिष्ठो वेदवित्तमः ।
प्रविवेश तदा राज्ञः सभां मन्त्रयितुं हितम् ॥
तत्रासने रत्नचित्रे स्वर्णास्तरणसंवृते ।
उपविश्य ततः सर्व्वानानयामास मन्त्रिणः ॥
जनौघः सुमहांस्तत्र समुपायात् समन्ततः ।
सभायां भरतं द्रष्टुं शत्रुघ्नसहितं तदा ॥
ततो हलहलाशब्दः सुमहानभवत्तदा ।
कौतूहलाज्जनौघस्य सभां प्रत्यभिधावतः ॥
तत्राथ भरतं दृष्ट्वा सभायां सपुरोहितम् ।
अभ्यनन्दन् प्रकृतयो यथा दशरथं तथा ॥
समागते जने तस्मिन्नुदिते च दिवाकरे ।

वशिष्ठस्तमुवाचेदं भरतं तांश्च मन्त्रिणः ॥
उत्तिष्ठ भरत क्षिप्रं मा भूत् कालात्ययः प्रभो ।
पितुः कुरु यथान्यायं संस्कारं भूमिरक्षिणाम् ॥
सज्जिता शिविका चेयं पितुस्ते रत्नभूषिता ॥
कृत्वैनं शिविकायां तं संवेश्य नराधिपम् ;
शिविकागतमन्त्रिणश्च नयनं बहिरागम् च ॥
एवमुक्तो वशिष्ठेन भरतः प्रत्युवाच तम् ।
वशिष्ठं वदतां श्रेष्ठं पितुर्बन्धुमतं गुरुम् ॥
यदा ज्ञापयसे राज्ञः कर्माणि तदाहृतः ।
दैवतं त्वं च मान्यस्तु गुरोश्चापि गुरुर्मम ॥
भाषितं तेन तस्माय भरतस्य महात्मनः ।
प्रत्युवाच परं हृष्टं वशिष्ठो द्विजसत्तमः ॥
शोकवेगमसह्यं तं धारयन् भरतस्ततः ।
कलेवरं भूमिपतेः स तदा समुद्वहन् ॥
नाशक्नोत् स शोकस्य वेगं धारयितुं तदा ।
महार्णवस्यापततस्तोयवेगमिवोद्धतम् ॥
तदार्त्तिमान् वेपमानस्त्रसत् स विलपन् बहु ।
मन्त्रिभिः सहितः क्षिप्रं शिविकामनयन्नृपम् ॥
शिविकास्थं स राजानमलङ्कृत्य विधानतः ।
वाससा च महार्हेण समाच्छाद्य च संवृतम् ।

अवकीर्य्य च माल्येन दिव्यधूपावधूपितम् ।
गन्धचूर्णैः सुरभिभिः परिकीर्य्य च सर्व्वशः
उवाहोत्क्षिप्य शिविकां शत्रुघ्नसहितस्ततः ।
हा राजन् क्वासि गन्तेति रुदन्नार्त्तः पुनः पुनः
अग्रतः प्रययुस्तेन सत्कर्म्मस्तुतिभिर्दृढम् ।
अभिष्टुवन्तो मधुरं सूतमागधवन्दिनः ॥
तस्मिन् निर्हरणे राज्ञः करुणस्तु महांस्तदा ।
आर्त्तनादोऽभवत् स्त्रीणां यथास्य मरणे तथा
ततः पौरजनः सर्व्वः सस्त्रीवृद्धकुमारकः ।
अनुराजशरीरं तन्निर्य्ययौ नगराद्बहिः ॥
तथा भरतशत्रुघ्नौ शिविकां परिरभ्य तौ ।
शोकदुःखसमाविष्टौ रुदन्तावनुजग्मतुः ॥
कौशल्या च सुमित्रा च कैकेयी च तथापरा ।
रुदत्यः शोचमानाश्च कुरर्य्य इव सङ्घशः ।
अनुजग्मुः शरीरं तद्राज्ञो राजीवलोचनाः ॥
अथास्य सरयूतीरे विविक्ते वसुधातले ।
चन्दनागुरुकाष्ठैस्ते रचयाञ्चक्रुश्चितां तदा ॥
तस्यां चितायां नृपतेः शरीरं तत् सुदुःखिनः
अशाययत् समुत्क्षिप्य शोकव्याकुलचेतनः ॥
चितां प्रज्वालयाञ्चक्रे भरतः सह बन्धुभिः ॥

प्रजज्वाल ततो वह्निः सहसैव समेधितः ।
महार्चिष्मान् दहन् राज्ञश्चिरारूढं कलेवरम् ॥
विधिवत् संस्कृतो राजा ऋत्विग्भिर्वेदपारगैः ।
जगाम परमं स्थानं उत्तमं पुण्यकर्मणाम् ॥
अवकीर्य्य च माल्येन चितां तामपसव्यतः ।
प्रणेमे स पितुः पादौ निपत्य धरणीतले ॥
तमार्त्तरूपं पतितं विलपन्तमचेतनम् ।
उत्थापयामास बलात् परिष्वज्य शत्रुघ्नः ॥
प्रवेक्ष्य स पितुर्देहं सर्वगात्रेषु पावकम् ।
विललापातिकरुणं भरतः परिविह्वलः ॥
यस्याः पतिरनाथायाः पुत्रः समाश्रितस्त्वया ।
रामस्त्वां तात कौशल्या किमर्थं नाभिभाषसे ॥

एवमाद्यतिदुःखार्त्तो विलपन्नेव राघवः ।
विसंज्ञकल्पो न्यपतच्छोचन् पितरमात्मनः ॥
उन्मत्त इव विक्षिप्य विललाप निपत्य सः ।
गुणसंकीर्त्तनं कुर्व्वन् पितुर्वै पितृवत्सलः ॥
सुकुमारश्च बालश्च सततं लालितं त्वया ।
क्व तात भरतं हित्वा विलपन्तं गमिष्यसि ॥
भोज्याभरणपानैस्त्वं वाचोभिश्च पृथग्विधैः ।
संवर्द्धयसि नः सर्व्वानस्मान् कोऽद्य करिष्यति ॥

त्वयि राजन् गते स्वर्गं रामे चारण्यमाश्रिते ।
न जीवितुं व्यवस्यामि प्रवेक्ष्यामि हुताशनम् ॥

एवमादि तयोः श्रुत्वा भ्रात्रोर्विलपितं तदा ।
सर्व्वः परिजनो भूयो भृशमार्त्ततरोऽभवत् ॥
ततः शोकपरिश्रान्तौ शत्रुघ्नभरतावुभौ ।
विलपित्वातिकरुणं धरण्यामेवान्वपद्यताम् ॥
तौ धरण्यामाश्रितौ दृष्ट्वा पितुरिष्टः पुरोहितः ।
वशिष्ठो भरतं वाक्यमुत्थाप्येदमुवाच ह ॥
द्वन्द्वदुःखं धीमन् सर्व्वमभिमतमिदं सदा ।
स्वयमुक्ताविमं भावं न त्वं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥
सुमन्त्रश्चापि शत्रुघ्नमुत्थाप्य धरणीतलात् ।
श्रावयामास तत्त्वज्ञः सर्व्वभूतभवाभवम् ॥
उत्थितौ तौ नरव्याघ्रावश्रुक्लिन्नौ विरेजतुः ।
वर्षातपपरिक्लिन्नौ पृथगिन्द्रध्वजाविव ॥
अश्रूणि परिमार्ज्जन्तौ रक्ताक्षौ दीनभाषिणौ ।
अमात्यास्त्वरयामासुः पितुः प्रति जलक्रियाम् ॥

एवं संस्कारणं कृत्वा भरतः पृथिवीपतेः ।
जलक्रियां पितुर्धीमान् कर्त्तुं समुपचक्रमे ॥

पुण्यां पुण्यजलाकीर्णां महर्षिगणसेविताम् ।
उदकं स पितुर्दातुं सरयूं सरितं ययौ ॥
गाहमानश्च ततः पुण्यां सरयूं सहबान्धवः ।
ददौ पितरमुद्दिश्य भरतः सलिलाञ्जलिम् ॥
स मन्त्रिमातृसंयुक्तः सामात्यः सपुरोहितः ।
[illegible]र्थाभ्यासं राजार्हं दक्षिणेन विधानतः ॥

ततः कृतोदकं सर्वे पौरजानपदा जनाः ।
प्रवेशयामासुः भरतं शोकविह्वलम् ॥
सर्वकर्माण्यनुष्ठाय प्रययौ भरतस्ततः ।
तेनैव सहितः सर्वैरयोध्यामगमत्तदा ॥
दूरादेव स तां दृष्ट्वा दीनामुत्सववर्जिताम् ।
दुःखितोऽसौ भरतः पौरान् वचनमब्रवीत् ॥
गते नरपतौ स्वर्गं रामेऽपि वनमाश्रिते ।
साद्येयं मे निरानन्दा श्मशानसदृशी पुरी ॥
प्रमदा हतवीरेव विचन्द्रेव च शर्वरी ।
विहीना नरदेवेन पुरीयं न विराजते ॥
नेच्छाम्येनामहं द्रष्टुं न प्रवेष्टुं हतत्विषम् ।
इहैव प्रायमासिष्ये पितुर्दर्शनकांक्षया ॥
किं मे पिता विहीनस्य जीवितेन सुखेन वा ।
नेच्छामि जीवितं गाढमनुयास्यामि भूमिपम् ॥

अथ राज्ञो महामात्यो धर्म्मपाल इति श्रु

परिदेवयमानं तं भरतं वाक्यमब्रवीत् ॥

शोचतो मुह्यतश्चैव मोघं ते भरत श्रुतम् ।

कुरु वाक्यं ममैवेदमद्य नृप यथात्मज ।

शोके भरत निमग्नस्त्वं नाप्यर्थं कर्त्तुमर्हसि ।

सर्व्वस्वजननाशेऽपि नहि शोचन्ति पण्डिताः

रुदतः शोचतो वापि यदि भाव पुनर्भृतः ।

सञ्जीवेत् स्वजनः कश्चित्तन्न शोचेत सर्व्वथा ॥

यदा त्ववश्यं गन्तव्यं सर्व्वैरस्माभिरागतैः ।

मृत्युकाले तदा शोके नास्ति सामर्थ्यमण्वपि ॥

एतस्मात् त्वं महाशोकाभिरवोध्यो प्रविश प्रभो ।

स्वजनं शोकसन्तप्तं समाश्वासय सादरम् ।

त्वं ह्यद्य नाथः सर्व्वेषामस्माकं स्वजनस्य च ।

शोचितुं नार्हसे तन् त्वं प्रजानां नायकतां गतः ।

एवमुक्तः स विप्रेण धर्म्मपालेन धार्म्मिकः ।

प्रविवेश निरानन्दमयोध्यां स्वजनैर्वृतः ॥

रामं प्रत्यागन्तुं ससैन्यस्य भरतस्य

वनप्रयाणम् ।

अथ राममरण्यस्थं भरतस्योपयायिनः ।
सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभःस्पृशौ ॥
त्रस्ताः सैन्यसमुत्थेन शब्देन महता गजाः ।
अर्दिता यूथपा मत्ताः सयूथा दुद्रुवुर्दिशः ॥
तांस्तु विप्रद्रुतान् दृष्ट्वा तं च श्रुत्वा महास्वनम् ।
उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम् ॥
हन्त लक्ष्मण पश्येह तुमुलः श्रूयते स्वनः ।
वित्रासिता मृगाः सर्वे सहसा विद्रुता दिशः ॥
राजा वा राजपुत्रो वा मृगयामटते वने ।
सर्वमेतद् यथातत्त्वमचिराज्ज्ञातुमर्हसि ॥

स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् ।
उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम् ॥
स रामाय नरव्याघ्रो लक्ष्मणः परवीरहा ।
शशंस सेनामायान्तीं वचनं चेदमब्रवीत् ॥
अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ।
सज्यं कुरुष्व चापं च शरांश्च कवचं तथा ॥
तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह ।
ब्रूहि लक्ष्मण तत्त्वेन कस्येमां मन्यसे चमूम् ॥

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत्
दिधक्षन्निव कोपेन ज्वलितः पावको यथा ॥
भरतो राज्यकामोऽयं व्यक्तं प्राप्याभिषेचनम्
आवां हन्तुं समभ्येति भरतः कैकयीसुतः ॥
गृहीतधनुषावावां गिरिं वीर श्रयावहे ।
अथ वेहैव तिष्ठाव सन्नद्धावुद्यतायुधौ
अपि द्रक्ष्याव भरतं यत्कृते व्यसनं महत् ।
त्वया राघव सम्प्राप्तं सीतया च मया तथा ।
यन्निमित्तं भवान् राज्यात् च्युतो राघव शाश्वतात्
सम्प्राप्तोऽयमरिर्वीर भरतो वध्य एव हि ॥
भरतस्य वधे दोषं नाहं पश्यामि राघव ।
पूर्वापकारिणं हत्वा न ह्यधर्मेण युज्यते ॥
पूर्वापकारी भरतस्त्यागेऽधर्मश्च राघव ।
एतस्मिन् निहते कृत्स्नामनुशाधि वसुन्धराम्
अद्य पुत्रं हतं संख्ये कैकेयी राज्यकामुका ।
मया पश्येत् सुदुःखार्त्ता हस्तिभिन्नमिव द्रुमम्
कैकेयीञ्च वधिष्यामि सानुबन्धां सबान्धवाम् ।
कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥
अद्याहं राघवश्रेष्ठ क्रोधं मे चिरसंयतम् ।
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥

अद्यैव चित्रकूटस्य काननं निशितैः शरैः ।
छिन्दन् शरसहस्रैस्तं करिष्ये शोणितोक्षितम् ॥
शरैर्निर्भिन्नहृदयान् कुञ्जरांस्तुरगांस्तथा ।
श्वापदाः परिकर्षन्तु नरांश्च निहतान् मया ॥
शराणां धनुषश्चाहमनृणोऽस्मि महावने ।
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥

असंक्रुद्धोऽथ सौमित्रिं लक्ष्मणं क्रोधमूर्छितम्
रामस्तु शमयामास वचनञ्चेदमब्रवीत् ॥
नाप्रियं स्वयमत्रापि भरतेन कृतं न किम् ।
भयं वा भरतात् किञ्चित् येन तं हन्तुमिच्छसि ॥
किमत्र धनुषा कार्यमसिना वा सचर्मणा ।
महाबले महोत्साहे भरते स्वयमागते ॥
पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमाहवे ।
किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥
यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।
नाहं तत् प्रतिगृह्णीयां भक्ष्यान् विषकृतानिव ॥
धर्ममर्थञ्च कामञ्च पृथिवीञ्चापि लक्ष्मण ।
इच्छामि भवतामर्थे एतत् प्रतिशृणोमि ते ॥
नेयं मम मही सौम्य दुर्लभा सागराम्बरा ।
न हीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ॥

यद्विना भरतं त्वाञ्च शत्रुघ्नञ्चापि मानद ।
भवेन्मम सुखं किञ्चिद्भस्म तत् कुरुतां शिखी ॥
मन्येऽहमागतोऽयोध्यां भरतो भ्रातृवत्सलः ।
मम प्राणैः प्रियतरः कुलधर्ममनुस्मरन् ॥
श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् ।
जानक्या सहितं वीर त्वया च पुरुषोत्तम ॥
स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः ।
द्रष्टुमभ्यागतो ह्येष भरतो नात्र संशयः ॥
नहि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः ।
अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥
कथं नु पुत्राः पितरं हन्युः कस्याञ्चिदापदि ।
भ्राता वा भ्रातरं हन्यात् सौमित्रे प्राणमात्मनः
यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥
उच्यमानो हि भरतो मया लक्ष्मण तद्वचः ।
राज्यमस्मै प्रयच्छेति वाढमित्येव मंस्यते ॥
तथोक्तो धर्म्मशीलेन भ्राता तस्य हिते रत
लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥
तद्वाक्यं लक्ष्मणः श्रुत्वा व्रीडितः प्रत्युवाच ह ।
त्वां मन्ये द्रष्टुमायातः पिता दशरथः स्वयम् ॥

व्रीडितं लक्ष्मणं दृष्ट्वा राघवः प्रत्युवाच ह ।
एष मन्ये महाबाहुरिहास्मान् द्रष्टुमागतः ॥
अथवा नौ ध्रुवं मन्ये मन्यमानः सुखोचितौ ।
वनवासमनुध्याय गृहाय प्रतिनेष्यति ॥
इमां वाप्येष वैदेहीमत्यन्तसुखसेविनीम् ।
पिता मे राघवः श्रीमान् वनादादाय यास्यति ॥
एतौ तौ सम्प्रकाशेते गोत्रवन्तौ मनोरमौ ।
वायुवेगसमौ वीरौ जवनौ तुरगोत्तमौ ॥
स एष सुमहाकायः कम्पते वाहिनीमुखे ।
नागः शत्रुञ्जयो नाम वृद्धस्तातस्य धीमतः ॥
न तु पश्यामि तच्छत्रं पाण्डुरं लोकविश्रुतम् ।
पितुर्दिव्यं महाभाग संशयो भवतीह मे ॥
वृक्षाग्रादवरोह त्वं कुरु लक्ष्मण मद्वचः ।
इतीव रामो धर्मात्मा सौमित्रिं तमुवाच ह ॥
अवतीर्य्य तु सालाग्रात्तस्मात् स समितिञ्जयः ।
लक्ष्मणः प्राञ्जलिर्भूत्वा तस्थौ रामस्य पार्श्वतः ॥
भरतेनाथ सन्दिष्टा सम्मर्दो न भवेदिति ।
समन्तात्तस्य शैलस्य सेना वासमकल्पयत् ॥
अध्यर्द्धमिक्ष्वाकुचमूर्योजनं पर्व्वतस्य ह ।
पार्श्वे न्यविशदावृत्य गजवाजिनराकुला ॥

निविष्टायां तु सेनायां यथोद्देशं विनीतवत्।
भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत्॥
क्षिप्रं वनमिदं सौम्य नरसङ्घैः समन्ततः।
लुब्धैश्च सहितैरेभिस्त्वमन्वेषितुमर्हसि॥
गुहो ज्ञातिसहस्रेण शरचापासिपाणिना।
समन्वेषतु काकुत्स्थावस्मिन् परिवृतः स्वयम्॥
यावन्न रामं द्रक्ष्यामि लक्ष्मणं वा महाबलम्।
वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति॥
यावन्न चन्द्रसङ्काशं तद्द्रक्ष्यामि शुभाननम्।
भ्रातुः पद्मविशालाक्षं न मे शान्तिर्भविष्यति॥
यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ।
शिरसा प्रग्रहीष्यामि न मे शान्तिर्भविष्यति॥
यावन्न राज्ये राज्यार्हः पितृपैतामहे स्थितः
अभिषिक्तो महाबाहुर्न मे शान्तिर्भविष्यति॥
कृतकृत्या महाभागा वैदेही जनकात्मजा।
भर्त्तारं सागरान्तायाः पृथिव्या यानुगच्छति
शुभगश्चित्रकूटोऽसौ गिरिराजसमो गिरिः।
यस्मिन् वसति काकुत्स्थः कुबेर इव नन्दने॥
कृतकार्य्यमिदं दुर्गं वनं व्यालनिषेवितम्।
यदध्यास्ते महाराजो रामः शस्त्रभृतां वरः॥

एवमुक्त्वा महाबाहुर्भरतः पुरुषर्षभः ।
पद्भ्यामेव महातेजाः प्रविवेश महद्वनम् ॥
स गिरेश्चित्रकूटस्य शालमारुह्य सत्वरम् ।
रामाश्रमगतस्याग्नेर्ददर्श ध्वजमुच्छ्रितम् ॥
तद्दृष्ट्वा भरतः श्रीमान् मुमोद सहबान्धवः ।
अत्र राम इति ज्ञात्वा गतः पारमिवाब्धेः ॥
ऋषिं वसिष्ठं सन्दिश्य मातॄर्मे शीघ्रमानय ।
इति त्वरितमग्रे स जगाम गुरुवत्सलः ॥
गच्छन्नेवाथ भरतस्तापसालयसंस्थिताम् ।
भ्रातुः पर्णकुटीं श्रीमानुटजञ्च ददर्श ह ॥
शालायास्त्वग्रतस्तस्या ददर्श भरतस्तदा ।
काष्ठानि चावभग्नानि पुष्पाण्यवचितानि च ॥
ददर्श भवने तस्मिन् महतः सञ्चयान् कृतान् ।
मृगाणां महिषाणाञ्च करीषैः शीतकारणात् ॥
गच्छन्नेव महाबाहुर्द्युतिमान् भरतस्तदा ।
शत्रुघ्नमब्रवीत् हृष्टस्तानमात्यांश्च सर्वशः ॥
मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ।
नातिदूरे हि मन्येऽहं नदीं मन्दाकिनीमितः ॥
[illegible]दश्वोदात्तदन्तानां कुञ्जराणां तरस्विनाम् ।
शैलपार्श्वे परिक्रान्तमन्योन्यमभिगर्जताम् ॥

यत्सेवाधातुमिच्छन्ति तापसाः सततं वने ।
तस्यासौ दृश्यते धूमः सङ्कुलः कृष्णवर्त्मनः ॥
अद्याहं पुरुषव्याघ्रं पितुर्निर्देशकारिणम् ।
आर्य्यं द्रक्ष्यामि काकुत्स्थं महर्षिसमदर्शनम् ॥

अथ गत्वा मुहूर्त्तन्तु चित्रकूटं स राघवः
मन्दाकिनीमनुप्राप्तस्तं जनञ्चेदमब्रवीत् ॥
मत्कृते व्यसनं प्राप्तो लोकनाथो महाद्युतिः ।
सर्व्वान् कामान् परित्यज्य वने वसति राघवः ॥
इति लोकवरिष्ठस्य पादयोः संप्रसादयन् ।
रामस्य निपतिष्यामि सीतायास्तु पुनः पुनः ॥
एवं स विलपंस्तस्मिन् वने दशरथात्मजः ।
ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् ॥
प्रागुदक्प्रवणां वेदीं विशालां दीप्तपावकाम् ।
ददर्श भरतस्तत्र पुण्यां रामनिवेशने ॥

निरीक्ष्य स मुहूर्त्तन्तु ददर्श भरतो गुरुम् ।
उटजे राममासीनं जटावल्कलधारिणम् ॥
तमभिप्रेक्ष्य स श्रीमान् दुःखमोहपरिप्लुतः ।
अभ्यधावत धर्म्मात्मा भ्रातरं कैकयीसुतः ॥
दृष्ट्वैव विललापार्त्तो बाष्पसन्दिग्धया गिरा ।
अशक्नुवन् धारयितुं वचनं चेदमब्रवीत् ॥

यः संसदि प्रकृतिभिर्भवेद्युक्त उपासितुम् ।
वन्यैर्मृगैः परिवृतः सोऽयमास्ते ममाग्रजः ॥
वासोभिर्बहुसाहस्रैर्यो वै निवसितः पुरा ।
धृताजिने सोऽयमिह प्रसुप्तो जगतीतले ॥
अधारयद्यो विविधाश्चित्राः सुमनसः सदा ।
सोऽयं जटाभारमिमं सहते राघवः कथम् ॥
चन्दनेन महार्हेण यस्याङ्गमुपसेवितम् ।
मलेन तस्याङ्गमिदं कथमार्यस्य सेव्यते ॥
मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः ।
धिग्जीवितं नृशंसस्य मम लोकविगर्हितम् ॥

इत्येवं विलपन् दीनः प्रस्विन्नमुखपङ्कजः ।
पादावुपेत्य रामस्य पपात भरतो रुदन् ॥
दुःखाभितप्तो भरतो राजपुत्रो महाबलः ।
आर्य्येत्येवाभिधायैकं व्याहर्तुं नाशकत्तदा ॥
शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन् ।
तावुभौ च समालिङ्ग्य रामोऽप्यश्रूण्यवर्त्तयत् ॥
अथ रामो महाप्राज्ञो भरतं भ्रातृवत्सलम् ।
लक्ष्मणेन सह भ्राता प्रष्टुं समुपचक्रमे ॥
किमेतदिच्छेयमहं श्रोतुं प्रव्याहृतं त्वया ।
यस्मात्त्वमागतो देशमिमं चीरजटाजिनी ॥

यन्निमित्तमिमं देशं कृष्णाजिनजटाधरः ।
हित्वा राज्यं प्रविष्टस्त्वं तत् सर्व्वं वक्तुमर्हसि
इत्युक्तः कैकयीपुत्रः काकुत्स्थेन महात्मना ।
दीर्घमुष्णञ्च निश्वस्य प्राञ्जलिर्वाक्यमब्रवीत् ॥
पतिष्यति महाघोरे नरके जननी मम ।
चकार सा महत् पापमिदमात्मयशोहरम् ॥
तस्य मे दासभूतस्य प्रसादं कर्त्तुमर्हसि ।
राज्यं प्राप्नुहि धर्म्मेण सकामान् सुहृदः कुरु ॥
एभिश्च सचिवैः सार्द्धं शिरसा याचितो मया ।
भ्रातुः शिष्यस्य दासस्य प्रसादं कर्त्तुमर्हसि ॥

एवमुक्ता महाबाहुः सवाष्पः कैकयीसुतः ।
रामस्य शिरसा पादौ जग्राह भरतः पुनः ॥
तं मत्तमिव मातङ्गं निश्वसन्तं पुनः पुनः ।
भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥
कुलीनः सत्त्वसम्पन्नस्तेजस्वी चरितव्रतः ।
राज्यहेतोः कथं पापमाचरेत्त्वद्विधो जनः ॥
न दोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन ।
नचापि जननीं बाल्यात् त्वं विगर्हितुमर्हसि ॥
यावत् पितरि धर्मज्ञे गौरवं लोकसत्कृते ।
तावत् धर्म्मभृतां श्रेष्ठ जनन्यामपि गौरवम् ॥

एताभ्यां धर्म्मशीलाभ्यां वनं गच्छेति राघव ।
मातापितृभ्यामुक्तोऽहं कथमन्यत् समाचरे ॥
त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृतम् ।
वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥
स च प्रमाणं धर्म्मात्मा राजा लोकगुरुस्तव ।
पित्रा दत्तं यथाभागमुपभोक्तुं त्वमर्हसि ॥

रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह ।
किं मे धर्मविहीनस्य राजधर्म्मः करिष्यति ॥
शाश्वतोऽयं सदा धर्म्मः स्थितोऽस्मासु नरर्षभ ।
ज्येष्ठे पुत्रे स्थिते राजा न कनीयान् भवेन्नृपः ॥
स समृद्धां मया सार्द्धमयोध्यां गच्छ राघव ।
अभिषेचय चात्मानं कुलस्यास्य भवाय नः ॥
कैकय्यां च मयि तु त्वयि चारण्यमाश्रिते ।
धीमान् स्वर्गं गतो राजा यायजूकः सतां मतः ॥
निष्क्रान्तमात्रे भवति सहसीते सलक्ष्मणे ।
दुःखशोकाभिभूतस्तु राजा त्रिदिवमभ्यगात् ॥
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः ।
अहञ्चायञ्च शत्रुघ्नः पूर्व्वमेव कृतोदकौ ॥
प्रियेण किल दत्तं हि पितृलोकेषु राघव ।
अक्षयं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ॥

त्वामेव शोचंस्तव दर्शनेप्सु-
स्त्वय्येव सक्तामनिवर्त्य बुद्धिम्।
त्वया विहीनस्तव शोकरुग्न-
स्त्वां संस्मरन्नेव गतः पिता नः॥

तां श्रुत्वा करुणां वाचं पितुर्मरणसंहिताम्
राघवो भरतेनोक्तां बभूव गतचेतनः॥
उत्क्षिप्य रामो बाहू वै पुष्पिताङ्ग इव द्रुमः।
वने परशुना कृत्तस्तथा भुवि पपात ह॥
स तु संज्ञां पुनर्लब्ध्वा नेत्राभ्यामस्रमुत्सृजन्।
उपाक्रामत काकुत्स्थः कृपणं बहु भाषितुम्॥
किं करिष्याम्ययोध्यायां ताते दिष्टां गतिं गते।
कस्तां राजवराद्धीनामयोध्यां पालयिष्यति॥
किन्नु तस्य मया कार्य्यं दुर्जातेन महात्मनः।
यो मृतो मम शोकेन स मया न च संस्कृतः॥
अहो भरत सिद्धार्थो येन राजा त्वयानघ।
शत्रुघ्नेन च सर्व्वेषु प्रेतकृत्येषु सत्कृतः॥
निष्प्रधानामनेकाग्रां नरेन्द्रेण विनाकृताम्।
निवृत्तवनवासोऽपि नायोध्यां गन्तुमुत्सहे॥
समाप्तवनवासं मामयोध्यायां परन्तप।
कोऽनुशासिष्यति पुनस्ताते लोकान्तरं गते॥

एवमुक्त्वा तु भरतं भार्य्यामभ्येत्य राघव।
उवाच शोकसन्तप्तः पूर्णचन्द्रनिभाननाम्॥
सीते मृतस्ते श्वशुरः पितृहीनोऽसि लक्ष्मण।
भरतो नूनमाचष्टे स्वर्गतिं पृथिवीपतेः॥
ततो बहुगुणं तेषां बाष्पं नेत्रेष्वजायत।
तथा ब्रुवति काकुत्स्थे कुमाराणां यशस्विनाम्॥
सीता तु स्वर्गतं श्रुत्वा श्वशुरं तं महानृपम्।
नेत्राभ्यामश्रुपूर्णाभ्यां न शशाकेक्षितुं प्रियम्॥

ततो नित्यानुगस्तेषां विदितात्मा महामतिः।
मृदुर्दान्तश्च कान्तश्च रामे च दृढभक्तिमान्।
सुमन्त्रस्तैर्नृपसुतैः सार्द्धमाश्वास्य राघवम्।
अवातारयदालम्ब्य नदीं मन्दाकिनीं शुभाम्॥
प्रगृह्य च महाभागो जलपूरितमञ्जलिम्।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत्॥
एतत्ते राजशार्दूल विमलं तोयमक्षयम्।
पितृलोकगतस्याद्य मद्दत्तमुपतिष्ठताम्॥
ततो मन्दाकिनीतीरात् प्रत्युत्तीर्य्य स राघवः।
पितुश्चकार तेजस्वी निवापं भ्रातृभिः सह॥
ततस्तेनैव मार्गेण प्रत्युत्तीर्य्य सरित्तटात्।
आरुरोह नरव्याघ्रो रम्यसानुं महीधरम्॥

ततः पर्णकुटीद्वारमासाद्य जगतीपतिः ।
प्रतिजग्राह पाणिभ्यामुभौ भरतलक्ष्मणौ ॥
तेषान्तु रुदतां शब्दात् प्रतिशब्दोऽभवद्गिरौ ।
भ्रातॄणां सह वैदेह्या सिंहानां नर्द्दतामिव ॥
महाबलानां रुदतां कुर्व्वतामुदकं पितुः ।
आकर्ण्य तुमुलं शब्दं त्रस्ता भरतसैनिकाः ॥
अब्रुवंश्चापि रामेण भरतः सङ्गतो ध्रुवम् ।
तेषामेव महाशब्दः शोचतां पितरं मृतम् ॥

अथ वाहान् परित्यज्य तं सर्व्वेऽभिमुखाः स्वन
अप्येकमनसो जग्मुर्यथास्थानं प्रधाविताः ॥
हयैरन्ये गजैरन्ये रथैरन्ये स्वलङ्कृतैः ।
सुकुमारास्तथैवान्ये पद्भिरेव नरा ययुः ॥
अचिरप्रोषितं रामं चिरविप्रोषितं यथा ।
द्रष्टुकामो जनः सर्व्वो जगाम सहसाश्रमम् ॥

ततस्तं पुरुषव्याघ्रं यशस्विनमकल्मषम् ।
आसीनं स्थण्डिले रामं ददर्श सहसा जनः ॥
विगर्हमाणः कैकेयीं मन्थरासहितामपि ।
अभिगम्य जनो रामं बाष्पपूर्णमुखोऽभवत् ॥
तान्नरान् बाष्पपूर्णाक्षान् समीक्ष्याथ सुदुःखिता
पर्य्यष्वजत धर्म्मज्ञः पितृवन्मातृवच्च सः ॥

ततः पुरुषसिंहानां वृतानां तैः सुहृद्गणैः ।
शोचतामेव रजनी दुःखेन व्यत्यवर्त्तत ॥

रजन्यां तु प्रभातायां भ्रातरस्ते सुहृद्वृताः ।
मन्दाकिन्यां हुतं जप्यं कृत्वा राममुपागमन् ॥
तूष्णीं ते समुपासीना न कश्चित् किञ्चिदब्रवीत् ।
भरतस्तु सुहृन्मध्ये रामं वचनमब्रवीत् ॥
प्रोषिते मयि यत् पापं माता मत्कारणात् कृतम् ।
क्षुद्रया न तदिष्टं मे प्रसीदतु भवान् मम ॥
धर्म्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम् ।
हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम् ॥
कथं दशरथाज्जातः शुभाभिजनकर्म्मणः ।
जानन् धर्ममधर्मञ्च कुर्य्यां कर्म जुगुप्सितम् ॥
को हि धर्म्मार्थयोर्हीनमीदृशं कर्म्म गर्हितम् ।
स्त्रियाः प्रियचिकीर्षुः सन् कुर्य्याद्धर्म्मज्ञ धर्म्मवित् ॥
अन्तकाले हि भूतानि मुह्यन्तीति पुरा श्रुतिः ।
राज्ञैवं कुर्व्वता लोके प्रत्यक्षा सा श्रुतिः कृता ॥
तस्य तं मतिसम्मोहमन्तकालसमुद्भवम् ।
तातस्य समतिक्रान्तं प्रत्याहर्त्तुं त्वमर्हसि ॥
पितुर्हि समतिक्रान्तं यः साधु कुरुते सुतः ।
तदपत्यं मतं लोके विपरीतमतोऽन्यथा ॥

नह्यपत्यं भवानस्तु मेदं त्वं दुष्कृतं पितुः ।
अनुवर्त्तस्व काकुत्स्थ लोके साधुविगर्हितम् ।
कैकेयीं मां च तातञ्च सुहृदो बान्धवांश्च नः ।
पौरान् जानपदान् सर्व्वान् त्रायस्व सकलानि
क्व चारण्यं क्व च क्षात्रं क्व जटाः क्व च पालनं
ईदृशं व्याहतं कर्म न भवान् कर्त्तुमर्हति ॥
एष हि प्रथमो धर्म्मः क्षत्रियस्याभिषेचनम् ।
येन शक्यं महाप्राज्ञ प्रजानां परिपालनम् ॥
अथ क्लेशजमेव त्वं धर्म्मं चरितुमिच्छसि ।
धर्म्मेण चतुरो वर्णान् पालयन् क्लेशमाप्नुहि ॥
चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमम् ।
प्राहुर्द्धर्म्मज्ञ धर्म्मज्ञास्तं कथं त्यक्तुमिच्छसि ॥
श्रुतेन बुद्ध्या ज्ञानेन जन्मना चावरो ह्यहम् ।
स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥
इहैव त्वाभिषिञ्चन्तु सर्व्वाः प्रकृतयः सह ।
अभिषिक्तस्त्वमस्माभिरयोध्यापालने व्रज ॥
अद्यार्य्य मुदिताः सन्तु सुहृदस्तेऽभिषेचने ।
अद्य भीताः पलायन्तु दुर्हृदस्ते दिशो दश ॥
आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ ।
अद्य तत्र भवन्तञ्च पितरं रक्ष किल्विषात् ।

शिरसा त्वाभियाचेऽहं कुरुष्व करुणां मयि ॥
अथ मां पृष्ठतः कृत्वा वनमेव भवानितः ।
गमिष्यति गमिष्यामि भवता सार्द्धमप्यहम् ॥
स तथा भरतेनोक्तो रामो धर्म्मपथे स्थितः ।
इदं वचनमक्लीवं मध्ये परिषदोऽब्रवीत् ॥
उपपन्नमिदं वाक्यं यत्त्वमेवमभाषथाः ।
जातः पुत्रो दशरथात् कैकेय्यां राजसत्तमात् ॥
पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् ।
मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ॥
ततः सा सम्प्रतिश्राव्य तव माता यशस्विनी ।
अयाचत नरश्रेष्ठ द्वौ वरौ वरवर्णिनी ॥
तव राज्यं नरव्याघ्र मम प्रव्राजनं तथा ।
तं च राजा तथा तस्यै नियुक्तः प्रददौ वरम् ॥
तेन पित्राहमप्यत्र नियुक्तः पुरुषर्षभ ।
चतुर्द्दश वने वासं वर्षाणि वरदानिकम् ॥
सोऽहं वनमिदं दुर्गं निर्जनं लक्ष्मणान्वितः ।
समीतस्त्वागतो वीर सत्यवादे स्थितः पितुः ॥
भवानपि तथा क्षिप्रं पितरं सत्यवादिनम् ।
कर्त्तुमर्हति राजेन्द्रं क्षिप्रमेवाभिषेचनात् ॥
ऋणात्मोचय राजानं मत्कृते भरत प्रभुम् ।

पितरं त्राहि धर्मज्ञ मातरञ्चाभिनन्दय ॥
अयोध्यां गच्छ भरत प्रकृतीरनुरञ्जय ।
शत्रुघ्नसहितो वीर सह सर्व्वैर्द्विजातिभिः ॥
प्रवेक्ष्ये दण्डकारण्यमहमप्यविलम्बयन् ।
आभ्यान्तु सहितो वीर सीतया लक्ष्मणेन च

—०००—

समाप्तम्

ঋজুপাঠ।

—০০০—

দ্বিতীয় ভাগ

—০০০—

শ্রীঈশ্বরচন্দ্র বিদ্যাসাগর কর্ত্তৃক

সংগৃহীত।

—০০০—

চতুর্থ বার মুদ্রিত।

কলিকাতা

সংস্কৃত যন্ত্র।

সংবৎ ১৯১৭

ঋজুপাঠের দ্বিতীয় ভাগ রামায়ণমাত্র হইতে সংগৃহীত হইয়াছে। রচনা প্রণালী দৃষ্টে সুস্পষ্ট প্রতীতি হয় রামায়ণ অতি প্রাচীন গ্রন্থ। এই প্রাচীন গ্রন্থ মহর্ষি বাল্মীকি প্রণীত বলিয়া প্রসিদ্ধি আছে। কোন কোন আলঙ্কারিকেরা রামায়ণকে মহাকাব্য মধ্যে গণনা করিয়া থাকেন। কিন্তু তাঁহারা মহাকাব্যের যে সকল লক্ষণ নির্দ্দেশ করিয়াছেন সে সমুদায় লক্ষণ কালিদাসাদি প্রণীত রঘুবংশাদি নব্য কাব্য গ্রন্থ সমূহে যেরূপ লক্ষিত হয় প্রাচীন কাব্য রামায়ণে সেরূপ লক্ষিত হয় না। এই গ্রন্থে পৌনরুক্ত, প্রাসঙ্গিক বিষয়ের অতি বিস্তৃত বর্ণনা প্রভৃতি কতিপয় গুরুতর দোষ আছে। যাহা হউক ইহা অনায়াসে নির্দ্দেশ করা যাইতে পারে সংস্কৃত ভাষায় এরূপ প্রাঞ্জল ও প্রসাদ গুণ বিশিষ্ট দ্বিতীয় পদ্য গ্রন্থ আর নাই। রামায়ণের মধ্যে অযোধ্যাকাণ্ডের রচনা যেরূপ চমৎকারিণী ও মনোহারিণী অন্যান্য কাণ্ডের রচনা সেরূপ নহে। এই নিমিত্ত ঋজুপাঠের দ্বিতীয় ভাগে কেবল অযোধ্যাকাণ্ডের উৎকৃষ্ট অংশ সকল সঙ্কলিত হইল। সঙ্কলিত অংশ সকলেরও যে যে ভাগ অনাবশ্যক বোধ হইয়াছে পরিত্যাগ করা গিয়াছে।

শ্রীঈশ্বরচন্দ্র শর্ম্মা।

কলিকাতা। সংস্কৃতকালেজ।
২৫ ফাল্গুন। সংবৎ ১৯০৮।

ऋजुपाठम्

—◦❁◦—

द्वितीयो भागः ।

राजा दशरथः पूर्वं कैकेय्यै द्वौ वरौ ददौ । अधुना सा रामस्य राज्याभिषेकमसहमाना एकेन वरेण रामस्य वनप्रवासनम् अपरेण च स्वसुतस्य भरतस्याभिषेचनं याचितवती । तत् श्रुत्वा दशरथस्य विलापः ।

ततः श्रुत्वा महाराजः कैकेय्या दारुणं वचः ।
पपात सहसा भूमौ छिन्नेन्द्रध्वजवत्तदा ॥
प्रतिलभ्य ततः संज्ञां कैकेयीवाक्यतापितः ।
असंवृतायामासीनो जगत्यां दीर्घमुच्छ्वसन् ॥
अहो धिगिति सामर्षो वाचमुक्त्वा नराधिपः ।
मोहमापेदिवान् भूयः शोकोपहतचेतनः ॥
चिरेण नृपतिः संज्ञां प्रतिलभ्य सुदुःखितः ।
कैकेयीमब्रवीत् क्रुद्धो निर्दहन्निव चक्षुषा ।

नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ॥
सदा ते जननीतुल्यां वृत्तिं वहति राघवः ।
तस्यैवं त्वमनर्थाय किंनिमित्तमिहोद्यता ॥
त्वं मयात्मविनाशार्थं भवनं स्वं निवेशिता ।
अविज्ञानान्नृपसुता व्याली तीक्ष्णविषा यथा ॥
जीवलोको यदा सर्व्वो रामस्याह गुणस्तवम् ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ॥
कौसल्यां वा सुमित्रां वा त्यजेयमपि वा श्रियम्
जीवितं चात्मनो रामं नत्वेव पितृवत्सलम् ॥
परा भवति मे प्रीतिर्दृष्ट्वा तनयमग्रजम् ।
अपश्यतस्तु मे रामं नष्टं भवति चेतनम् ॥
तिष्ठेल्लोको विना सूर्य्यं सस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ॥
तदलं त्यज्यतामेष निश्चयः पापनिश्चये ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥
न हि किञ्चिदयुक्तं वा विप्रियं वा पुरा मम ।
अकरोस्त्वं विशालाक्षि तेन न श्रद्दधामि ते ॥
ननु ते राघवस्तुल्यो भरतेन महात्मना ।
बहुशो हि स्म बाले त्वं कथाः कथयसे मम ॥

तस्य धर्म्मात्मनो देवि वने वासं यशस्विनः ।
कथं रोचयसे भीरु नव वर्षाणि पञ्च च ॥
रामो हि भरताद्भूयस्तव शुश्रूषते सदा ।
विशेषं त्वयि तस्मात्तु भरतस्य न लक्षये ॥
सत्यं दानं तपस्त्यागो मित्रता शौचमार्जवम् ।
विद्या च गुरुशुश्रूषा ध्रुवाण्येतानि राघवे ॥
तस्मिन्नार्जवसम्पन्ने देवि देवोपमे कथम् ।
पापमाशंससे रामे महर्षिसमतेजसि ॥
मम वृद्धस्य कैकेयि त्वद्गतस्य गतायुषः ।
दीनं लालप्यमानस्य कारुण्यं कर्त्तुमर्हसि ॥
पृथिव्यां सागरान्तायां यत् किञ्चिदधिगम्यते ।
तत् सर्व्वं तव दास्यामि मा त्वं मे मन्युमाविश ॥

इति दुःखाभिसन्तप्तं विलपन्तमचेतनम् ।
प्रत्युवाच कैकेयी रौद्रा रौद्रतरं वचः ॥
यदि दत्त्वा वरौ राजन् पुनः प्रत्यनुतप्यसे ।
धार्म्मिकत्वं कथं वीर पृथिव्यां कथयिष्यसि ॥
यदा समेता बहवस्त्वया राजर्षयः सह ।
कथयिष्यन्ति धर्मज्ञ तत्र किं प्रतिवक्ष्यसि ॥
यस्याः प्रसादे जीवामि या च मामभ्यपालयत् ।
तस्याः कृतं मया मिथ्या कैकेय्या इति वक्ष्यसि ॥

भवत्वधर्म्मो धर्म्मो वा सत्यं वा यदि वानृतम् ।
यत्त्वया संश्रुतं मह्यं तस्य नास्ति व्यतिक्रमः ॥
अहं हि विषमद्यैव पीत्वा बहु तवाग्रतः ।
पश्यतस्ते मरिष्यामि रामो यद्यभिषिच्यते ॥
सत्येनात्मना चाहं शपे ते मनुजाधिप ।
यदा नान्येन तुष्येयमृते रामविवासनात् ॥
एतावदुक्त्वा वचनं कैकेयी विरराम ह ।
विलपन्तञ्च राजानं न प्रतिव्याजहार सा ॥
श्रुत्वा तु राजा कैकेय्या वचनं तदशोभनम् ।
नाभ्यभाषत कैकेयीं मुहूर्त्तं व्याकुलेन्द्रियः ॥
स देव्या व्यवसायञ्च घोरञ्च शपथं कृतम् ।
ध्यात्वा रामेति निश्वस्य छिन्नस्तरुरिवापतत् ॥
दीर्घमुष्णञ्च निश्वस्य राजा परमदुर्म्मनाः ।
दीनयातुरया वाचा इति होवाच कैकयीम् ॥
अनर्थमिममर्थाभं केन त्वमुपदेशिता ।
भूतोपहतचित्तेव युवती मां न लज्जसे ॥
नृशंसे पापसङ्कल्पे क्षुद्रे दुष्कृतकारिणि ।
न कथञ्चिदृते रामाद्भरतो राज्यमावसेत् ॥
कथं द्रक्ष्यामि रामस्य वनं गच्छेति भाषिते ।
मुखवर्णं विवर्णन्तु यथैवेन्दुमुपप्लुतम् ॥

किं मां वक्ष्यन्ति राजानो नानादिग्भ्यः समागताः ।
कैकेय्या क्लिश्यमानेन पुत्रः प्रव्राजितो मया ।
यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति ॥
किं मां वक्ष्यति कौसल्या राघवे वनमास्थिते ।
किं चैनां प्रतिवक्ष्यामि कृत्वा विप्रियमीदृशम् ॥
सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा ।
न मया सत्कृता देवी सत्कारार्हा कृते तव ॥
विप्रकारञ्च रामस्य सम्प्रयाणं वनस्य च ।
सुमित्रा प्रेक्ष्य वै भीता कथं मे विश्वसिष्यति ॥
नहि राममहं दृष्ट्वा प्रवसन्तं महावने ।
चिरं जीवितुमाशंसे रुदतीं चापि मैथिलीम् ॥
अवर्त्तयत मां सान्त्वैः सान्त्वयन्ती सुदारुणं ।
गीतशब्देन संरुध्य लुब्धो मृगमिवावधीः ॥
रममाणस्त्वया सार्द्धं मृत्युं त्वां नाभिलक्षये ।
बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम् ।
बालिशो बत कामात्मा राजा दशरथो भृशम् ।
प्रस्थापयामास वनं स्त्रीकृते यः प्रियं सुतम् ॥
इति देशेषु देशेषु मामुद्दिश्य सपार्थकम् ।
नाना वाचश्चरिष्यन्ति रामे प्रव्राजिते वनम् ॥
नालं द्वितीयं वचनं पुत्रो मां प्रतिभाषितुम् ।

स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥
यदि मे राघवः कुर्य्याद्वनं गच्छेति चोदितः ।
प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति ॥
शुद्धभावो हि भावं मे न तु ज्ञास्यति राघवः ।
वनं पुत्र व्रजेत्युक्तो नैवान्यत् प्रतिवक्ष्यति ॥
प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ।
मास्म मे भरतः कार्षीत् प्रेतकृत्यं गतायुषः ॥
हन्तानार्य्ये ममामित्रे सुखिनी भव केकयि ।
त्यजामि भरतं त्वाञ्च जीवितं चेदमात्मनः ॥
मृते मयि गते रामे वनं पुरुषपुङ्गवे ।
इदानीं विधवा राज्यं सपुत्रा कारयिष्यसि ॥
रथपृष्ठैर्गजैरेव यो याति सततं स हि ।
कथं पद्भ्यां महारण्ये वत्सो मे विचरिष्यति ॥
यस्य चाहारसमये सूदाः कुण्डलधारिणः ।
अहम्पूर्व्वाः पचन्ति स्म प्रशस्तं पानभोजनम् ।
स कथं नु कषायाणि तिक्तानि कटुकानि च ।
फलानि भक्षयन् नित्यं सुतो मे वर्त्तयिष्यति ॥
महार्हवस्त्रसंवीतो भूत्वा चिरसुखोषितः ।
काषायपरिधानस्तु कथं भूमौ निवत्स्यति ।
धिगस्तु योषितो नाम शठाः स्वार्थपरायणाः ।

न ब्रवीमि स्त्रियः सर्व्वा भरतस्यैव मातरम् ॥

परित्यजेयुः पितरोऽपि पुत्रान्
भार्य्याः पतींश्चापि कृतानुरागाः ।
सर्व्वं हि नूनं कुपितं जगत् स्यात्
दृष्ट्वैव रामं व्यसने निमग्नम् ॥
विना हि सूर्य्येण भवेत् प्रवृत्तिः
अवर्षता वज्रधरेण वापि ।
रामन्तु गच्छन्तमितः समीक्ष्य
जीवेन्न कश्चिन्त्विति चेतना मे ॥
प्रतप्य वा प्रज्वल वा प्रणश्य वा
सहस्रशो वा स्फुटितां महीं व्रज ।
न ते करिष्यामि वचः सुदारुणं
ममाहितं केकयवंशपांसुले ॥

अथ भूमौ महाराजं शयानमतथोचितम् ।
प्रत्याकारयामास क्रूरा केकयवंशजा ॥
त्वं कथ्यसे महाराज सत्यवादी दृढव्रतः ।
मम चेमं वरं कस्माद्विधारयितुमिच्छसि ॥
एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ।
प्रत्युवाच परिक्रुद्धो मुहूर्त्तं विह्वलन्निव ॥
मृते मयि गते रामे वनं मनुजपुङ्गवे ।

इत्यनार्य्ये ममामित्रे सकामा सुखिनी भव ॥
अपुत्रेण मया पुत्रः श्रमेण महता महान् ।
रामो लब्धो महातेजाः स कथं त्यज्यते मया ॥
शूरश्च कृतविद्यश्च जितक्रोधः क्षमापरः ।
कथं कमलपत्राक्षो मया रामो विवास्यताम् ॥
कथमिन्दीवरश्यामं दीर्घबाहुं महाबलम् ।
अभिराममहं रामं वासयिष्यामि दण्डकान् ॥
सुखानामुचितस्यैव दुःखैरनुचितस्य च ।
दुःखं नामानुपश्येयं कथं रामस्य धीमतः ॥
नृशंसे पापसंकल्पे रामं सत्यपराक्रमम् ।
किं विप्रियेण कैकेयि प्रियं योजयसे मम ॥

तथा विलपतस्तस्य परिभ्रमितचेतसः ।
अस्तमभ्यगमत् सूर्य्यो रजनी चाभ्यवर्त्तत ॥
सा त्रियामा तदार्त्तस्य चन्द्रमण्डलमण्डिता ।
राज्ञो विलपमानस्य न व्यभासत शर्वरी ॥
वृद्धो दशरथो राजा सदैवोष्णं विनिश्वसन् ।
विललापातिदुःखार्त्तो गगनासक्तलोचनः ॥
न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते ।
क्रियतां मे दया भद्रे मयायं रचितोऽञ्जलिः ॥
एवमुक्त्वा ततो राजा कैकेयीं संयताञ्जलिः ।

प्रसादयामास पुनः कैकेयीं राजधर्म्मवित् ॥
साधनकस्य दीनस्य त्वद्गतस्य गतायुषः ।
प्रसादः क्रियतां भद्रे देवि राज्ञो विशेषतः ॥
प्रसीद देवि रामो मे त्वद्दत्तं राज्यमव्ययम् ।
लभतामसितापाङ्गि यशः परमवाप्स्यसि ॥

विशुद्धभावस्य हि दुष्टभावा
दीनस्य ताम्राश्रुकलस्य राज्ञः ।
श्रुत्वा विचित्रं करुणं विलापं
भर्त्तुर्नृशंसा न चकार वाक्यम् ॥
ततः स राजा पुनरेव दुःखितः
प्रियामतुष्टां प्रतिकूलभाषिणीम् ।
समीक्ष्य पुत्रस्य विवासकारणं
क्षितावसंज्ञो निपपात मूर्च्छितः ॥

पुत्रशोकार्द्दितं पापा विसंज्ञं पतितं भुवि ।
विचेष्टमानमुत्प्रेक्ष्य इक्ष्वाकुमिदमब्रवीत् ॥
पापं कृत्वेव किमिदं मम संश्रुत्य संश्रवम् ।
शेषे क्षितितले सन्नः स्थित्यां स्थातुं त्वमर्हसि ॥
आहुः सत्यं हि परमं धर्म्मं धर्म्मविदो जनाः ।
सत्यमाश्रित्य च मया त्वं धर्म्मं प्रति चोदितः ॥
सत्यं त्वमनुवर्त्तस्व यदि धर्म्मे धृता मतिः ।

किन्निमित्तमपूर्व्वोऽयं विकारो मनुजाधिपे ॥
एवमुक्ता तु कैकेयी राघवेण महात्मना ।
उवाचेदं सुनिर्लज्जा धृष्टमात्महितं वचः ॥
न राजा कुपितो राम व्यसनं नास्य किञ्चन ।
किञ्चिन्मनोगतं त्वस्य त्वद्भयान्नानुभाषते ॥
प्रियं त्वामप्रियं वक्तुं वाणी नास्य प्रवर्त्तते ।
तदवश्यं त्वया कार्य्यं यदनेन श्रुतं मम ॥
एष मह्यं वरं दत्त्वा पुरा मामभिपूज्य च ।
पश्चात्तप्यते राजा यथान्यः प्राकृतस्तथा ॥
धर्म्ममूलमिदं राम विदितञ्च सतामपि ।
तथा कुरु यथा सत्यं न त्यजेत् त्वत्कृते नृपः ॥
यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते ।
ततोऽहमभिधास्यामि नैष वक्ष्यति तत् स्वयम् ॥
एतत्तु वचनं श्रुत्वा कैकेय्या समुदाहृतम् ।
उवाच व्यथितो रामस्तां देवीं नृपसन्निधौ ॥
अहो धिङ्नार्हसे देवि वक्तुं मामीदृशं वचः ।
अहं हि वचनाद्राज्ञः पतेयमपि पावके ॥
भक्षयेयं विषं तीक्ष्णं मज्जेयमपि चार्णवे ।
नियुक्तो गुरुणा पित्रा नृपेण च हितेन च ॥
तद् ब्रूहि वचनं देवि राज्ञो यदभिकाङ्क्षितम्

करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥

तमार्जवसमायुक्तमनार्या सत्यवादिनम् ।
उवाच रामं कैकेयी वचनं भृशदारुणम् ॥
पुरा देवासुरे युद्धे पित्रा ते मम राघव ।
रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥
अथाद्य याचितो राजा भरतस्याभिषेचनम् ।
गमनं दण्डकारण्ये तव चाद्यैव राघव ॥
यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि ।
आत्मानञ्च नरश्रेष्ठ मम वाक्यमिदं शृणु ॥
त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ।
भरतश्चाभिषिच्येत यदेतदभिषेचनम् ।
त्वदर्थे विहितं राज्ञा तेन सर्व्वेण राघव ॥
सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः ।
अभिषेकमिमं त्यक्त्वा जटाचीरधरो भव ॥
भरतः कोशलपतेः प्रशास्तु वसुधामिमाम् ।
नानारत्नसमाकीर्णां गजाश्वरथसङ्कुलाम् ॥
एतत् कुरु नरेन्द्रस्य वचनं रघुनन्दन ।
सत्येन महता राम तारयस्व नरेश्वरम् ॥

तदप्रियममित्रघ्नो वचनं मरणोपमम् ।
श्रुत्वा न विव्यथे रामः कैकेयीं चेदमब्रवीत् ॥

एवमस्तु गमिष्यामि वनं वस्तुमतन्द्रितः ।
जटाचीरधरो राज्ञः प्रतिज्ञामनुपालयन् ॥
इदन्तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः ।
नाभिनन्दति दुर्द्धर्षो यथापूर्व्वमरिन्दमः ॥
महाननुग्रहो मे स्यादाज्ञया च महात्मना ।
मयि ज्येष्ठे च पुत्रे च किं राज्ञो देवि गौरवम् ॥
दैवतं हि प्रभुश्चैव पिता राजा गुरुश्च नः ।
तस्याज्ञां शिरसादाय करिष्यामि यथात्थ माम् ॥
मन्युर्नच त्वया कार्य्यो देवि ब्रूमि तवाग्रतः ।
यास्यामि भव सुप्रीता वनं चीरजटाधरः ॥
व्यलीकमिदमेकन्तु हृदयं दहते मम ।
स्वयं यन्नाह मां राजा भरतस्याभिषेचनम् ॥
अहं हि सीतां राज्यञ्च प्राणानिष्टान् धनानि च
हृष्टो भ्रात्रे स्वयं दद्यां भरताय प्रचोदितः ।
किं पुनर्मनुजेन्द्रेण स्वयं पित्रा प्रचोदितः ॥
तदाश्वासय हीमन्त्वं किं न्विदं यन्महीपतिः ।
वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ॥
गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादद्यैव नृपशासनात् ॥
दण्डकारण्यमेषोऽहं गच्छाम्येव हि सत्वरः ।

अविचार्य्य पितुर्व्वाक्यात् समा वस्तुं चतुर्द्दश ॥

अथ सा तस्य तद्वाक्यं श्रुत्वा रामस्य कैकयी ।
प्रीतिप्रफुल्लनयना त्वरयामास राघवम् ॥
एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादिहावर्त्तयितुं नराः ॥
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलम्बनम् ।
राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि ॥
व्रीडान्वितः स्वयं यच्च नृपस्त्वां नाभिभाषते ।
नैतत् किञ्चिन्नरश्रेष्ठ मन्युरेषोऽपनीयताम् ॥
यावत्त्वं न वनं यातः पुरादस्मादतित्वरम् ।
पिता तावन्न ते राम स्नास्यते भोक्ष्यतेऽपि वा ॥

तदप्रियमनार्य्याया वचनं दारुणोदयम् ।
श्रुत्वा गतव्यथो रामः कैकेयीं वाक्यमब्रवीत् ॥
यत्तत्रभवतः किञ्चिच्छक्यं कर्त्तुं प्रियं मया ।
प्राणानपि परित्यज्य सर्व्वथा कार्य्यमेव तत् ॥
न ह्यतो धर्म्मचरणं किञ्चिदस्ति महत्तरम् ।
यथा पितरि शुश्रूषा तस्य वा वचनक्रिया ॥
अनुक्तोऽप्यत्रभवता भवत्या वचनादहम् ।
वने वत्स्यामि विजने वर्षाणीह चतुर्दश ॥
यावन्मातरमापृच्छे सीताञ्चानुनयाम्यहम् ।

ततोऽहमद्य गमिष्यामि दण्डकानां महद्वनम् ॥
भरतः पालयेद्राज्यं शुश्रूषेच्च पितुर्यथा ।
तथा भवत्या कर्त्तव्यं स हि धर्म्मः सनातनः ॥
रामस्य तु वचः श्रुत्वा नृपः शोकपरिप्लुतः ।
वाष्पपूर्णमुखो दीनः प्ररुरोद महास्वनम् ॥

वन्दित्वा चरणौ रामः शोकार्त्तस्य पितुस्तदा ।
कैकेय्याश्चाप्यनार्य्याया निष्पपात महाद्युतिः ॥
तं वाष्पपरिपूर्णाक्षः पृष्ठतोऽनुजगाम ह ।
लक्ष्मणः परमक्रुद्धः सुमित्रानन्दवर्द्धनः ॥
गमने च मतिं चक्रे वनवासाय लक्ष्मणः ।
[illegible] विना रामं नाहं जीवितुमुत्सहे ॥
न धनं गन्तुकामस्य त्यजतश्च वसुन्धराम् ।
सर्व्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ॥
प्रतिषिध्य शुभं छत्रं व्यजने च स्वलङ्कृते ।
विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान् ।
धारयन् मनसा दुःखमिन्द्रियाणि निगृह्य च ।
प्रविवेशात्मवान् वेश्म मातुरप्रियशंसिवान् ॥
तदा सर्व्वोऽप्यभिजनः श्रीमतः सत्यवादिनः ।
नालक्षयत रामस्य कञ्चिदाकारमानने ॥
उचितञ्च महाबाहुर्न जहौ हर्षमात्मवान् ।

शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मनः ॥
[illegible] रामः सर्व्वं सम्मानयन् जनम् ।
पितुः समीपं धर्म्मात्मा प्रविवेश महायशाः ॥
तं गुणैः समतां प्राप्तो भ्राता विपुलविक्रमः ।
सौमित्रिरनुवव्राज धारयन् दुःखमात्मनः ॥

[illegible] मातरमामन्त्रयितुं
तदन्तःपुरप्रवेशः ।

रामस्तु भृशमायस्तो निश्वसन्निव कुञ्जरः ।
जगाम सहितो भ्रात्रा मातुरन्तःपुरं वशी ॥
सोऽपश्यत् पुरुषं तत्र वृद्धं परमपूजितम् ।
उपविष्टं गृहद्वारि तिष्ठतश्चापरान् बहून् ॥
दृष्ट्वैव तु तदा रामं ते सर्व्वे समुपस्थिताः ।
जयेन जयतां श्रेष्ठं वर्द्धयन्ति स्म राघवम् ॥
प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान् ॥
प्रणम्य रामस्तान् वृद्धान् तृतीयायां ददर्श सः ।
स्त्रियो बालाश्च वृद्धाश्च द्वाररक्षणतत्पराः ॥
वर्द्धयित्वा प्रहृष्टास्ताः प्रविश्य च गृहं स्त्रियः ।
न्यवेदयन्त त्वरितं राममातुः सुतागमम् ॥

प्रविश्य तु तदा रामो मातुरन्तःपुरं शुभम्।
ददर्श मातरं तत्र हावयन्तीं हुताशनम्॥
सा चिरादात्मजं दृष्ट्वा मातृनन्दनमागतम्।
अभिचक्राम संहृष्टा किशोरं वडवा यथा॥
स मातरमुपक्रान्तामुपसंगृह्य राघवः।
पर्य्यष्वजत धर्म्मात्मा माता चैव परन्तपः।
परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्द्धनि॥
तमुवाच दुराधर्षं राघवं सुतमात्मनः।
कौशल्या पुत्रवात्सल्यादिदं प्रियहितं वचः॥
वृद्धानां धर्म्मशीलानां राजर्षीणां महात्मनाम्।
प्राप्नुह्यायुश्च कीर्त्तिञ्च धर्म्मञ्चाप्युचितं कुले॥
सत्यप्रतिज्ञं पितरं राजानं पश्य राघव।
अद्यैव त्वां स धर्म्मात्मा यौवराज्येऽभिषेक्ष्यति॥
दत्तमासनमालभ्य भोजनेन निमन्त्रितः।
मातरं राघवः किञ्चित् प्रसार्य्याञ्जलिमब्रवीत्॥
देवि नूनं न जानीषे महद्भयमुपस्थितम्।
इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च॥
गमिष्ये दण्डकारण्यं किमनेनासनेन मे।
विष्टरासनयोग्यो हि कालोऽयं समुपस्थितः॥
चतुर्द्दश हि वर्षाणि वत्स्यामि विजने वने।

कन्दमूलफलैर्जीवन् हित्वा मुनिवदामिषम् ॥
भरताय महाराजो यौवराज्यं प्रयच्छति ।
मां पुनर्दण्डकारण्यं विवासयति तापसम् ॥
स षट् चाष्टौ च वर्षाणि वत्स्यामि विजने वने ।
आसेवमानो वन्यानि फलमूलैश्च वर्तयन् ॥
सा निकृत्तेव सालस्य यष्टिः परशुना वने ।
पपात सहसा देवी देवतेव दिवश्च्युता ॥
तामदुःखोचितां दृष्ट्वा पतितां कदलीमिव ।
रामस्तूत्थापयामास मातरं गतचेतसम् ॥
सा राघवमुपासीनमसुखार्ता सुखोचिता ।
उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥
यदि वत्स न जायेथा मम शोकाय राघव ।
नाद्य नैतादृशं दुःखं पश्येयमहमप्रजा ॥
एक एव हि वन्ध्यायाः शोको भवति मानसः ।
अप्रजास्मीति सन्तापो न ह्यन्यः पुत्र विद्यते ।
सा बह्वन्यमनोज्ञानि वाक्यानि हृदयच्छिदाम् ।
अहं श्रोष्ये सपत्नीनामवराणां वरा सती ॥
अतो दुःखतरं किं नु प्रमदानां भविष्यति ।
मम शोको विलापश्च यादृशोऽयमनन्तकः ॥
त्वयि सन्निहितेऽप्येवमहमासं निराकृता ।

किं पुनः प्रोषिते तात ध्रुवं मरणमेव हि ॥
तदक्षयं महद्दुःखं नोत्सहे सहितुं चिरात् ।
विप्रकारं सपत्नीनामेवं जीर्णापि राघव ॥
अपश्यन्ती तव मुखं परिपूर्णशशिप्रभम् ।
कृपणा वर्तयिष्यामि कथं कृपणजीविका ॥
स्थिरं नु हृदयं मन्ये ममेदं यन्न दीर्यते ।
प्रावृषीव महानद्याः स्पृष्टं कूलं नवाम्भसा ॥

तथा तु विलपन्तीं तां कौसल्यां राममातरम्
उवाच लक्ष्मणो दीनस्तत्कालसदृशं वचः ॥
न रोचते ममाप्येतदार्ये यद्राघवो वनम् ।
त्यक्त्वा राजश्रियं गच्छेत् स्त्रिया वाक्यवशं गतः ॥
विपरीतश्च वृद्धश्च विषयैश्च प्रधर्षितः ।
नृपः किमिव न ब्रूयात् कैकेय्याभिप्रणोदितः ॥
नास्यापराधं पश्यामि नापि दोषं तथाविधम् ।
येन निर्वास्यते राष्ट्राद्वनवासाय राघवः ॥
न तं पश्याम्यहं लोके परोक्षमपि यो नरः ।
अमित्रोऽपि निरस्तोऽपि अस्य दोषमुदाहरेत् ॥
देवकल्पमृजुं दान्तं रिपूणामपि वत्सलम् ।
अवेक्षमाणः को धर्मं त्यजेत् पुत्रमकारणात् ।
तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः ।

[illegible] को हृदये कुर्य्याद्राज[illegible]समनुस्मरन् ॥
[illegible]स्य न जानाति कश्चिद्दर्यमिमं नरः ।
[illegible]दम मया सार्द्धमात्मसात्कुरु शासनम् ॥
[illegible] पार्श्वे सधनुषा तव गुप्तस्य राघव ।
[illegible] समर्थोऽसि प्रियं कर्त्तुं कृतान्तस्येव तिष्ठतः ॥
[illegible] नगरीमिमां सर्व्वामयोध्यां मनुजर्षभ ।
[illegible]ामि शरैस्तीक्ष्णैर्यदि स्थास्यति वि[illegible]ये ॥
[illegible]स्यापि पक्षो वा यो वास्य हितमिच्छति ।
सर्व्वांस्तांस्तु वधिष्यामि मृदुर्हि परिभूयते ॥
[illegible]त्साहितोऽयं कैकेय्या सन्तुष्टो यदि नः पिता ।
[illegible]मित्रभूतो निःसङ्गं वध्यतां बध्यतामपि ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
उत्पथप्रतिपन्नस्य कार्य्यं भवति शासनम् ॥
[illegible]लमेष किमाश्रित्य हेतुं वा कं नरोत्तम ।
[illegible]तुमिच्छति कैकेय्यै उपस्थितमिदं तव ॥
त्वया चैव मया चैव कृत्वा वैरमनुत्तमम् ।
कास्य शक्तिः श्रियं दातुं भरतायारिशासन ॥
अनुरक्तोऽस्मि भावेन भ्रातरं देवि तत्त्वतः ।
सत्येन धनुषा चैव शपामि तव सन्निधौ ॥
दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ।

प्रविष्टं तत्र मां देवि त्वं पूर्व्वमवधारय ॥
हरामि वीर्य्याद्दुःखं ते तमः सूर्य्य इवोदितः ।
देवि त्वं पश्य मे वीर्य्यं राघवश्चैव पश्यतु ॥
हनिष्ये पितरं वृद्धं कैकेय्यासक्तमानसम् ।
कृपणं तं स्थितं बाल्ये वृद्धभावेन गर्हितम् ॥

एतत्तु वचनं श्रुत्वा लक्ष्मणस्य महात्मनः ।
उवाच रामं कौशल्या रुदती शोकविह्वला ॥
भ्रातुस्ते वचनं पुत्र लक्ष्मणस्य श्रुतं त्वया ।
यदत्रानन्तरं कार्य्यं कुरुष्व यदि रोचते ॥
न चाधर्म्यं वचः श्रुत्वा सपत्न्या मम भाषितम् ।
विहाय शोकसन्तप्तां गन्तुमर्हसि मामितः ॥
धर्म्मज्ञ यदि धर्म्मिष्ठ धर्म्मं चरितुमिच्छसि ।
शुश्रूष मामिहस्थस्त्वं चर धर्म्ममनुत्तमम् ॥
शुश्रूषु जननीं पुत्र स्वगृहे नियतो वसन् ॥
यथैव राजा पूज्यस्ते गौरवेण तथा ह्यहम् ।
त्वां नाहमनुजानामि न गन्तव्यमितो वनम् ॥
त्वद्वियोगान्न मे कार्य्यं जीवितेन सुखेन वा ।
त्वया सह मम श्रेयस्तृणानामपि भक्षणम् ॥
यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकलालसाम् ।
अहं प्रायमिहासिष्ये न च शक्ष्यामि जीवितुम् ॥

विलपन्तीं तथा दीनां कौशल्यां जननीं ततः ।
वाच रामो धर्म्मात्मा वचनं धर्म्मसंहितम् ॥
ास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम ।
ादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ॥
ाऽहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्त्तये ।
र्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते ॥
देतत्तु मया कार्य्यं नियतं वचनं पितुः ।
ितुर्हि वचनं कुर्व्वन्न कश्चिदवहीयते ॥
ेवमुक्ता जननीं लक्ष्मणं पुनरब्रवीत् ।
क्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्व्वधनुष्मताम् ॥
। लक्ष्मण जानामि मयि स्नेहमनुत्तमम् ।
क्रमञ्चैवसत्त्वञ्च तेजश्च सुदुरासदम् ॥
म मातुर्महद्दुःखमतुलं शुभलक्षण ।
भिप्रायमविज्ञाय सत्यस्य च शमस्य च ॥
र्म्मो हि परमो लोके धर्मे सत्यं प्रतिष्ठितम् ।
र्मं संश्रितमेतच्च पितुर्वचनमुत्तमम् ॥
श्रुत्य च पितुर्वाक्यं मातुर्वा प्रियदर्शन ।
कर्त्तव्यं वृथा वीर धर्म्ममाश्रित्य तिष्ठता ॥
ऽहं न शक्ष्यामि पितुर्नियोगमतिवर्त्तितुम् ।
तुर्हि वचनाद्वीर कैकेय्याहं प्रचोदितः ॥

तदेतां विसृजानार्य्यां क्षत्रधर्म्माश्रितां मतिम्
धर्म्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ॥
तमेवमुक्त्वा सौहार्दात् भ्रातरं लक्ष्मणाग्रजः ।
उवाच भूयः कौसल्यां प्राञ्जलिः शिरसा नतः
अनुमन्यस्व मा देवि गमिष्यन्तमितो वनम् ।
शापितासि मम प्राणैः कुरु स्वस्त्ययनानि मे ॥
शोकः सन्धार्य्यतां मातर्हृदये साधु मा शुचः ।
वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः ॥
अम्ब संहृत्य सम्भारान् दुःखं हृदि निगृह्य च ।
वनवासकृता बुद्धिर्मम धर्म्यानुवर्त्त्यताम् ॥
इति ब्रुवति रामे तु लक्ष्मणोऽवाक्शिरा इव
ध्यात्वा मध्यं जगामाथ सहसा दुःखहर्षयोः ॥
ततस्तु बद्ध्वा भ्रुकुटीं भ्रुवोर्मध्ये नरर्षभः ।
निशश्वास महासर्पो बिलस्थ इव रोषितः ॥
तस्य दुष्प्रतिवीक्ष्यं तत् भ्रुकुटीसहितं तदा ।
बभौ क्रुद्धस्य सिंहस्य मुखस्य सदृशं मुखम् ॥
अग्रहस्तं विधुन्वंस्तु हस्ती हस्तमिवात्मनः ।
अग्राक्ष्णा वीक्षमाणस्तु तिर्य्यक् भ्रातरमब्रवीत् ॥

ोकविद्विष्टमारब्धं त्वदन्यस्याभिषेचनम् ।
ोत्सहे सहितुं वीर तत्र मे क्षन्तुमर्हसि ॥
नैवमागता द्वैधं तव बुद्धिर्महामते ।
ोऽपि धर्म्मो मम द्वेष्यो यत्प्रसङ्गाद्विमुह्यसि ॥
थं त्वं कर्म्मणा शक्तः कैकेयीवशवर्त्तिनः ।
रिष्यसि पितुर्वाक्यमधर्म्मिष्ठं विगर्हितम् ॥
त्रमापि कथं कामं कुर्य्यास्त्वं कामवृत्तयोः ।
ोरहितयोर्नित्यं शत्र्वोः पित्रभिधानयोः ॥
दीयं प्रतिपत्तिस्ते दैवी चापि तयोर्मता ।
थाप्युपेक्षणीयं ते न मे तदपि रोचते ॥
क्लवो वीर्य्यहीनो यः स दैवमनुवर्त्तते ।
ीराः सम्भावितात्मानो न दैवं पर्य्युपासते ॥
ोकपालाः समस्तास्ते नाद्य रामाभिषेचनम् ।
च कृत्स्नास्त्रयो लोकाः विहन्युः किं पुनः पिता ॥
विवासस्तवारण्ये मिथो राजन् समर्थितः ।
रण्ये ते निवत्स्यन्ति चतुर्द्दश समा ध्रुवम् ॥
हं तदाशां धक्ष्यामि पितुस्तस्याश्च या तव ।
भिषेकविघातेन पुत्रराज्याय वर्त्तते ॥
ोभार्थाविमौ बाहू न धनुर्भूषणाय मे ।

नाभिरक्षणमार्थाय न भर्त्ता भूषणाय वै ।
अभितमप्यनार्याय सर्व्वमेतच्चतुष्टयम् ॥
कल्पिता नीचाधारेण विद्युज्ज्वलितवर्च्चसा ।
सम्प्रहीतेन वै शत्रुं वज्रिणं न समर्थये ॥
खड्गानाधेयनिर्म्मिष्टैर्गोदना दुन्दुरा च मे ।
कृत्यमर्थापहर्त्तॄणां रिपूणामभिमर्द्दिना मर्त्त्या ॥

मत्वा रामस्य संरम्भं लक्ष्मणं पितरं प्रति ।
उक्त्वा सानुनयैर्वाक्यैः शमयामास राघवः ॥
पुरुषोत्तमस्तु धर्म्मात्मा सत्यधर्म्मपरायणः ।
पार्थिवो नानृतः कर्त्तुं न्याय्यो लोकगुरुर्मया ॥
सत्यप्रतिज्ञं कृत्वा तु पितरं धर्म्मवत्सलम् ।
एष्यां कीर्त्तिमवाप्स्यामि प्रेत्य चेह च शाश्वतीम् ।
यदि त्वमसि मयि स्नेहो भक्तिर्वा तव लक्ष्मण ।
ततो निवर्त्तयैनां त्वं पापबुद्धिं समुत्थिताम् ।
धर्म्मात्मनः प्रभवतः कृतज्ञस्य महात्मनः ।
पितुरस्याप्रियं कर्त्तुं नेच्छामि मनसाप्यहम् ॥
यदीच्छसि प्रियं कर्त्तुं मम नित्यमभीप्सितम् ।
ततो मयि गते भक्त्या शुश्रूष्यो नृपतिस्त्वया ।
निर्व्यलीकेन मनसा प्रत्यक्षं दैवतं यथा ॥
यथा यथा च तप्येत वनवासं गते मयि ।

मातॄणाञ्चाविशेषेण शुश्रूषा सर्व्वशस्त्वया ॥
भरतश्चापि धर्म्मात्मा द्रष्टव्योऽहमिव त्वया ।
प्रतिपाल्यास्तु यत्नेन मम प्रियचिकीर्षुणा ॥

इत्युक्तवचनं रामं बभाषे लक्ष्मणस्तदा ।
सानुकम्पं स्थितं धर्म्मे पुरन्दरमिवानुजः ॥
लोकनाथ गतिर्या ते सा ममापि भविष्यति ।
वने वत्स्याम्यहमपि शुश्रूषानिरतस्तव ॥
त्वया त्यक्तामहमपि परित्यक्ष्ये पुरीमिमां ।
त्वदृते नहि मे वस्तुं स्वर्गेऽपि रमते मनः ॥
धनुर्द्धर यदि ते स्नेहो भक्तोऽयं वीर मामिति ।
ततो मामनुगच्छन्तं न निवर्त्तितुमर्हसि ॥
वने निवसतस्तेऽहं नानावनविचारिणः ।
आहरिष्यामि पुष्पाणि स्वादूनि च फलानि च ॥
सहायस्ते भविष्यामि दुर्गेषु विषमेषु च ।
आज्ञाकरस्ते भृत्योऽहं भविष्यामि महावने ॥
सर्व्वभावानुरक्तं मां न परित्यक्तुमर्हसि ।
त्वञ्च नामार्य्यपुत्रस्त्वं पूज्यश्चापि गुरुश्च मे ॥
पानीयमाहरिष्यामि पुष्पमूलफलानि च ।
साधयिष्यामि चाहारं वने निवसतस्तव ॥
अनुजानीहि मामार्य्य निश्चितं धर्म्मवत्सल ।

कनमन्तं कृतमतिं कृतज्ञं शरणागतम् ।
न निवर्त्तयितव्योऽहं सर्व्वथा रघुनन्दन
नहि राम त्वया त्यक्तो जीवेयमिति मे मतिः ॥
न निवर्त्तयितुं शक्या भ्रातृसेवा मम स्थिरा ।
स भवाननुज्ञानात् ममानुगमनं वने ॥

सोऽनुनीतो बहुविधं लक्ष्मणेन यशस्विना ।
बाढमित्यब्रवीद्रामो लक्ष्मणं भ्रातृवत्सलम् ॥
सह यास्यामि सौमित्रे त्वयाहं गहनं वनम् ।
भवान् हि परमो बन्धुः सखा भक्तः प्रियश्च मे ॥

एवं रामवचः श्रुत्वा लक्ष्मणानुनयं तथा ।
दीर्घमुष्णञ्च निश्वस्य कौशल्या वाक्यमब्रवीत् ॥
यदि धर्म्मं पुरस्कृत्य पुत्र वर्त्तितुमिच्छसि ।
ततो मे वचनं धर्म्मज्ञ शृणु धर्म्मभृतां वर ॥
त्वं हि लब्धो मया कृच्छ्रैस्तपोभिर्नियमैस्तथा ।
वचनं मे त्वया कार्य्यमतः पुत्र विशेषतः ॥
आशया परया राम चिरात्त्वं प्रतिपालितः ।
तत् समर्थोऽसि मां दीनां परिरक्षितुमर्हसि ॥
पश्य मामद्य पुत्र त्वं जीवितेन वियोजिताम् ।
न सकामां सपत्नीं मे कैकेयीं कर्त्तुमर्हसि ॥
तथापि राम शक्ताहं विप्रकारान् पृथग्विधान् ।

[illegible]ोढुं सकाशो [illegible] परिभूता विशेषतः ॥
[illegible] कालं [illegible] विप्रवसता मया ।
[illegible]च्छायां समाश्रित्य भवेयं [illegible]मानसा ॥
[illegible] न शक्नोमि जीवितुं गर्व्वितामिमाम् ।
[illegible] जन्मकाले [illegible] ॥
[illegible] कार्य्यैः [illegible]विदस्य भूपतेः ।
[illegible] दुष्कृतेवाप्यचेष्टितैः ॥
[illegible]त्य धर्म्मं पौराणिकाकृतं कुलोचितम् ।
[illegible]तिक्रम्य भवन्तमभिषेक्तुमिच्छति ॥
अपि चेयं पुरा गीता गाथा सर्व्वत्र विश्रुता ।
मनुना मानवेन्द्रेण तां श्रुत्वा मे वचः कुरु ॥
गुरोरप्यवलिप्तस्य कार्य्याकार्य्यमजानतः ।
कामकारप्रवृत्तस्य न कार्य्यं ब्रुवतो वचः ॥
पितॄन् दश च मातैका सर्व्वां वा पृथिवीं विभो ।
गुरुत्वेनाभिभवति नास्ति मातृसमो गुरुः ॥
पतिता गुरवस्त्याज्या माता तु न कथञ्चन ।
गर्भधारणपोषाभ्यां तेन माता गरीयसी ॥
साहं ते पितृतो राम धर्म्मतो गौरवाधिका ।
माननीया विशेषेण यथा धर्म्मविदो विदुः ॥
[illegible]दं समापि ते कार्य्यं शासनं गुरुवत्सल ।

अभिषिच्यस्व धर्म्मेण राज्ये राजीवलोचन ॥

यदि त्वमेतन्मम भाषितं हितं
कुलोचितं सत्पुरुषैर्निषेवितम् ।
यथावदुक्तं न करिष्यसे ततो-
ऽचिरेण यास्यामि यमक्षयं सुत ॥

अथानुनेतुं चक्रेऽसौ मातरं यत्नमास्थितः ।
प्रश्रितैर्मधुरैर्वाक्यैर्हेतुमद्भिश्च राघवः ॥
मम चैव भवत्याश्च राजा प्रभवति प्रभुः ।
न प्रभुत्वमतस्तेऽस्ति मम देवि निवर्त्तने ॥
दातुमर्हसि मेऽनुज्ञां देवि धर्मभृतां वरे ।
वनवासाय वर्षाणि नव पञ्च च सुव्रते ॥
भर्त्ता हि दैवतं स्त्रीणां भर्त्ता चेश्वर उच्यते ।
अतस्तं शासनं भर्त्तुर्न व्याहन्ताध्यसेव हि ॥
पुनरागमनं मे त्वमाशंसयितुमर्हसि ।
पतिव्रता नित्यमेव भर्त्तुराज्ञापरा सती ॥
तीर्णप्रतिज्ञ एष्यामि त्वत्प्रसादादहं पुनः ।
प्रसीद देवि मा कार्षीरिदं शोकमण्वपि ॥
कुले जातासि विस्तीर्णे राज्ञाममिततेजसाम् ।
कुलशीलगुणाचारधर्मज्ञासि च सुव्रते ॥
दैवतं ते गुरुश्चैव भर्त्ता देवि प्रसीद मे ।

...त् स्नेहान्नार्हसे मातर्मतं तस्यातिवर्त्तितुम् ॥
निर्विकारं गुरोराज्ञा मया कार्य्या विशेषतः ।
प्रेयो ह्येवं भवत्याश्च मम चैव भविष्यति ॥
न ते राजा किञ्चिदपि वक्तव्यो मदपेक्षया ।
प्रतीपकमप्रियं वापि नच कार्य्यं प्रसीद मे ॥
कैकेयी वा महाभागा भरतो वा महायशाः ।
वाच्यमप्यप्रियं वाक्यं न वक्तव्यं प्रसीद मे ॥
यथाहमिव द्रष्टव्यो भरतः सर्व्वथा त्वया ।
कैकेयी भगिनीवच्च द्रष्टव्या स्नेहतस्त्वया ॥
पित्रा दत्तं यौवराज्यं भरतो यद्यवाप्स्यति ।
तत्र दोषोऽस्ति कस्तस्य भरतस्य महात्मनः ॥
अभिसृष्टं पुरा राज्ञा कैकेयी भर्त्ततो वरम् ।
यदि गृह्णाति कस्तस्या दोषस्तत् ब्रवीहि मे ॥
राजा च प्राक् प्रतिश्रुत्य ददात्यस्यै यदा वरम् ।
भीतोऽनृतात्तत्र दोषः को राज्ञः सत्यवादिनः ॥
...धर्मार्थतत्त्वो हि साधुः सद्वृत्तमास्थितः ।
सत्यज्ञः सत्यवाक् राजा नहि धर्माच्चलिष्यति ॥
प्रसीदानुनयामि त्वां नानुशास्मि कथञ्चन ।
अनुजानीहि मां मातर्वनवासाय दीक्षितम् ॥
इत्युक्ता जननी रामो धर्मार्थानुगतं वचः ।

स्थिता ध्यानपरा दीना पुनर्व्वचनमब्रवीत् ॥
त्वया देवि मया चैव स्वयं नृपतिनात्मने ।
राजा भर्त्ता गुरुश्चैव सर्व्वेषामीश्वरश्च नः ॥
इमानि तानि वत्स्येऽहं वर्षाणि नव पञ्च च ।
वनात् पुनरुपागत्य स्थास्यामि तव शासने ॥

इत्युक्ता सा प्रियं पुत्रं वाष्पपर्य्याकुलेक्षणा ।
उवाचेदं सपत्नीनां मध्ये वस्तुं न मे क्षमम् ॥
नय मामपि पुत्र त्वं वनं नक्तं मृगाकुलम् ।
यदि ते गमने बुद्धिः कृता पितुरपेक्षया ॥

तां तदा रुदतीं रामः पुनर्व्वचनमब्रवीत् ।
जीवन्त्या हि स्त्रिया भर्त्ता दैवतं न पुनः सुतः ।
भवत्या मम चैवाद्य राजा प्रभवति प्रभुः ॥
ततो नार्हाम्यहं नेतुं त्वामितो नगराद्वनम् ।
नैवानुगन्तुं चार्होऽहं जीवपत्या त्वयापि च ॥
महात्मा चामहात्मा च पतिरेव गुरुः स्त्रियाः ।
किं पुनर्नरपतिर्देवि महात्मा दैवतञ्च ते ।
भरतश्चापि धर्म्मात्मा विनीतो गुरुवत्सलः ।
संभाव्यं यथैवाहं पुत्रस्ते धर्म्मतस्तथा ॥
मत्तोऽधिकतरां पूजां भरतादप्यवाप्स्यसि ।
नहि किञ्चिदकल्याणं तस्मादामर्षयाम्यहम् ॥

तथा न मयि निष्क्रान्ते पुत्रशोकेन मे पिता ।
म्रियेतात्वं न सन्तप्येत्तथा त्वं कर्त्तुमर्हसि ॥
या धर्म्मचारिणी नारी पतिं पतिपरायणा ।
नानुवर्त्तेत धर्म्मेण सा सद्भिर्न प्रशस्यते ।
भर्तृव्रता भर्तृपरा नारी भर्त्तृपरायणा ।
इह कीर्त्तिं परां प्राप्य प्रेत्य स्वर्गे महीयते ॥
तस्मात् सदैव भर्त्तास्त्वं शुश्रूषणीयस्त्वया सते ।
त्वमनुमर्हसि धर्म्मो हि सत्स्त्रीणां सम शाश्वतः ॥
गार्हस्थ्यधर्म्मरतया देवाराधनशीलया ।
भर्त्तृचित्तानुवर्त्तिन्या भर्त्ता सेव्य इह त्वया ॥
वसेह भर्तृसहिता समागमनकाङ्क्षिणी ।
द्रक्ष्यसे भर्त्तृसहिता समाभ्यागमनं पुनः ॥

तं समीक्ष्य व्यवसितं पितुर्निर्द्देशपालने ।
कौशल्या वाष्पसंरुद्धा वचो धर्म्मिष्ठमब्रवीत् ॥
अदृष्टदुःखो धर्म्मात्मा सर्व्वभूतप्रियंवद ।
मयि जातो दशरथात् कथमुञ्छेन वर्त्तयेत् ॥
यस्य भृत्याश्च दासाश्च सान्न्यन्नानि भुञ्जते ।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम् ॥
कः श्रद्दध्यादिदं श्रुत्वा कस्य वा न भवेद्भयम् ।
गुणवान् दयितो राज्ञा राघवो यद्विवास्यते ॥

त्वया विहीनामिह मां शोकाग्निरतुलो महान्।
प्रधक्ष्यति यथा कक्षं चित्रभानुर्हिमात्यये॥
यथापि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति।
तथा त्वामनुयास्यामि वात्सल्यादिति मे मतिः॥

इति मातुर्निगदितं वाक्यं स करुणाकरम्।
श्रुत्वा रामोऽब्रवीद्वाक्यं कौसल्यां शोकविह्वलाम्॥
कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते।
भवत्या च परित्यक्तो न नूनं वर्तयिष्यति॥
भर्तुः किल परित्यागो नृशंसः केवलं स्त्रियाः।
स भवत्या न कर्तव्यो मनसापि विगर्हितः॥
यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः।
शुश्रूषा क्रियतां तावत् स हि धर्मः सनातनः॥
नाहं त्वयानुगन्तव्यो भर्ता हि तव दैवतम्।
तमिहैव वसन्ती त्वमाराधयितुमर्हसि॥
राजा हि ते प्रभवति प्राणानां जीवितस्य च।
अनुगन्तुमतो देवि न मामर्हसि सर्वथा॥
इति सानुनयं वाक्यं श्रुत्वा धर्माभिसंहितम्।
रामेणोक्तं बभाषेऽथ कौसल्या साश्रुलोचना॥
गच्छ पुत्र शिवं तेऽस्तु कुरु त्वं पितृशासनम्।
स्वस्तिमन्तमरिष्टं त्वां द्रक्ष्यामि पुनरागतम्॥

शुश्रूषानिरता भर्त्तुर्भविष्यामि यथात्थ माम्।
यच्चान्यदपि कर्त्तव्यं करिष्ये तत् सखी व्रज॥

वनप्रस्थानकाले पितरमामन्त्रयितुं
रामस्य नृपभवनप्रवेशः।

दत्त्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु।
जग्मतुः पितरं द्रष्टुं सीतया सह राघवौ॥
सहार्त्तिं सानुजं दृष्ट्वा ससीतञ्च जनास्तदा।
ऊचुर्बहुविधा वाचः शोकोपहतचेतसः॥
यं यान्तमनुयाति स्म चतुरङ्गबलं महत्।
तमेकं सीतया सार्द्धमनुयाति स लक्ष्मणः॥
ऐश्वर्य्यस्य रसज्ञः सन् कामानाञ्चाकरो महान्।
नेच्छत्येवानृतं कर्त्तुं वचनं धर्मगौरवात्॥
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि।
तामद्य सीतां पश्यन्ति राजमार्गगता जनाः॥
अङ्गरागोचितां सीतां रक्तचन्दनसेविनीम्।
वर्षमुष्णञ्च शीतञ्च नेष्यत्याशु विवर्णताम्॥
अद्य नूनं दशरथः सत्त्वमाविश्य भाषते।
न हि राजा प्रियं पुत्रं विवासयितुमर्हति॥

निर्गुणस्यापि पुत्रस्य कथं स्याद्विप्रवासनम्।
किं पुनर्यस्य लोकोऽयं जितो वृत्तेन साधुना॥
आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः।
राघवं शोभयन्त्येते षड्गुणाः पुरुषर्षभम्॥
तस्मात्तस्योपघातेन प्रजाः परमपीडिताः।
औदकानीव सत्त्वानि ग्रीष्मे सलिलसंक्षयात्॥
पीडया पीडितं सर्वं जगदस्य जगत्पतेः।
मूलस्येवोपघातेन वृक्षः पुष्पफलोपगः॥
मूलं ह्येष मनुष्याणां धर्मसारो महाद्युतिः।
पुष्पं फलञ्च पत्रञ्च शाखाश्चास्येतरे जनाः॥
ते लक्ष्मण इव क्षिप्रं सपत्न्यः सहबान्धवाः।
गच्छन्तमनुगच्छामो यत्र गच्छति राघवः॥
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च।
एकदुःखसुखा राममनुगच्छाम धार्मिकम्॥
समुद्धृतनिधानानि परिध्वस्ताजिराणि च।
उपात्तधनधान्यानि हृतसाराणि सर्वशः॥
रजसाभ्यवकीर्णानि हीनसम्मार्जनानि च।
मूषकैः परिधावद्भिरुद्बिलैराहतानि च॥
अपेतोदकधूमानि भिन्नभाजनवन्ति च।
अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम्

वनं गमनमेवास्तु यत्र गच्छति राघवः ।
त्वयाभिश्च परित्यक्तं पुरं सम्पद्युतं वनम् ॥
त्यजन्ति दंष्ट्रिणः सर्वे यान्ति खगपक्षिणः ।
नागाश्चाश्वरथाङ्गीना गजाः सिंहा वनान्यपि ॥
इत्थं त्रिविधा वाचो नानारूपसमन्विताः ।
श्रुत्वा राघवः श्रुत्वा न विलम्ब्य काननम् ॥
स नृपस्य दुर्वचनं कै[illegible] ।
अभिरकाम धर्मात्मा मत्तमातङ्गविक्रमः ॥
प्रागद्वारमागते रामे सभार्ये सहलक्ष्मणे
बाष्पपूर्णमुखो दीनो चिन्तातापातुरो नृपः ॥
कृतार्थ्यै मनोभिते सकामा भव कैकयि ।
गते मयि गते रामे वनं मनुजकुञ्जरे ॥
त्यजामि भरतं त्वाञ्च जीवितञ्चेदमात्मनः ।
पुत्रं च विधवा राज्यं निर्घृणा रक्षिता सदा ॥
अहं विहीनो रामेण त्यक्ता जीवितमात्मनः ।
भविष्यामि न ते पापे भूय एवं वशानुगः ॥
केन मन्त्रयसे मूढे किं समन्त्रयसे शुभम् ।
मज्जीवितविनाशाय कष्टं नष्टमोहजम् ॥
अरण्यं भजतां रामो भरतस्त्वाभिषिच्यताम् ।
इति कस्य मतं पापे सोवाचास्य दुरात्मनः ॥

आर्यो ह्यसौ कथं राज्यं भरतः पालयिष्यति ।
ज्येष्ठे तिष्ठति राज्यार्हे रामे राजीवलोचने ॥
कालरात्रीव निर्दिष्टा भार्य्यारूपेण केकयी ।
कथं त्वं क्षीणपुण्यस्य न मयाऽऽज्ञा मन्दबुद्धिना ॥
नारीणां हि गतस्नेहानां कृतघ्नानां विशेषतः ।
त्यजन्ति स्वजनान् भर्तॄन् या लुब्धा धनतृष्णया ॥
निर्गुणं निरनुक्रोशं कीदृशं हृदयं तव ।
अरण्याय याचमानं यन्मां त्वं त्यक्तुमिच्छसि ॥
नश्यन्तु साधु ते लोकाः पश्यन्त्येव कृतावहः ।
यन्मां प्रियेण पुत्रेण वियोजयसि दुःखितम् ॥
उचितं शिबिकायानं गजयानञ्च मे सुतः ।
कान्तारवनदुर्गेषु कथं पद्भ्यां चरिष्यति ॥
स्वादूनामन्नपानानामुचितोऽयं ममात्मजः ।
सुकुमारो विलासी च सदाभरणभूषितः ॥
कटुतिक्तकषायाणि मूलानि च फलानि च ।
वल्कलाजिनसंवीतः स कथं भक्षयिष्यति ॥
यदि नाम स धर्म्मात्मा ममातिक्रम्य शासनम् ।
नेच्छेद्गन्तुं प्रियं मे स्यान्न तु वचः करिष्यति ॥
हा शुद्धभाव धर्मात्मन् विनीत गुरुवत्सल ।
मरामि पितृमान् पुत्र त्वद्वियोगेन हतात्मना ॥

श्रीसहस्रगुणश्चैव प्राणैः प्रियतरं सुतम् ।
तं त्यक्तुं गुणग्रामं रामं मे धीयते मतिः ॥
...ऽहं सर्वथैव धिगस्तु माम् ।
...दर्शितं पूर्वं स्त्रीजितो यस्य जाम्यहम् ॥
किं मां वक्ष्यति लोकोऽयं नृशंसं पापकारिणम् ।
...सुतं स्त्रीकृते मह्यं ... ॥
वशिष्ठो वामदेवश्च जाबालिः काश्यपस्तथा ।
किं मां वक्ष्यन्ति ते दृष्ट्वा किमन्ये ब्रह्मवादिनः ॥
किम्वा ...नः ।
पृथिव्यां पृथिवीपालाः किन्नु वक्ष्यन्ति साधवः ॥
...सर्वथा ।
...वरद्वयम् ॥
...ऽस्मि प्रनष्टोऽस्मि दग्धोऽस्मि व्याकुलेन्द्रियः
...पापसेविनः ॥

इति राजा दशरथः पुत्रशोकाकुलेन्द्रियः ।
...सुरां पीत्वेव वेदवित् ॥
...विलपतस्तस्य दुःखार्त्तस्य महीपतेः ।
...त्यावेदयामास सुमन्त्रो राममागतम् ॥
प्रवेश्यतां राम इति वाक्यमुक्त्वा नराधिपः ।
...शोकसमाविष्टो भूयो मोहमुपागतः ॥

मुहूर्त्तमिव निश्चेष्टो भूत्वा मोहपरायणः ।
प्रतिलेभे पुनः संज्ञां सिंहासनगतो नृपः ॥
लब्धसंज्ञन्तु तं भूयः सुमन्त्रः पृथिवीपतिम् ।
उपेत्य प्राञ्जलिर्वाक्यमुवाचेदं सुदुःखितम् ॥
अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः ।
ब्राह्मणेभ्यो धनं दत्त्वा सर्व्वेषां चोपजीविनाम् ॥
स त्वां पश्यतु भद्रं ते रामः सत्यपराक्रमः ।
सर्व्वान् सुहृद आपृच्छ्य त्वां हीदानीं दिदृक्षते
गमिष्यति महारण्यं तं पश्य जगतीपते ।
वृतं राजगुणैः सर्व्वैरादित्यमिव रश्मिभिः ॥
स सत्यवादी धर्म्मात्मा गाम्भीर्य्ये सागरोपमः ।
उवाच राजा तं सूतं सुमन्त्रानय मे सुतम् ॥
स सूतो राममादाय लक्ष्मणं मैथिलीं तथा ।
जगामाभिमुखस्तूर्णं सकाशं जगतीपतेः ॥
सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशाम्पतिः ।
तमसम्प्राप्य दुःखार्त्तः पपात भुवि मूर्च्छितः ॥
तं रामोऽभ्यपतत् क्षिप्रं लक्ष्मणश्च महारथः ।
विसंज्ञमिव दुःखेन सशोकं नृपतिं तथा ॥
तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ ।
पर्य्यङ्के सीतया सार्द्धं रुदन्तः समवेशयन् ॥

अथ रामो मुहूर्त्तस्य लब्धसंज्ञं महीपतिम् ।
उवाच प्राञ्जलिर्भूत्वा शोकार्णवपरिप्लुतम् ॥
आपृच्छे त्वां महाराज सर्व्वेषामीश्वरोऽसि नः ।
प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् ॥
लक्ष्मणञ्चानुजानीहि सीता चान्वेतु मां वनम् ।
कारणैर्बहुभिस्तथ्यैर्वार्य्यमाणौ न चेच्छतः ॥
अनुजानीहि नः सर्व्वान् शोकमुत्सृज्य मानद ।
लक्ष्मणं मां च सीताञ्च प्रजापतिरिवात्मजान् ॥
प्रतीक्षमाणमव्यग्रमनुज्ञां जगतीपतेः ।
उवाच राजा संप्रेक्ष्य वनवासाय राघवम् ॥
अहं राघव कैकेय्या वरदानेन मोहितः ।
अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् ॥

एवमुक्तो नृपतिना रामो धर्म्मभृतां वरः ।
प्रत्युवाचाञ्जलिं कृत्वा पितरं वाक्यकोविदः ॥
भव वर्षसहस्राय पृथिव्या नृपते पतिः ।
अहं त्वरण्ये वत्स्यामि न मे राज्यस्य काङ्क्षिता ॥
नव पञ्च च वर्षाणि वनवासे विहृत्य ते ।
पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप ॥
रुदन्नार्त्तः प्रियं पुत्रं सत्यपाशेन संयतः ।
कैकेय्या चोद्यमानस्तु मिथो राजा तमब्रवीत् ॥

श्रेयसे वृद्धये तात पुनरागमनाय च।
गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयः॥
नहि सत्यात्मनस्तात धर्माभिमनसस्तव।
सन्निवर्तयितुं बुद्धिः शक्यते रघुनन्दन॥
अद्य त्विदानीं रजनीं पुत्र मा गच्छ सर्वथा।
एकाहं दर्शनेनापि साधु तावच्चराम्यहम्॥
मातरं माञ्च सम्पश्यन् वसेमामद्य शर्व्वरीम्।
तर्पितः सर्व्वकामैस्त्वं श्वः काल्ये साधयिष्यसि॥
दुष्करं क्रियते पुत्र सर्व्वथा राघव प्रिय।
त्वया हि मत्प्रियार्थन्तु वनमेवमुपाश्रितम्॥
न चैतन्मे प्रियं पुत्र शपे सत्येन राघव।
छन्नया चलितस्त्वस्मि स्त्रिया भस्माग्निकल्पया॥
वञ्चना या तु मे लब्धा तां त्वं निस्तर्त्तुमिच्छसि।
अनया वृत्तसादिन्या कैकेय्याभिप्रचोदितः॥
न चैतदाश्चर्य्यतमं यत्त्वं ज्येष्ठः सुतो मम।
अपावृतकथं पुत्र पितरं कर्त्तुमिच्छसि॥

अथ रामस्तदा श्रुत्वा पितुरार्त्तस्य भाषितम्।
लक्ष्मणेन सह भ्राता दीनो वचनमब्रवीत्॥
प्राप्स्यामि यानद्य गुणान् को मे श्वस्तान् प्रदास्यति।
अपक्रमणमेवातः सर्व्वकामैरहं वृणे॥

इदं सुराष्ट्रा सजना धनधान्यसमाकुला ।
मया विसृष्टा वसुधा भरताय प्रदीयताम् ॥
यस्तु युद्धे वरो दत्तः कैकेय्यै वरद त्वया ।
दीयतां निखिलेनैव सत्यस्त्वं भव पार्थिव ॥
अहं निदेशं भवतो यथोक्तमनुपालयन् ।
चतुर्दश समा वत्स्ये वने वनचरैः सह ।
मा विमर्शो वसुमती भरताय प्रदीयताम् ॥
नहि मे कांक्षितं राज्यं न सुखं वा तथा प्रियम् ।
यथा निदेशं कर्त्तुं वै तवैव रघुनन्दन ॥
अपगच्छतु ते दुःखं मा भूर्बाष्पपरिप्लुतः ।
नहि क्षुभ्यति दुर्धर्षः समुद्रः सरितांपतिः ॥
नैवाहं राज्यमिच्छामि न सुखं नच मेदिनीम् ।
नैव सर्वानिमान् कामान् न स्वर्गं नच जीवितम् ॥
त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ ।
प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे ॥
न च शक्यं मया तात स्थातुं क्षणमपि प्रभो ।
स शोकं धारयस्वेमं नहि मेऽस्ति विपर्य्ययः ॥
अर्थितो ह्यस्मि कैकेय्या वनं गच्छेति राघव ।
मया चोक्तं व्रजामीति तत् सत्यमनुपालये ॥
मा चोत्कण्ठां कृथा देव वने रंस्यामहे वयम् ।

प्रशान्तहरिणाकीर्णे नानाशकुनिनादिते ॥
पिता हि दैवतं तात देवतानामपि स्मृतम् ।
तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ॥
चतुर्दशसु वर्षेषु गतेषु नरसत्तम ।
पुनर्द्रक्ष्यसि मां प्राप्तं सन्तापोऽयं विमृच्यताम् ॥
येन संस्तम्भनीयोऽयं सर्वो बाष्पाकुलो जनः ।
स त्वं पुरुषशार्दूल किमर्थं विक्रियां गतः ॥

फलानि मूलानि च भक्षयन् वने
गिरींश्च पश्यन् सरितः सरांसि च ।
वनं प्रविश्यैव विचित्रपादपं
सुखी भविष्यामि तवास्तु निर्वृतिः ॥

एवं स राजा व्यसनाभिपन्न-
स्तापेन दुःखेन च पीड्यमानः ।
आलिङ्ग्य पुत्रं परिनष्टसंज्ञो
भूमिं गतो नैव विवेद किञ्चित् ॥

देव्यः समस्ता रुरुदुः समेता-
स्तां वर्जयित्वा नरदेवपत्नीम् ।
रुदन् सुमन्त्रोऽपि जगाम मूर्च्छां
हाहाकृतं तत्र बभूव सर्वम् ।

[illegible] सर्व्वो मङ्क्षिष्यत्ता विवत्सा इव धेनवः ।
दुस्त्व दुःखार्त्ताः सर्व्वत्र विचक्रमुः ॥
[illegible]जन् कवलान् नागा गावो वत्सान् न पाययन् ।
पुत्रं प्रथमजं दृष्ट्वा जननी नाभ्यनन्दत ॥
[illegible] पर्य्याकुलाः सर्व्वादिक्षिरेणेव संवृताः ।
न वाति पवनः शीतो न शशी सौम्यदर्शनः ।
न सूर्य्यस्तपते लोकं सर्व्वं पर्य्याकुलं जगत् ॥
[illegible]कलागाराः सर्व्वो जनो दैन्यमुपागमत् ।
[illegible]आहारे वा विहारे वा न कश्चिदकरोन्मनः ॥
पर्य्याकुलमनो राजमार्गगतो जनः ।
न हृष्टो लक्ष्यते कश्चित् सर्व्वः शोकपरायणः ॥

मातुलकुलादाकारित प्रत्यागतस्य भरतस्य पितुरालये
पितरमपश्यतो मातुरालयप्रवेशः ।

अपश्यंस्तु ततस्तत्र पितरं पितुरालये ।
जगाम भरतो द्रष्टुं मातरं मातुरालये ॥
अनुप्राप्तं तु तं दृष्ट्वा कैकेयी प्रोषितं सुतम् ।
उत्पपात तदा हृष्टा त्यक्त्वा सौवर्णमासनम् ॥
स प्रविश्यैव धर्मात्मा स्वं गृहं श्रीविवर्जितम् ।
भरतः प्रतिजग्राह जनन्याश्चरणौ शुभौ ॥

तं मूर्द्ध्नि समुपाघ्राय परिष्वज्य यशस्विनम् ।
अङ्के भरतमारोप्य प्रष्टुं समुपचक्रमे ॥
अद्य ते कतिचिद्रात्र्यश्च्युतस्यार्य्यकवेश्मनः ।
अपि नाध्वश्रमः शीघ्रं रथेनापततस्तव ॥
आर्य्यकस्ते सुकुशली युधाजिन्मातुलस्तव ।
प्रवासाच्च सुखं पुत्र सर्व्वं मे वक्तुमर्हसि ॥
एवं पृष्टस्तु कैकेय्या प्रियं पार्थिवनन्दनः ।
आचष्ट भरतः सर्व्वं मात्रे राजीवलोचनः ॥
अद्य मे सप्तमी रात्रिश्च्युतस्यार्य्यकवेश्मनः ।
अम्बायाः कुशली तातो युधाजिन्मातुलश्च मे ॥
राजवाक्यहरैर्दूतैस्त्वर्य्यमाणोऽहमागतः ।
यदहं प्रष्टुमिच्छामि तदम्बा वक्तुमर्हति ॥
शून्योऽयं शयनीयस्ते पर्य्यङ्को हेमभूषितः ।
न चायमिक्ष्वाकुजनः प्रहृष्टः प्रतिभाति मे ॥
राजा भवति भूयिष्ठमिहाम्बाया निवेशने ।
तमहं नाद्य पश्यामि द्रष्टुमिच्छन्निहागतः ॥
तं प्रत्युवाच कैकेयी प्रियवद्घोरमप्रियम् ।
अजानन्तमजानन्ती राज्यलोभेन मोहिता ॥
या गतिः सर्व्वभूतानां तां गतिं ते पिता गतः ।
राजा महात्मा तेजस्वी यायजूकः सतां गतिः ॥

तच्छ्रुत्वा भरतो वाक्यं धर्म्माभिजनवान् शुचिः ।
पपात सहसा भूमौ पितृशोकबलार्दितः ॥
हा हतोऽस्मीति कृपणां दीनां वाचमुदीरयन् ।
निपपात महाबाहुर्बाहू विक्षिप्य वीर्य्यवान् ॥
समार्त्तं देवसङ्काशं समीक्ष्य पतितं भुवि ।
निकृत्तमिव शालस्य स्कन्धं परशुना वने ।
माता मातङ्गसङ्काशं चन्द्रार्कसदृशं सुतम् ।
उत्थापयित्वा शोकार्त्तं वचनञ्चेदमब्रवीत् ॥
उत्तिष्ठोत्तिष्ठ किं शेषे राजपुत्र महायशः ।
त्वद्विधा नहि शोचन्ति सन्तः सदसि सम्मताः ॥

स रुदित्वा चिरं कालं भूमौ परिविवृत्य च ।
जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः ॥
अभिषेक्ष्यति रामं नु राजा यज्ञं नु यक्ष्यते ।
इत्यहं कृतसङ्कल्पो हृष्टो यात्रामयासिषम् ॥
तदिदं ह्यन्यथाभूतं व्यवदीर्णं मनो मम ।
पितरं यो न पश्यामि नित्यं प्रियहिते रतम् ॥
अम्ब केनात्यगाद्राजा व्याधिना मय्यनागते ।
धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम् ॥
न नूनं मां महाराजः प्राप्तं जानाति कीर्त्तिमान् ।
उपजिघ्रेद्धि मां मूर्द्धि तातः संनम्य सत्वरम् ।

क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ।
यो हि मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥
यो मे भ्राता पिता बन्धुर्यस्य दासोऽस्मि धीमतः ।
तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥
पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः ।
तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम ॥
आर्ये किमब्रवीद्राजा पिता मे सत्यविक्रमः ।
पश्चिमं साधु सन्देशमिच्छामि श्रोतुमात्मनः ॥
इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ।
रामेति राजा विलपन् हा सीते लक्ष्मणेति च ।
स महात्मा परं लोकं गतो गतिमतां वरः ॥
इति मां पश्चिमं वाक्यं व्याजहार पिता तव ।
कालधर्मपरिक्षिप्तः पाशैरिव महागजः ॥
सिद्धार्थास्तु नरा राममागतं सह सीतया ।
लक्ष्मणञ्च महाबाहुं द्रक्ष्यन्ति पुनरागतम् ॥
तच्छ्रुत्वा विषसादैव द्वितीयाप्रियशंसनात् ।
विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥
क्व चेदानीं स धर्मात्मा कौसल्यानन्दवर्धनः ।
लक्ष्मणेन सह भ्रात्रा सीतया च समागतः ॥
तथा पृष्टा यथान्यायमाख्यातुमुपचक्रमे ।

मातास्य युगपद्वाक्यं विप्रियं प्रियशङ्कया ॥
स हि राजसुतः पुत्र चीरवासा महावनम् ।
दण्डकान् सह वैदेह्या लक्ष्मणानुचरो गतः ॥
तच्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशङ्कया ।
स्वस्य वंशस्य माहात्म्यात् प्रष्टुं समुपचक्रमे ॥
कच्चिन्न वै परधनं हृतं रामेण कर्हिचित् ।
कच्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥
कच्चिन्न परदारान् वा राजपुत्रोऽभिमन्यते ।
कस्मात् स दण्डकारण्ये भ्रूणहेव विवासितः ॥

एवमुक्ता तु कैकेयी भरतेन महात्मना ।
उवाच वचनं हृष्टा वृथापण्डितमानिनी ॥
न वा परधनं किञ्चित् हृतं रामेण कर्हिचित् ।
कश्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥
न रामः परदारांश्च चक्षुर्भ्यामपि पश्यति ॥
मया तु पुत्र श्रुत्वैव रामस्येहाभिषेचनम् ।
याचितस्ते पिता राज्यं रामस्य च विवासनम् ॥
स स्ववृत्तिं समास्थाय पिता ते तत्तथाकरोत् ।
रामस्तु सहसौमित्रिः प्रेषितः सह सीतया ॥
तमपश्यन् प्रियं पुत्रं महीपालो महायशाः ।
पुत्रशोकपरिद्यूनः पञ्चत्वमुपपेदिवान् ॥

त्वया त्विदानीं धर्म्मज्ञ राजत्वमवलम्ब्यताम् ।
त्वत्कृते हि मया सर्व्वमिदमेवंविधं कृतम् ॥
मा शोकं मा च सन्तापं धैर्य्यमाश्रय पुत्रक ।
त्वदधीना हि नगरी राज्यं चैतदनामयम् ॥
श्रुत्वा तु स पितुर्वृत्तं भ्रातरौ च विवासितौ
भरतो दुःखसन्तप्त इदं वचनमब्रवीत् ॥
किन्नु कार्य्यं हतस्येह मम राज्येन शोचतः ।
विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥
दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः ।
राजानं प्रेतभावस्थं कृत्वा रामञ्च तापसम् ।
कुलस्य त्वमभावाय कालरात्रिरिवागता ॥
त्वां प्राप्य हि पितासेऽद्य सत्यसन्धो महायशाः ।
तीव्रदुःखाभिसन्तप्तो हतो दशरथो नृपः ॥
विनाशितो महाराजः पिता मे धर्म्मवत्सलः ।
कस्मात् प्रव्राजितो रामः कस्मादेव वनं गतः ॥
सव्वार्य्योऽपि च धर्म्मात्मा त्वयि वृत्तिमनुत्तमाम् ।
वर्त्तते गुरुवृत्तिज्ञो यथा मातरि वर्त्तते ॥
तथा ज्येष्ठा हि मे माता कौशल्या दीर्घदर्शिनी ।
त्वयि धर्म्मं समास्थाय भगिन्यामिव वर्त्तते ॥
तस्याः पुत्रं महात्मानं चीरवल्कलवाससम् ।

अपापदर्शिनं शूरं कृतात्मानं यशस्विनम् ।
प्रव्राज्य वनवासाय कथं पापे न शोचसि ॥
अहं हि पुरुषव्याघ्रावपश्यन् रामलक्ष्मणौ ।
केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे ॥
तथापि मे भवेच्छक्तिर्योगैर्बुद्धिबलेन वा ।
सकामां न करिष्यामि त्वामहं पुत्रगर्द्धिनीम् ॥
न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम् ।
यदि रामस्य नापेक्षा त्वयि स्यान्मातृवत् सदा ॥
उत्पन्ना तु कथं बुद्धिस्तवेयं पापदर्शिनी ।
साधुचारित्रविभ्रष्टे पूर्व्वेषां नो विगर्हिता ॥
अस्मिन् कुले हि सर्व्वेषां ज्येष्ठो राज्येऽभिषिच्यते
अपरे भ्रातरस्तस्मिन् प्रवर्त्तन्ते समाहिताः ॥
नहि मन्ये नृशंसे त्वं राजधर्म्ममवेक्षसे ।
गतिं वा न विजानासि राजवृत्तस्य शाश्वतीम् ॥
न तु कामं करिष्यामि तवाहं पापनिश्चये ।
यया व्यसनमारब्धं जीवितान्तकरं मम ॥
एष त्विदानीमेवाहमप्रियार्थं तवानघे ।
निवर्त्तयिष्यामि वनाद्भ्रातरं स्वजनप्रियम् ॥
निवर्त्तयित्वा रामञ्च तस्याहं दीप्ततेजसः ।
दासभूतो भविष्यामि सुस्थिरेणान्तरात्मना ॥

इत्येवमुक्त्वा भरतो महात्मा
प्रियेतरैर्वाक्यगणैस्तुदंस्ताम् ।
शोकार्दितश्चापि ननाद भूयः
सिंहो यथा मन्दरकन्दरस्थः ॥

तां तथा गर्हयित्वा तु मातरं भरतस्तदा ।
रोषेण महताविष्टः पुनरेवाब्रवीद्वचः ॥
राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि ।
परित्यक्तासि धर्म्मेण माकृते रुदती भव ॥
किन्नु तेऽदूषयद्रामो राजा वा भृशधार्म्मिकः ।
ययोर्मृत्युर्विवासश्च त्वत्कृते सममागतौ ॥
कैकेयि नरकं गच्छ मा च तातसलोकताम् ।
यत्त्वया हीदृशं पापं कृतं घोरेण कर्म्मणा ॥
त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः ।
अयशो जीवलोके च त्वयाहं प्रतिपादितः ॥
मातृरूपे ममामित्रे नृशंसे राज्यकामुके ।
न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥
कौसल्या च सुमित्रा च याश्चान्या मम मातरः ।
दुःखेन महताविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥
न त्वमश्वपतेः कन्या धर्म्मराजस्य धीमतः ।
राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥

यत्त्वया धार्म्मिको रामो नित्यं सत्यपरायणः ।
वनं प्रस्थापितो वीरः पितापि त्रिदिवं गतः ॥
राजपुत्री च साध्वी च विवत्सा यत्त्वया कृता ।
तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे ॥
आनाय्य च महाबाहुं कोशलेन्द्रं महाबलम् ।
स्वयमेव प्रवेक्ष्यामि नूनं मुनिनिषेवितम् ॥
नह्यहं पापसङ्कल्पे पापे पापं त्वया कृतम् ।
शक्तो धारयितुं पौरैरश्रुकण्ठैर्निरीक्षितः ॥
सा त्वमग्निं प्रविश वा स्वयं वा विश दण्डकान् ।
रज्जुं बधान वा कण्ठे नहि तेऽन्यत् परायणम् ॥
अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे ।
कृतकृत्यो भविष्यामि विप्रवासितकल्मषः ॥
इति नाग इवारण्ये तोमराङ्कुशतोदितः ।
पपात भुवि संक्रुद्धो निःश्वसन्निव पन्नगः ॥
अथ तत्राययौ भ्रातुस्तत् श्रुत्वा लक्ष्मणानुजः ।
स समुत्थापयामास शत्रुघ्नो भरतं तदा ॥
श्रुत्वा प्रव्राजितं रामं कुब्जाभेदितया तया ।
कैकेय्या दुःखशोकार्त्तः शत्रुघ्नोऽप्यब्रवीदिदम् ॥
विज्ञानार्थीश्वरः सत्त्वः सर्व्वभूतहिते रतः ।
स्त्रिया नाम वनं रामः कथं प्रव्राजितोऽग्रजः ॥

बलवीर्य्याभिसम्पन्नो लक्ष्मणो लक्ष्मिवर्द्धनः ।
किं नाभिषिक्तवान् रामं कृत्वापि पितृनिग्रहम् ॥
इत्येवं भाषमाणेऽथ शत्रुघ्ने लक्ष्मणानुजे ।
प्राग्द्वारेऽभूत्तदा कुब्जा सर्वाभरणभूषिता ।
चन्दनागुरुदिग्धाङ्गी महार्हाम्बरसंवृता ॥
समीक्ष्य तां ततो द्वाःस्थो भृशं पापस्य कारिणीम् ।
गृहीत्वा त्वरितं कुब्जां शत्रुघ्नाय न्यवेदयत् ॥
यस्याः कृते गतो रामो न्यस्तदेहः पिता च ते ।
सेयं पापा नृशंसा च कुरुष्वास्या यथामति ॥
ताभ्यामभ्यागतां दृष्ट्वा शत्रुघ्नो मन्थरां तदा ।
चकर्ष विनिवृत्योर्व्यां गर्भिण्येव कृपान्वितः ॥
कौशल्यायास्तदङ्गं तस्याः पूरयामास पांशुना ।
अन्तःपुरचरान् सर्वान् प्रत्युवाच कृपान्वितः ॥
यन्मूलन्तु महद्दुःखं भ्रातॄणां मे तथा पितुः ।
तामिमां मन्थरां क्रूरां नेष्यामि यमसादनम् ॥
शत्रुघ्नेनैवमुक्ता तु सखीजनसमावृता ।
गृहीतोरःस्थले कुब्जा सर्वतश्च व्यनादयत् ॥
ततस्तु भृशसन्त्रस्ताः सर्वसखीजनः ।
क्रुद्धमाज्ञाय शत्रुघ्नं न्यवारयत सर्वशः ॥
आमन्त्रयत धर्मार्त्तः कुब्जापरिजनस्तदा ।

यथायमभिसंक्रुद्धो निःशेषान् नः करिष्यति ॥
आनृशंसां शरण्याञ्च दीनार्त्तानाथबान्धवाम् ।
कौशल्यां शरणं यामः सा हि नोऽद्य परायणम् ॥
स चापि रोषताम्राक्षः शत्रुघ्नः शत्रुतापनः ।
विचकर्ष भृशं कुब्जां क्रोशन्तीं पृथिवीतले ॥
समाकृष्य च शत्रुघ्नः कैकेयीसन्निधौ तदा ।
कैकेयीमभिनिर्द्दिश्य प्रोवाच परुषं वचः ॥
यथानयाशुभं कर्म्म कुलक्षयकरं कृतम् ।
कथन्त्वं साद्य कैकेयी कथं त्वां मोक्षयिष्यति ॥
मूलं नस्त्वमनर्थस्य कुलक्षयकरस्य च ।
तस्मात् कुब्जेऽहमद्य त्वां नयामि यमसादनम् ॥
इत्युक्त्वा भृशसंक्रुद्धः शत्रुघ्नो लक्ष्मणानुजः ।
विचकर्ष बलात् कुब्जां निष्टनन्तीं महीतले ॥
इत्येवं परुषैर्वाक्यैः कैकेयी तेन तर्ज्जिता ।
शत्रुघ्नभयसंविग्ना पुत्रं शरणमभ्यगात् ॥
तं प्रेक्ष्य भरतः क्रुद्धं शत्रुघ्नं वाक्यमब्रवीत् ।
अवध्या सर्व्वभूतानां प्रमदा क्षम्यतां त्वया ॥
हन्यामहमिमां पापां कैकेयीं स्वयमेव हि ।
यदि रामो न धर्म्मात्मा त्यजेन्मां मातृघातिनम् ॥
रोषं संयच्छ धर्म्मं च हन्तवेयं स्वकर्म्मणा ।

यद्देवेयं परप्रेष्या कुब्जा स्त्री च विशेषतः ॥
इमामपि हतां कुब्जां यदि जानाति राघवः ।
त्वाञ्च माञ्चैव धर्म्मात्मा नाभिसम्भाषयिष्यति ॥
इति तद्वचनं श्रुत्वा शत्रुघ्नो भरतेरितम् ।
संयच्छन्नात्मनो रोषं तां मुमोच च मन्थराम्
सा क्षिप्ता सहसोत्थाय मन्थरा भयविक्लवा ।
कैकेयीमभिगम्यार्त्ता ययाचे शरणं तदा ॥
सा पादमूले कैकेय्या मन्थरा निपपात ह ।
विनिश्वसन्ती दुःखार्त्ता करुणं विललाप च ॥
गर्हयन्नेव जननीं दुःखशोकाकुलेन्द्रियः ।
भरतोऽवेक्ष्य शत्रुघ्नमिदं वचनमब्रवीत् ॥
पुत्रशोकपरिद्यूनां भर्तृव्यसनकर्शिताम् ।
कौशल्याञ्च सहितो मया पश्याद्य दुःखिताम्
माता मम च शत्रुघ्न कैकेयी भर्तृघातिनी ।
इदं कृतवती पापं सर्व्वलोकविगर्हितम् ॥
इदन्तु मे महद्दुःखं शत्रुघ्न हृदि वर्त्तते ।
किं नु वक्ष्यामि कौशल्यामतिमात्रं विलज्जितः
इत्युक्त्वा भरतो वाक्यं शत्रुघ्नसहितस्तदा ।
रुरोदार्त्तस्वनेनोच्चैः पूरयन्निव तद्गृहम् ॥
तस्य श्रुत्वार्त्तनादं तं भरतस्य महात्मनः ।

मातापितरावामन्त्र्याभिवाद्य च सीतया लक्ष्मणेन च सह रामस्य वनप्रस्थानम् ।

अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः ।
उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् ॥
तं चापि समनुज्ञाप्य धर्मज्ञः सह सीतया ।
राघवः शोकसंमूढो जननीमभ्यवादयत् ॥
अन्वक्षं लक्ष्मणो भ्रातुः कौसल्यामभ्यवादयत् ।
अथ मातुः सुमित्राया जग्राह चरणौ पुनः ॥
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ।
हितकामा महाबाहुं मूर्ध्न्युपाघ्राय लक्ष्मणम् ॥
सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने ।
रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ॥
व्यसनी वा समृद्धो वा गतिरेष तवानघ ।
एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ।
इदं हि वृत्तमुचितं कुलस्यास्य सनातनम् ॥
रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥
लक्ष्मणं त्वेवमुक्त्वासौ कौसल्यानन्दवर्द्धनम् ।
सुमित्रा गच्छ गच्छेति पुनः पुनरुवाच तम् ॥

ततः सुमन्त्रः काकुत्स्थं प्राञ्जलिर्वाक्यमब्रवीत् ।
विनीतो विनयज्ञश्च मातलिर्वासवं यथा ॥
रथमारोह भद्रं ते राजपुत्र महायशः ।
क्षिप्रं त्वां प्रापयिष्यामि यत्र मां राम वक्ष्यसे ॥
तं रथं सूर्य्यसङ्काशं सीता हृष्टेन चेतसा ।
आरुरोह वरारोहा कृत्वालङ्कारमात्मनः ॥
अथ ज्वलनसङ्काशं चामीकरविभूषितम् ।
तमारुरुहतुस्तूर्णं भ्रातरौ रामलक्ष्मणौ ॥
सीतातृतीयावारूढौ दृष्ट्वा रथमचोदयत् ।
सुमन्त्रः संयतानश्वान् वायुवेगसमान् जवे ॥

तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ ।
आर्त्तशब्दो हि सञ्जज्ञे स्त्रीणामन्तःपुरे महान् ॥
अनाथस्य जनस्यास्य दुर्ब्बलस्य तपस्विनः ।
यो गतिः शरणञ्चासीत् स नाथः क्व नु गच्छति ।
न क्रुध्यत्यभिशस्तोऽपि क्रोधनीयानि वर्ज्जयन् ।
क्रुद्धान् प्रसादयन् सर्व्वान् समदुःखः क्व गच्छति ।
कौशल्यायां महातेजा यथा मातरि वर्त्तते ।
तथा यो वर्त्ततेऽस्मासु स महात्मा क्व गच्छति ।
कैकेय्या क्लिश्यमानेन राज्ञा सञ्चोदितो वनम् ।
परित्राता समस्तस्य जगतः क्व नु गच्छति ॥

दुःखार्त्ता कौशल्या सुमित्रामिदमब्रवीत् ॥
आगतः क्रूरकर्म्मायाः कैकेय्या भरतः सुतः ।
तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम् ॥
इत्युक्त्वा सुमित्रां तां विवर्णवदना कृशा ।
प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥
स तु राजात्मजश्चापि शत्रुघ्नसहितस्तदा ।
प्रतस्थे भरतो यत्र कौशल्याया निवेशनम् ॥
ततः शत्रुघ्नभरतौ कौशल्यां प्रेक्ष्य दुःखितौ ।
पर्य्यष्वजेतां दुःखार्त्तां पतितां नष्टचेतनाम् ॥
रुदन्तौ रुदती दुःखात् समेत्यार्य्यां मनस्विनी ।
भरतं प्रत्युवाचेदं कौशल्या भृशदुःखिता ॥
इदं ते राज्यकामस्य राज्यं प्राप्तमकण्टकम् ।
सम्प्राप्तं बत कैकेय्याः शीघ्रं क्रूरेण कर्म्मणा ॥
प्रस्थाप्य चीरवसनं पुत्रं मे वनवासिनम् ।
कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिनी ॥
क्षिप्रं मामपि कैकेयी प्रस्थापयितुमर्हति ।
हिरण्यनाभः स यत्रास्ते सुतो मे सुमहायशाः ॥
अथवा स्वयमेवाहं सुमित्रानुचरी सुखम् ।
अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः ॥
कामं वा स्वयमेवाद्य तत्र मां नेतुमर्हसि ।

स तपस्तप्यते यत्र पुत्र मे पितुराज्ञया ॥
इदं हि तव विस्तीर्णं धनधान्यसमाचितम् ।
हस्त्यश्वरथसम्पूर्णं राज्यं भोगाय वर्त्तताम् ॥
एवं विलपमानां तां प्राञ्जलिर्भरतस्तदा ।
कौशल्यां प्रत्युवाचेदं शोकैर्बहुभिरावृताम् ॥
आर्य्ये कस्मादजानन्तं गर्हसे मामकिल्बिषम् ।
विपुलाञ्च मम प्रीतिं स्थिरां जानासि राघवे ॥
कृतशास्त्रानुगा बुद्धिर्मा भूत्तस्य कदाचन ।
सत्यसन्धः सतां श्रेष्ठो यस्यार्य्योऽनुमते गतः ॥
कारयेत् यो महत् कर्म्म भर्त्ता भृत्यमवेतनम् ।
अधर्म्मो योऽस्य सोऽस्यास्तु यस्यार्य्योऽनुमते गतः
परिपालयमानस्य राज्ञो भूतानि पुत्रवत् ।
तस्यास्तु द्रुह्यतां पापं यस्यार्य्योऽनुमते गतः ॥
बलिषड्भागमुद्धृत्य नृपस्यारक्षितुः प्रजाः ।
अधर्म्मो यस्तु सोऽस्यास्तु यस्यार्य्योऽनुमते गतः ॥
उपदिष्टं सुसूक्ष्मार्थं शास्त्रं यत्नेन धीमता ।
स नाशयतु दुष्टात्मा यस्यार्य्योऽनुमते गतः ॥
अल्पतो पक्षमाश्रित्य कृत्ये विवादमानयोः ।
पापं स समवाप्नोतु यस्यार्य्योऽनुमते गतः ॥
यद्धि पापं कृतघ्नस्य यत्पापं तस्करस्य च ।

तत् सर्वं समवाप्नोति यस्यार्योऽनुमते गतः ॥
पुत्रैर्दारैश्च भृत्यैश्च स्वगृहे परिवारितः ।
स एको मिष्टमश्नातु यस्यार्योऽनुमते गतः ॥
राजस्त्रीबालवृद्धानां वधे यत् पापमुच्यते ।
भृत्यत्यागेन यत् पापं तत् पापं प्रतिपद्यताम् ॥
कपालपाणिः पृथिवीमटतां चीरसंवृतः ।
भिक्षमाणो यथोन्मत्तो यस्यार्योऽनुमते गतः ॥
मद्ये प्रसक्तो भवतु स्त्रीष्वक्षेषु च नित्यशः ।
कामक्रोधाभिभूतश्च यस्यार्योऽनुमते गतः ॥
मास्य धर्मे मनो भूयादधर्मं स निषेवताम् ।
अपात्रवर्षी भवतु यस्यार्योऽनुमते गतः ॥
सञ्चितान्यस्य वित्तानि विविधानि सहस्रशः ।
दस्युभिर्विप्रलुप्यन्तां यस्यार्योऽनुमते गतः ॥
यदग्निदायके पापं यत् पापं गुरुनिन्दके ।
मित्रद्रोहे च यत् पापं तत् पापं प्रतिपद्यताम् ॥
सतां लोकात् सतां कीर्त्तेः सज्जुष्टात् कर्मणस्तथा ।
भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥
अपास्य मातृशुश्रूषामनर्थे सोऽवतिष्ठताम् ।
दीर्घबाहुर्महावक्षा यस्यार्योऽनुमते गतः ॥
बहुभृत्यो दरिद्रश्च ज्वररोगसमन्वितः ।

स यायात् सततं लोकं यस्यार्य्योऽनुमते गतः ॥
आशामाशंसमानानां दीनानामूर्द्ध्वचक्षुषाम् ।
अर्थिनां वितथां कुर्य्यात् यस्यार्य्योऽनुमते गतः ॥
मायया रमतां नित्यं परुषः पिशुनोऽशुचिः ।
बालवत्साञ्च गां दोग्धु यस्यार्य्योऽनुमते गतः ॥
धर्म्मदारान् परित्यज्य परदारान् निषेवताम् ।
त्यक्तधर्म्मरतिर्मूढो यस्यार्य्योऽनुमते गतः ॥
पानीयदूषके पापं तथैव विषदायके ।
यत्तदेकः स लभतां यस्यार्य्योऽनुमते गतः ॥
तृषार्त्तं सति पानीये विप्रलम्भेन योजयन् ।
यत् पापं लभते तत् स्यात् यस्यार्य्योऽनुमते गतः ॥

एवमाश्वासयन्नेव दुःखार्त्तो निपपात ह ।
विहीनां पतिपुत्राभ्यां कौशल्यां पार्थिवात्मजः ॥
तदा तं शपथैः कष्टैः शपमानमचेतनम् ।
भरतं शोकसन्तप्तं कौशल्या वाक्यमब्रवीत् ॥
मम दुःखमिदं पुत्र भूयः समुपजायते ।
शपथैः शपमानो हि प्राणानुपरुणत्सि मे ॥
दिष्ट्या न चलितो धर्म्मादात्मा ते शुभलक्षण ।
वत्स सत्यप्रतिज्ञो हि सतां लोकमवाप्स्यसि ॥
इत्युक्त्वा चाङ्कमानीय भरतं भ्रातृवत्सलम् ।

…स्य महाबाहुं करोद् कष्टदुःखिता ॥
एवं विलपमानस्य दुःखार्त्तस्य महात्मनः ।
मोहाच्च शोकसम्भाराद्बभूव लुलितं मनः ॥

लालप्यमानस्य विचेतनस्य
प्रनष्टबुद्धेः पतितस्य भूमौ ।
मुहुर्मुहुर्निःश्वसतश्च दीर्घं
सा तस्य शोकेन जगाम रात्रिः ॥

स प्राप्तो व्यसनं घोरं हीनवर्णस्वरेन्द्रियः ।
भरतो न रराजार्त्तः शशीव समभिप्लुतः ॥
मरणेन पितुर्दीनो रामप्रव्राजनेन च ।
कैकेय्याः स्वार्थलुब्धाया धर्मत्यागेन पीडितः ॥
उत्कामनन्या जनन्याहं धर्ममार्य्यनिषेवितम् ।
अगाधपारे महति पातितः शोकसागरे ॥
त्वन्निमित्तं मृतो राजा रामश्चापि विवासितः ।
अपापः पापतां नीतो मात्राहं पापदृष्टया ॥
विहीनश्चन्द्रसूर्य्याभ्यां यथा मेरुर्न शोभते ।
तथा पित्रा च भ्रात्रा च शून्यं पुरमिदं ध्रुवम् ॥
सोऽहं पित्रा सहाग्निं वा वनं रामेण वा सह ।
विशामि विना ताभ्यां नहि जीवितुमुत्सहे ॥
शान्तस्य यदि रामस्य पादौ तौ शुभलक्षणौ ।

संवाहये वनस्थोऽहं तन्मे राज्याद्वरं भवेत् ॥
शुश्रूषमाणश्चरणौ वने वन्येन जीवतः ।
अहमार्यस्य वत्स्यामि तस्यार्थायोऽन्नमाहरन् ॥
आर्यरामस्य पूर्णेन्दुसदृशं चारु लोचनम् ।
मम शोको मुखं वीक्ष्य न स्यात् पितृवियोगजः ॥
इति श्रुत्वा वचो धर्म्यं भरतस्य महात्मनः ।
अमात्या बन्धुवर्गाश्च दुःखादश्रूण्यवर्त्तयन् ॥

तमवाक्शिरसं भूमिं चरणाग्रेण राघवम् ।
विलिखन्तमथावेदं वशिष्ठो भगवानृषिः ॥
आपत्स्वमूढो धृतिमान् यः सम्यक् प्रतिपद्यते ।
कर्म्माण्यवश्यकार्य्याणि तमाहुः पण्डितं बुधाः ॥
स त्वं धैर्य्यमुपाश्रित्य विधूय हृदयज्वरम् ।
कर्त्तुमर्हस्यसंमूढ आनन्तर्य्यक्रियां पितुः ॥
पिता ते पुत्रशोकार्त्तो रामे प्रव्राजिते वनम् ।
त्वय्यनागच्छति प्राणानिष्टांस्त्यक्त्वा दिवं गतः ॥
अनाथ इव धर्म्मात्मा लोकनाथः पिता तव ।
निर्ह्रियेत कथं नाम सुतवांस्तात त्वया विना ॥
इत्यस्माभिर्विचार्य्यैव तैलद्रोण्यां स शायितः ।
तस्य निर्हरणं तात पितुस्तत् कर्त्तुमर्हसि ॥
परिसाधय मा कृत्स्नं मा च शोके मनः कृथाः ।

अवश्यम्भाविनोऽर्थास्ते न शोच्या भवद्विधैः ।
[illegible] ज्ञानसम्पन्नैर्विद्वद्भिर्महात्मभिः ॥
तस्मात् संस्तम्भयात्मानं मा भूरेवं बालिशः ।
[illegible] भवान् कालः शक्यते नातिवर्त्तितुम् ॥
एवमुक्तो वशिष्ठेन भरतो धीमतां वरः ।
वशिष्ठमभिवाद्येदमुवाचार्त्ततरो वचः ॥
भवत्वेवं ब्रवीति ते शीर्य्यतीव मनो मुने ।
लोकनाथे स्थिते रामे नाथवत्त्वं मयि कीदृशम् ॥
किन्तु तत्र नयध्वं मां यत्र राजा पिता मम ।
करिष्ये तस्य संस्कारं भवद्भिः सहितोऽवशः ॥
नेदानीं हृदयं चेन्मे स्फुटिष्यति सहस्रधा ।
दर्शयन्तु भवन्तस्तं राजानं क्षीणजीवितम् ॥
ततो वशिष्ठप्रमुखाः सर्व्वे ते नृपमन्त्रिणः ।
अनयन् भरतं तत्र यत्र राज्ञः कलेवरम् ॥
ततः प्रविश्य भरतः सह राजपरिग्रहैः ।
ददर्श पितरं प्रेतं राममातुर्निवेशने ॥
स तं गतासुं पितरं दृष्ट्वैवोपहतत्विषम् ।
हा राजन्निति विक्रुश्य पपात धरणीतले ॥
संज्ञाविहीनः संज्ञान्तु लब्ध्वा भूयः सुदुर्मनाः ।
जीवन्तमिव संप्रेक्ष्य पितरं सोऽभ्यभाषत ॥

राजन्ननिह किं शेषे भरतोऽहमुपागतः ।
तवाज्ञया महाराज शत्रुघ्नसहितस्त्वरम् ॥
मम मातामहस्तात कुशलं त्वामपृच्छति ।
प्रणम्य शिरसा तद्वद्युधाजिन्मातुलश्च मे ॥
यतः कुतश्चित् संप्राप्तमङ्कमाधाय मां नृप ।
त्वं हि मूर्द्ध्न्युपाघ्राय प्रतिनन्दसि भूमिप ॥
स इदानीमनुप्राप्तं कस्मान्मां नाभिभाषसे ।
नापराध्यामि ते किञ्चिदहं राजन् प्रसीद मे ॥
धन्यः स रामो येनाज्ञा कृता ते व्रजता वनम् ।
लक्ष्मणश्चापि धन्योऽसौ यो राममनु निर्गतः ॥
अधन्योऽहमपुण्यश्च यस्त्वं मां प्रति मन्युमान् ।
दुःखेन महताविष्टः प्राणान् संत्यक्तवानसि ॥
ननस्तु तौ न आनीतौ द्रष्टुं ते रामलक्ष्मणौ ।
यथा हि वनमुत्सृज्य नागताविह दुःखितौ ॥
मातृदोषादपि त्यक्तो यदि तावदहं नृप ।
शत्रुघ्नमपि तावत्त्वमभिभाषितुमर्हसि ॥
निर्वास्य चीरवसनं रामं लक्ष्मणमेव च ।
स्त्रीहेतोः किमसि प्राणांस्त्यक्त्वा राजन् दिवं गतः ॥
एवं विलपतस्तस्य भरतस्य महात्मनः ।
श्रुत्वा रुदितपत्न्यश्च चक्रुर्भृशदुःखिताः ॥

विलपन्तं तथा तन्तु भरतं शोकविह्वलम्।
वशिष्ठो वदतां श्रेष्ठो जाबालिश्चेदमूचतुः॥
मा शोच भरत प्राज्ञ नैष शोच्यो महीपतिः।
ज्ञानन्धर्मसंवृद्धः कर्त्तुमस्य त्वमर्हसि॥
नायं शोच्यस्तव पिता स्वकर्मजितलोकभाक्।
हतो नायं सुता यस्य यूयं रामपुरोगमाः।
धर्मात्मानो महात्मानो लोके प्रथितपौरुषाः॥
एवमुक्तो वशिष्ठेन भरतो धर्मकोविदः।
त्यक्त्वा शोकमिदं वाक्यमुवाच वदतां वरः॥
ब्रुवन्ति यद्भवन्तो मां तथा तदिति मे मतिः।
तथास्तु पितृशोकोऽयं पीडयतीव माम्॥
संस्थापितो भवद्भिस्तु गुरुभिर्हितवादिभिः।
त्यक्त्वा शोकं करिष्यामि पितुरस्यौर्द्ध्वदैहिकम्॥
आनयन्तु यथोद्दिष्टं भवन्तो नृपमन्त्रिणः।
सांस्कारिकं पितुर्मेऽद्य सर्वं सम्भारमुत्तमम्॥
तस्यां रात्र्यां व्यतीतायां भरतं सूतमागधाः।
प्रबोधयिष्यन्तस्तुष्टुवुर्मधुरस्वराः॥
ततो वाद्यन्यन्त दुन्दुभ्यः सुमहास्वनाः।
ध्माप्यन्त शङ्खघोषास्तु मृदङ्गवेणुगणाः पृथक्॥
तूर्यघोषः सुमहान् पूरयन्निव तां पुरीम्।

बोधयामास भरतं शोकव्याकुलमानसम् ।
प्रतिदिश्याथ भरतस्तं प्रबोधकनिस्वनम् ।
नाहं राजेति चाप्युक्त्वा ततः शत्रुघ्नमब्रवीत् ॥
पश्य शत्रुघ्न कैकेय्या कृतं त्वया लोकगर्हितम् ।
अयशः पातितं मूर्ध्नि ममाकस्मादनागसः ॥
राजधर्मानुगा राज्ञः पितुर्मे तद्विनाकृता ।
परिभ्रमति राजश्रीर्भिन्ना नौरिवाम्भसि ॥
इत्येवं भरतं तत्र विलपन्तं पुनः पुनः ।
दृष्ट्वा प्रचकन्दुः सर्वाः शोकार्त्ता नृपयोषितः ॥
भरतेन ततः सार्द्धं वशिष्ठो वेदवित्तमः ।
प्रविवेश तदा राज्ञः सभां मन्त्रयितुं हितम् ॥
तत्रासने रत्नचिते शातकौम्भास्तरणसंवृते ।
उपविश्य ततः सर्वानानयामास मन्त्रिणः ॥
जनौघः समपायात्तत्र सम्प्रयाताः समन्ततः ।
सभायां भरतं द्रष्टुं शत्रुघ्नसहितं तदा ॥
ततो हलहलाशब्दः सुमहानभवत्तदा ।
कौतूहलाज्जनौघस्य सभां प्रत्यभिधावतः ॥
तत्राथ भरतं दृष्ट्वा सभायां सपुरोहितम् ।
अभ्यनन्दन् प्रकृतयो यथा दशरथं तथा ॥
समाहृते जने तस्मिन्नुदिते च दिवाकरे ।

वशिष्ठस्तमुवाचेदं भरतं तांश्च मन्त्रिणः ।
उत्तिष्ठ भरत क्षिप्रं मा भूत् कालात्ययः प्रभो ।
पितुः कुरु यथान्यायं संस्कारं भूरिदक्षिणम् ।
सज्जिता शिविका चेयं पितुस्ते रत्नभूषिता ॥
अत्रैनं शिविकायां त्वं संवेश्य नराधिपम् ।
शिविकागतमुत्क्षिप्य नयैनं वह्निमाशु च ॥
एवमुक्तो वशिष्ठेन भरतः प्रत्युवाच तम् ।
वशिष्ठं वदतां श्रेष्ठं पितुर्वेश्मगतं गुरुम् ॥
यदा ज्ञापयसे राज्ञः कार्याणि तदाहृतः ।
दैवतं ह्यसि मान्यश्च गुरोश्चापि गुरुर्मम ॥
वाक्येन तेन तस्याथ भरतस्य महात्मनः ।
आजगाम परं हर्षं वशिष्ठो द्विजसत्तमः ॥
शोकवेगमसह्यं तं धारयन् भरतस्ततः ।
कलेवरं भूमिपतेः स तदा समुद्धात ॥
नचाशक्नोत् स शोकस्य वेगं धारयितुं तदा ।
महार्णवस्यापततस्तोयवेगमिवोद्धतम् ॥
तदार्त्तिमान् वेपमानस्ततः स विलपन् बहु ।
मन्त्रिसहितः क्षिप्रं शिविकामनयन्नृपम् ॥
शिविकास्थं स राजानमलङ्कृत्य विधानतः ।
वाससा च महार्हेण समाच्छाद्य स्वलंकृतम् ।

अवकीर्य्य च माल्येन दिव्यधूपावधूपितम् ।
गन्धचूर्णैः सुरभिभिः परिकीर्य्य च सर्व्वशः ।
उत्थाप्योत्क्षिप्य शिविकां शत्रुघ्नसहितस्ततः ।
हा राजन् क्वासि गन्तेति रुदन्नार्त्तः पुनः पुनः ॥
अग्रतः प्रययुश्चैनं सत्कार्य्यस्तुतिभिर्नृपम् ।
अभिष्टुवन्तो मधुरं सूतमागधवन्दिनः ॥
तस्मिन् निर्हरणे राज्ञः करुणस्तु महांस्तदा ।
आर्त्तनादोऽभवत् स्त्रीणां यथास्य मरणे तथा ॥
ततः पौरजनः सर्व्वः सस्त्रीवृद्धकुमारकः ।
अनुराजशरीरं तन्निर्य्ययौ नगराद्बहिः ॥
तथा भरतशत्रुघ्नौ शिविकां परिरभ्य तौ ।
शोकदुःखसमाविष्टौ रुदन्तावनुजग्मतुः ॥
कौशल्या च सुमित्रा च कैकेयी च तथापरा ।
रुदत्यः शोचमानाश्च कुरर्य्य इव सस्वनः ।
अनुजग्मुः शरीरं तद्राज्ञो राजीवनयनाः ॥
अथास्य सरयूतीरे विविक्ते मृदुशाद्वले ।
चन्दनागुरुकाष्ठैस्ते राज्ञश्चक्रुश्चितां तदा ॥
तस्यां चितायां नृपतेः शरीरं तत् सुहृज्जनः ।
अशाययत् समुत्क्षिप्य शोकव्याकुलचेतसः ॥
चितां प्रज्वालयामास भरतः सह बन्धुभिः ॥

प्रजज्वाल ततो वह्निः सहसैव समेधितः ।
...र्धिष्ण्यं दहन् राज्ञः स्थिताकूटं कलेवरम् ॥
विधिवत् संस्कृतो राजा गुरुभिर्वेदपारगैः ।
जगाम परमं स्थानं यज्वनां पुण्यकर्म्मणाम् ॥
...कीर्त्त्य च मात्येन चिता तामपसव्यतः ।
...ते स पितुः पादौ निपत्य धरणीतले ॥
...र्त्तरूपं पतितं विलपन्तमचेतनम् ।
...थापयामास बलात् परिष्वज्य सुमन्त्रकः ॥
...त्वा स पितुर्देहे सर्वगात्रेषु पावकम् ।
विललापातिकरुणं भरतः परिविह्वलः ॥
...था पतिरनाथायाः पुत्रः प्रव्राजितस्त्वया ।
...त्वा तात कौशल्यां किमर्थं नाभिभाषसे ॥
एवमादिप्रतिदुःखार्त्तो विलपन्नेव राघवः ।
...संछिन्नकल्पो न्यपतच्छोचन् पितरमात्मनः ॥
उन्मत्त इव विभ्रान्तो विललाप निपत्य सः ।
गुणसंकीर्त्तनं कुर्व्वन् पितुर्वै पितृवत्सलः ॥
...कुमारस्य बालस्य सततं लालितं त्वया ।
...तात भरतं हित्वा विलपन्तं गमिष्यसि ॥
...योऽग्र्याभरणपानैश्च वासोभिश्च पृथग्विधैः ।
संवर्द्धयसि नः सर्व्वान्... कोऽद्य करिष्यति ॥

त्वयि राजन् गते स्वर्गं रामे चारण्यमाश्रिते ।
न जीवितुं व्यवस्यामि प्रवेक्ष्यामि हुताशनम् ॥
एवमादि तयोः श्रुत्वा भ्रात्रोर्विलपितं नरः
सर्व्वः परिजनो भूयो भृशमार्त्ततरोऽभवत् ॥
ततः शोकपरिश्रान्तौ शत्रुघ्नभरतावुभौ ।
विलपित्वातिकरुणं ध्यानमेवान्वपद्यताम् ॥
तौ ध्यानमाश्रितौ दृष्ट्वा पितुरिष्टः पुरोहितः ।
वशिष्ठो भरतं वाक्यमुत्थाप्येदमुवाच ह ॥
द्वन्द्वः सर्व्वगत् सर्व्वमभिभूतमिदं सदा ।
अवश्यभाविनि भावे न त्वं शोचितुमर्हसि ॥
जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्वं शोचितुमर्हसि ॥
सुमन्त्रश्चापि शत्रुघ्नमुत्थाप्य धरणीतलात् ।
श्रावयामास तत्त्वज्ञः सर्व्वभूतभवाभवम् ॥
उत्थितौ तौ नरव्याघ्रावश्रुक्लिन्नौ विरेजतुः ।
वर्षातोयपरिक्लिन्नौ पृथगिन्द्रध्वजाविव ॥
अश्रूणि परिमार्ज्जन्तौ रक्ताक्षौ दीनभाषिणौ ।
अमात्यास्त्वरयामासुः पितुः प्रति जलक्रिया म्
एवं संस्कारं कृत्वा भरतः पृथिवीपतेः ।
जलक्रियां पितुर्धीमान् कर्त्तुं समुपचक्रमे ॥

पुण्यां पुण्यजनाकीर्णां महर्षिगणसेविताम् ।
उदकं स पितुर्दातुं सरयूं सरितं ययौ ॥
अवगाह्य ततः पुण्यां सरयूं ससुहृज्जनः ।
ददौ पितरमुद्दिश्य भरतः सलिलाञ्जलिम् ॥
स सर्व्वमात्मसंयुक्तः सामात्यः सपुरोहितः ।
…यामास राजानं सलिलेन विभावतः ॥

ततः कृत्वोदकं सर्व्वे पौरजानपदा जनाः ।
समाश्वासयामास भरतं शोकविह्वलम् ॥
आश्वस्यमानसंस्थाय प्रययौ भरतस्ततः ।
तैरेव सहितः सर्व्वैरयोध्यामगमत्तदा ॥
दूरादेव च तां दृष्ट्वा दीनातुरजनावृताम् ।
पुरीमयोध्यां भरतः पौरान् वचनमब्रवीत् ॥
गते नरपतौ स्वर्गं रामेऽपि वनमाश्रिते ।
भातीयं मे निरानन्दा श्मशानसदृशी पुरी ॥
प्रमदा हतवीरेव विचन्द्रेव च शर्व्वरी ।
विहीना नरदेवेन पुरीयं न विराजते ॥
नेच्छाम्येतामहं द्रष्टुं न प्रवेष्टुं हतत्विषम् ।
इहैव प्रायमासिष्ये पितुर्दर्शनकांक्षया ॥
किं मे पिता विहीनस्य जीवितेन सुखेन वा ।
नेच्छामि जीवितं नाहमनुयास्यामि भूमिपम् ॥

अथ राज्ञो महामात्यो धर्म्मपाल इति श्रुतः

परिदेवयमानं तं भरतं वाक्यमब्रवीत् ॥

शोचतो मुह्यतश्चैव शोकं ते भरत श्रुतम् ।
कुरु वाक्यं ममैवद्मदनुरूपं नृपात्मज ॥
शोके भरत नियन्त्वं नात्यर्थं कर्त्तुमर्हसि ।
सर्व्वस्वजननाशेऽपि नहि शोचन्ति पण्डिताः ॥
रुदतः शोचतो वापि यदि नाम पुनर्मृतः ।
सञ्जीवेत् स्वजनः कश्चिन्न शोचेम सर्व्वशः ॥
यदा त्ववश्यं गन्तव्यं सर्व्वैरस्माभिरागतैः ।
मृत्युकाले तदा शोके नास्ति सामर्थ्यमस्वपि ॥
एकाश त्वं सहास्माभिरयोध्यां प्रविश प्रभो ।
स्वजनं शोकसन्तप्तं समाश्वासय मानद ॥
त्वं ह्यद्य नाथः सर्व्वेषामस्माकं स्वजनस्य च ।
शोचितुं नार्हसे तत् त्वं प्रजानां नाथतां गतः ॥
एवमुक्तः स विप्रेण धर्म्मपालेन धार्म्मिकः ।
प्रविवेश निरानन्दमयोध्यां स्वजनैर्वृतः ॥

रामं प्रत्यानेतुं ससैन्यस्य भरतस्य वनागमनम्।

अथ राममरण्यस्थं भरतस्योपयायिनः।
सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभःस्पृशौ॥
त्रस्ताः सैन्यसमुत्थेन शब्देन महता ततः।
अर्दिता यूथपा मत्ताः सयूथाद्दुद्रुवुर्दिशः॥
तांश्च विप्रद्रुतान् दृष्ट्वा तञ्च श्रुत्वा महास्वनम्।
उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम्॥
हन्त लक्ष्मण पश्येह तुमुलः श्रूयते स्वनः।
वित्रासिता मृगाः सर्व्वे सहसा विद्रुता दिशः॥
राजा वा राजपुत्रो वा मृगयामटते वने।
सर्व्वमेतत् यथातत्त्वमभिज्ञातुमिहार्हसि॥
स लक्ष्मणः सत्वरितः शालमारुह्य पुष्पितम्।
उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम्॥
स रामाय नरव्याघ्रो लक्ष्मणः परवीरहा।
शशंस सेनामायान्तीं वचनञ्चेदमब्रवीत्॥
अग्निं संशमयत्वार्य्यः सीता च भजतां गुहाम्।
सज्यं कुरुष्व चापञ्च शरांश्च कवचन्तथा॥
तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह।
ब्रूहि लक्ष्मण तत्त्वेन कस्येमां मन्यसे चमूम्॥

एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
दिधक्षन्निव कोपेन ज्वलितः पावको यथा ॥
सपत्नो राज्यकामोऽयं व्यक्तं प्राप्याभिषेचनम् ।
आवां हन्तुं समभ्येति भरतः कैकयीसुतः ॥
गृहीतधनुषावावां गिरिं वीर श्रयावहे ।
अथवेहैव तिष्ठावः सन्नद्धावुद्यतायुधौ ॥
अपि द्रक्ष्याव भरतं यत्कृते व्यसनं महत् ।
त्वया राघव सम्प्राप्तं सीतया च मया तथा ॥
यन्निमित्तं भवान् राज्यात् च्युतो राघव शाश्वता
सम्प्राप्तोऽयमरिर्वीर भरतो वध्य एव हि ॥
भरतस्य वधे दोषं नाहं पश्यामि राघव ।
पूर्वापकारिणं हत्वा न ह्यधर्मेण युज्यते ॥
पूर्व्वापकारी भरतस्त्यक्तधर्मश्च राघव ।
एतस्मिन् निहते कृत्स्नामनुशाधि वसुन्धराम् ॥
अद्य पुत्रं हतं संख्ये कैकेयी राज्यकामुका ।
मया पश्येत् सुदुःखार्त्ता हस्तिभग्नमिव द्रुमम्
कैकेयीञ्च वधिष्यामि सानुबन्धां सबान्धवाम् ।
कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥
अद्याहं राघवश्रेष्ठ क्रोधं मे चिरसंयतम् ।
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥

अद्यैव चित्रकूटस्य काननं निशितैः शरैः ।
भिन्दन् शरशरीराणि करिष्ये शोणितोक्षितम् ॥
शरैर्निर्भिन्नहृदयान् कुञ्जरांस्तुरगांस्तथा ।
श्वापदाः परिकर्षन्तु नरांश्च निहतान् मया ॥
शराणां धनुषश्चाहमनृणोऽस्मिन् महावने ।
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥

सुसंक्रुद्धोऽथ सौमित्रिं लक्ष्मणं क्रोधमूर्च्छितम् ।
रामस्तु परिसान्त्व्याथ वचनञ्चेदमब्रवीत् ॥
किमिदं कृतपूर्वं ते भरतेन कदा नु किम् ।
भयं वा भरतात् किन्ते येन तं हन्तुमिच्छसि ॥
किमत्र धनुषा कार्यमसिना वा सचर्मणा ।
महाबले महोत्साहे भरते स्वयमागते ॥
पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमाहवे ।
किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥
यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।
नाहं तत् प्रतिगृह्णीयां भक्ष्यान् विषकृतानिव ॥
धर्ममर्थञ्च कामञ्च पृथिवीञ्चापि लक्ष्मण ।
इच्छामि भवतामर्थे एतत् प्रतिशृणोमि ते ॥
नेयं मम मही सौम्य दुर्लभा सागराम्बरा ।
न हीच्छेयमधर्म्मेण शक्रत्वमपि लक्ष्मण ॥

यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद ।
भवेन्मम सुखं किञ्चिद्भस्म तत् कुरुतां शिखी ॥
मन्येऽहमागतोऽयोध्यां भरतो भ्रातृवत्सलः ।
मम प्राणैः प्रियतरः कुलधर्ममनुस्मरन् ॥
श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् ।
जानक्या सहितं वीर त्वया च पुरुषोत्तम ॥
स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः ।
द्रष्टुमभ्यागतो ह्येष भरतो नात्र संशयः ॥
नहि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः ।
अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥
कथं नु पुत्राः पितरं हन्युः कस्याञ्चिदापदि ।
भ्राता वा भ्रातरं हन्यात् सौमित्रे प्राणमात्मन
यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥
उच्यमानो हि भरतो मया लक्ष्मण तद्वचः ।
राज्यमस्मै प्रयच्छेति बाढमित्येव मंस्यते ॥

तथोक्तो धर्मशीलेन भ्रात्रा तस्य हिते र
लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥
तद्वाक्यं लक्ष्मणः श्रुत्वा व्रीडितः प्रत्युवाच ह ।
त्वां मन्ये द्रष्टुमायातः पिता दशरथः स्वयम् ॥

…पीडितं लक्ष्मणं दृष्ट्वा राघवः प्रत्युवाच ह ।
… सत्यं महाबाहुर्विशालाक्षान् [illegible]मागतः ॥
… तौ [illegible] सन्धौ सत्यकामः समुपोचितौ ।
…रामसमन्[illegible] [illegible] पतिनेष्यति ॥
… [illegible] वैदेहीमत्यन्तसुखसेविनीम् ।
… [illegible] राघवः श्रीमान् वनादादाय यास्यति ॥
… तौ सम्प्राप्ताविति [illegible] आनोदमौ ।
… [illegible] [illegible] भवतो [illegible]मौ ॥
… [illegible] काय कथ्यते [illegible]मर्थ ।
…मः [illegible] [illegible] [illegible]मानस्य धीमतः ॥
…न् पश्यामि तत्कृतं पातकं लोकविश्रुतम् ।
…र्हिर्भ्यं सहामात्य [illegible] भवतो [illegible] से ॥
…[illegible] त्वं कुरु लक्ष्मण सद्वचः ।
…[illegible] रामो धर्मात्मा सौमित्रिं तमुवाच ह ॥
…वतीर्य्य नु [illegible]त् स समितिञ्जयः ।
…लक्ष्मणः प्राञ्जलिर्भूत्वा तस्थौ रामस्य पार्श्वतः ॥

भरतेनाथ सन्दिष्टा सम्मर्दो न भवेदिति ।
…[illegible]स्य सेना [illegible] ॥
…र्द्धमिक्ष्वाकुचमूर्योजनं पर्व्वतस्य ह ।
…र्श्वे न्यविशदावृत्य गजवाजिनराकुला ॥

निविष्टायां तु सेनायां यथोद्देशं विनीतवत्।
भरतो भ्रातरं वाक्यं शत्रुघ्नमिदमब्रवीत्॥
क्षिप्रं वनमिदं सौम्य नरसङ्घैः समन्ततः।
लुब्धैश्च सहितैरेभिस्त्वमन्वेषितुमर्हसि॥
गुहो ज्ञातिसहस्रेण शरचापासिपाणिना।
समन्वेषतु काकुत्स्थावस्मिन् परिवृतः स्वयम्॥
यावन्न रामं द्रक्ष्यामि लक्ष्मणं वा महाबलम्।
वैदेहीं वा महाभागां न मे शान्तिर्भविष्यति॥
यावन्न चन्द्रसङ्काशं तद्द्रक्ष्यामि शुभाननम्।
भ्रातुः पद्मविशालाक्षं न मे शान्तिर्भविष्यति॥
यावन्न चरणौ भ्रातुः पार्थिवव्यञ्जनान्वितौ।
शिरसा प्रग्रहीष्यामि न मे शान्तिर्भविष्यति॥
यावन्न राज्ये राज्यार्हः पितृपैतामहे स्थितः।
अभिषिक्तो महाबाहुर्न मे शान्तिर्भविष्यति॥
कृतकृत्या महाभागा वैदेही जनकात्मजा।
भर्तारं सागरान्तायाः पृथिव्या यानुगच्छति॥
शुभगश्चित्रकूटोऽसौ गिरिराजसमो गिरिः।
अस्मिन् वसति काकुत्स्थः कुबेर इव नन्दने॥
कृतकार्यमिदं दुर्गं वनं व्यालनिषेवितम्।
यदध्यास्ते महाराजो रामः शस्त्रभृतां वरः॥

एवमुक्त्वा महाबाहुर्भरतः पुरुषर्षभः ।
…जेव महातेजाः प्रविवेश महद्वनम् ॥
…रेष्ठिवकुरस्य ग्राममाकृला …वरम् ।
…समकतक्षाग्नेर्दृष्ट्वा ध्वजमाकुलम् ॥
…दृष्ट्वा भरतः श्रीमान् मुमोद सहबान्धवः ।
…राम इति ज्ञात्वा गतः पारमिवाम्बुधेः ॥
… वशिष्ठं सन्दिश्य मातॄणां श्रीमतामथ ।
… त्वरितमग्रे स जगाम गुरुवत्सलः ॥
…ष्टं चास्य भरतस्तापसालयसंस्थिताम् ।
…नः पर्णकुटीं श्रीमानुटजञ्च ददर्श ह ॥
…गारमाश्रयतस्तस्मा ददर्श भरतस्तदा ।
…ङ्गानि चावभग्नानि पुष्पाण्युपचितानि च ॥
… भवने तस्मिन् महतः सञ्चयान् कृतान् ।
…णां महिषाणाञ्च करीषैः शीतकारणात् ॥
गच्छन्नेव महाबाहुर्द्युतिमान् भरतस्तदा ।
…नुघ्नमब्रवीत् हृष्टस्तानमात्यांश्च सर्व्वशः ॥
…न्ये आगताः स्म तं देशं भरद्वाजो यमब्रवीत् ।
…तिकूटे हि मन्येऽहं नदी मन्दाकिनीमितः ॥
…बोदात्तदन्तानां कुञ्जराणां तरस्विनाम् ।
…न्पार्श्वे परिक्रान्तमन्योन्यमभिगर्ज्जताम् ॥

यस्यैवाधातुमिच्छन्ति तापसाः सततं वने ।
तस्यासौ दृश्यते धूमः सङ्कुलः कृष्णवर्त्मनः ॥
अत्राहं पुरुषव्याघ्रं पितुर्निर्देशकारिणम् ।
आर्य्यं द्रक्ष्यामि काकुत्स्थं महर्षिसमदर्शनम् ॥

अथ गत्वा मुहूर्त्तन्तु चित्रकूटं स राघवः ।
मन्दाकिनीमनुप्राप्तस्तं जनञ्चेदमब्रवीत् ॥
मत्कृते व्यसनं प्राप्तो लोकनाथो महाद्युतिः ।
सर्व्वान् कामान् परित्यज्य वने वसति राघवः ॥
इति लोकविक्रुष्टस्तु पादयोः संप्रसादयन् ।
रामस्य निपतिष्यामि सीतायाश्च पुनः पुनः ॥
एवं स विलपंस्तस्मिन् वने दशरथात्मजः ।
ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् ॥
प्रागुदक्प्रवणां वेदीं विशालां दीप्तपावकाम् ।
ददर्श भरतस्तत्र पुण्यां रामनिवेशने ॥

निरीक्ष्य स मुहूर्त्तन्तु ददर्श भरतो गुरुम् ।
उटजे राममासीनं जटावल्कलधारिणम् ॥
तमभिप्रेक्ष्य स श्रीमान् दुःखमोहपरिप्लुतः ।
अभ्यधावत धर्म्मात्मा भ्रातरं कैकयीसुतः ॥
दृष्ट्वैव विललापार्त्तो बाष्पसन्दिग्धया गिरा ।
अशक्नुवन् धारयितुं वचनं चेदमब्रवीत् ॥

संसदि प्रकृतिभिर्भवद्युक्त उपासितुम् ।
मृगैः परिवृतः सोऽयमार्यो ममाग्रजः ॥
सोऽभिर्भक्ष्यमाहर्त्तुं यो वै वसितः पुरा ।
ताजिने सोऽयमिह प्रभो जगतीतले ॥
विविधाश्रिताः सततं सदा ।
जटाभारमिमं सहते राघवः कथम् ॥
नेन महार्हेण यस्याङ्गमुपसेवितम् ।
नेन तस्याङ्गमिदं कथमार्यस्य सेव्यते ॥
निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः ।
जीवितं नृशंसस्य मम लोकविगर्हितम् ॥

इत्येवं विलपन् दीनः प्रस्विन्नमुखपङ्कजः ।
पादावप्राप्य रामस्य पपात भरतो रुदन् ॥
भितप्तो भरतो राजपुत्रो महाबलः ।
आर्येत्येवाभिसंक्रुश्य व्याहर्त्तुं नाशकत्तदा ॥
शत्रुघ्नश्चापि रामस्य ववन्दे चरणौ रुदन् ।
उभौ च समालिङ्ग्य रामोऽप्यश्रूण्यवर्त्तयत् ॥
रामो महाप्राज्ञो भरतं गुरुवत्सलम् ।
आगतेन सह भ्राता प्रष्टुं समुपचक्रमे ॥
तदिच्छेयमहं श्रोतुं प्रव्याहृतं त्वया ।
त्त्वमागतो देशमिमं चीरजटाजिनी ॥

यन्निमित्तमिमं देशं कृष्णाजिनजटाधरः ।
हित्वा राज्यं प्रविष्टस्त्वं तत् सर्व्वं वक्तुमर्हसि ॥
इत्युक्तः कैकयीपुत्रः काकुत्स्थेन महात्मना ।
दीर्घमुष्णञ्च निश्वस्य प्राञ्जलिर्वाक्यमब्रवीत् ॥
पतिष्यति महाघोरे नरके जननी मम ।
चकार सा महत् पापमिदमात्मयशोहरम् ॥
तस्य मे दासभूतस्य प्रसादं कर्त्तुमर्हसि ।
राज्यं प्राप्नुहि धर्म्मेण सकाशात् सुहृदः कुरु ॥
एभिश्च सचिवैः सार्द्धं शिरसा याचितो मया ।
भ्रातुः शिष्यस्य दासस्य प्रसादं कर्त्तुमर्हसि ॥
एवमुक्त्वा महाबाहुः सवाष्पः कैकयीसुतः ।
रामस्य शिरसा पादौ जग्राह भरतः पुनः ॥
तं मत्तमिव मातङ्गं निश्वसन्तं पुनः पुनः ।
भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥
कुलीनः सत्त्वसम्पन्नस्तेजस्वी चरितव्रतः ।
राज्यहेतोः कथं पापमाचरेन्मद्विधो जनः ॥
न दोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन ।
नचापि जननीं बाल्यात् त्वं विगर्हितुमर्हसि ॥
यावत् पितरि धर्मज्ञे गौरवं लोकसत्कृते ।
तावत् धर्मकृतां श्रेष्ठ जनन्यामपि गौरवम् ॥

ताभ्यां धर्म्मशीलाभ्यां वनं गच्छेति राघव ।
मातापितृभ्यामुक्तोऽहं कथमन्यत् समाचरे ॥
त्वया राज्यमयोध्यायां प्राप्यं लोकसत्कृतम् ।
वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥
स च प्रमाणं धर्म्मात्मा राजा लोकगुरुस्तव ।
पित्रा दत्तं यथाभागमुपभोक्तुं त्वमर्हसि ॥
रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह ।
किं मे धर्म्मविहीनस्य राजधर्म्मः करिष्यति ॥
शाश्वतोऽयं सदा धर्म्मः स्थितोऽस्मासु नरर्षभ ।
ज्येष्ठे पुत्रे स्थिते राज्ञां न कनीयान् भवेन्नृपः ॥
स समृद्धां मया सार्द्धमयोध्यां गच्छ राघव ।
अभिषेचय चात्मानं कुलस्यास्य भवाय नः ।
वनस्थे च मयि तु त्वयि चारण्यमाश्रिते ।
श्रीमान् स्वर्गं गतो राजा यायजूकः सताम्मतः ॥
निष्क्रान्तमात्रे भवति सहसीते सलक्ष्मणे ।
दुःखशोकाभिभूतस्तु राजा त्रिदिवमभ्यगात् ॥
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः ।
अहं चायञ्च शत्रुघ्नः पूर्व्वमेव कृतोदकौ ॥
प्रियेण किल दत्तं हि पितृलोकेषु राघव ।
अक्षय्यं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ॥

त्वामेव शोचंस्तव दर्शनेप्सु-
स्त्वय्येव सक्तामनिवर्त्य बुद्धिम् ।
त्वया विहीनस्तव शोकरुग्न-
स्त्वां संस्मरन्नेव गतः पिता नः ॥

तां श्रुत्वा करुणां वाचं पितुर्मरणसंहिताम् ।
राघवो भरतेनोक्तां बभूव गतचेतनः ॥
उत्क्षिप्य रामो बाहू वै पुष्पिताङ्ग इव द्रुमः ।
वने परशुना कृत्तस्तथा भुवि पपात ह ॥
स तु संज्ञां पुनर्लब्ध्वा नेत्राभ्यामस्रमुत्सृजन् ।
उपाक्रामत काकुत्स्थः कृपणं बहु भाषितुम् ॥
किं करिष्याम्ययोध्यायां ताते दिष्टां गतिं गते ।
कस्तां राजवराद्धीनामयोध्यां पालयिष्यति ॥
किन्नु तस्य मया कार्यं दुर्जातेन महात्मनः ।
यो मृतो मम शोकेन स मया न च संस्कृतः ॥
अहो भरत सिद्धार्थो येन राजा त्वयानघ ।
शत्रुघ्नेन च सर्वेषु प्रेतकृत्येषु सत्कृतः ॥
निष्प्रधानामनेकाग्रां नरेन्द्रेण विनाकृताम् ।
निवृत्तवनवासोऽपि नायोध्यां गन्तुमुत्सहे ॥
समाप्तवनवासं मामयोध्यायां परन्तप ।
कोऽनुशासिष्यति पुनस्ताते लोकान्तरं गते ॥

एवमुक्त्वा तु भरतं भार्य्यामभ्येत्य राघव।
उवाच शोकसन्तप्तः पूर्णचन्द्रनिभाननाम् ॥
सीते मृतस्ते श्वशुरः पितृहीनोऽसि लक्ष्मण।
भरतो नूनमाचष्टे स्वर्गतिं पृथिवीपतेः ॥
ततो बहुगुणं तेषां बाष्पं नेत्रेष्वजायत।
तथा ब्रुवति काकुत्स्थे कुमाराणां यशस्विनाम् ॥
सीता तु स्वर्गतं श्रुत्वा श्वशुरं तं महानृपम्।
नेत्राभ्यामश्रुपूर्णाभ्यां न शशाकेक्षितुं प्रियम् ॥
ततो नित्यानुगस्तेषां विदितात्मा महामतिः।
मृदुर्दान्तश्च कान्तश्च रामे च दृढभक्तिमान्।
सुमन्त्रस्तैर्नृपसुतैः सार्द्धमाश्वास्य राघवम्।
अवातारयदालम्ब्य नदीं मन्दाकिनीं शुभाम् ॥
प्रगृह्य च महाभागो जलपूरितमञ्जलिम्।
दिशं याम्यामभिमुखो रुदन् वचनमब्रवीत् ॥
एतत्ते राजशार्दूल विमलं तोयमक्षयम्।
पितृलोकगतस्याद्य मद्दत्तमुपतिष्ठताम् ॥
ततो मन्दाकिनीतीरात् प्रत्युत्तीर्य्य स राघवः।
पितुश्चकार तेजस्वी निवापं भ्रातृभिः सह ॥
ततस्तेनैव मार्गेण प्रत्युत्तीर्य्य सरित्तटात्।
आरुरोह नरव्याघ्रो रम्यसानुं महीधरम् ॥

ततः पर्णकुटीद्वारमासाद्य जगतीपतिः ।
प्रतिजग्राह पाणिभ्यामुभौ भरतलक्ष्मणौ ॥
तेषान्तु रुदतां शब्दात् प्रतिशब्दोऽभवद्गिरौ ।
भ्रातॄणां सह वैदेह्या सिंहानां नर्दतामिव ॥
महाबलानां रुदतां कुर्व्वतामुदकं पितुः ।
आकर्ण्य तुमुलं शब्दं त्रस्ता भरतसैनिकाः ॥
अब्रुवंश्चापि रामेण भरतः सङ्गतो ध्रुवम् ।
तेषामेव महाशब्दः शोचतां पितरं मृतम् ॥
अथ वाहान् परित्यज्य तं सर्व्वेऽभिमुखाः स्वनम् ।
अप्येकमनसो जग्मुर्यथास्थानं प्रधाविताः ॥
हयैरन्ये गजैरन्ये रथैरन्ये स्वलङ्कृतैः ।
सुकुमारास्तथैवान्ये पद्भिरेव नरा ययुः ॥
अचिरप्रोषितं रामं चिरविप्रोषितं यथा ।
द्रष्टुकामो जनः सर्व्वो जगाम सहसाश्रमम् ॥
ततस्तं पुरुषव्याघ्रं यशस्विनमकल्मषम् ।
आसीनं स्थण्डिले रामं ददर्श सहसा जनः ॥
विगर्हमाणः कैकेयीं मन्थरासहितामपि ।
अभिगत्य जनो रामं बाष्पपूर्णमुखोऽभवत् ॥
तान्नरान् बाष्पपूर्णाक्षान् समीक्ष्याथ सुदुःखितान् ।
पर्य्यष्वजत धर्म्मज्ञः पितृवन्मातृवच्च सः ॥

ततः पुरुषसिंहानां वृतानां तैः सुहृद्गणैः ।
शोचतामेव रजनी दुःखेन व्यत्यवर्त्तत ॥

रजन्यां तु प्रभातायां भ्रातरस्ते सुहृद्वृताः ।
मन्दाकिन्यां हुतं जप्यं कृत्वा राममुपागमन् ॥
तूष्णीं ते समुपासीना न कश्चित् किञ्चिदब्रवीत् ।
भरतस्तु सुहृन्मध्ये रामं वचनमब्रवीत् ॥
प्रोषिते मयि यत् पापं मात्रा मत्कारणात् कृतम् ।
क्षुद्रया न तदिष्टं मे प्रसीदतु भवान् मम ॥
धर्म्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम् ।
हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम् ॥
कथं दशरथाज्जातः शुभाभिजनकर्म्मणः ।
जानन् धर्ममधर्मञ्च कुर्य्यां कर्म जुगुप्सितम् ॥
को हि धर्म्मार्थयोर्हीनमीदृशं कर्म्म गर्हितम् ।
स्त्रियाः प्रियचिकीर्षुः सन् कुर्य्याद्धर्म्मज्ञ धर्म्मवित् ॥
अन्तकाले हि भूतानि मुह्यन्तीति पुरा श्रुतिः ।
राज्ञैवं कुर्व्वता लोके प्रत्यक्षा सा श्रुतिः कृता ॥
तस्य तं मतिसम्मोहमन्तकालसमुद्भवम् ।
तातस्य समतिक्रान्तं प्रत्याहर्त्तुं त्वमर्हसि ॥
पितुर्हि समतिक्रान्तं यः साधु कुरुते सुतः ।
तदपत्यं मतं लोके विपरीतमतोऽन्यथा ॥

तदपत्यं भवानस्तु मेदं त्वं दुष्कृतं पितुः ।
अनुवर्त्तस्व काकुत्स्थ लोके साधुविगर्हितम् ॥
कैकेयीं मां च तातञ्च सुहृदो बान्धवांश्च नः ।
पौरान् जानपदान् सर्व्वान् त्रायस्व सकलानिमान् ॥
क्व चारण्यं क्व च क्षात्रं क्व जटाः क्व च पालनम् ॥
ईदृशं व्याहतं कर्म न भवान् कर्त्तुमर्हति ॥
एष हि प्रथमो धर्म्मः क्षत्रियस्याभिषेचनम् ।
येन शक्यं महाप्राज्ञ प्रजानां परिपालनम् ॥
अथ क्लेशजमेव त्वं धर्म्मं चरितुमिच्छसि ।
धर्म्मेण चतुरो वर्णान् पालयन् क्लेशमाप्नुहि ॥
चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमम् ।
प्राहुर्धर्म्मज्ञ धर्म्मज्ञास्तं कथं त्यक्तुमिच्छसि ॥
श्रुतेन बुद्ध्या ज्ञानेन जन्मना चावरो ह्यहम् ।
स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥
इहैव त्वाभिषिञ्चन्तु सर्व्वाः प्रकृतयः सह ।
अभिषिक्तस्त्वमस्माभिरयोध्यापालने व्रज ॥
अद्यार्य्य मुदिताः सन्तु सुहृदस्तेऽभिषेचने ।
अद्य भीताः पलायन्तु दुर्हृदस्ते दिशो दश ॥
आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ ।
अद्य तत्र भवन्तञ्च पितरं रक्ष किल्बिषात् ।

शिरसा त्वाभियाचेऽहं कुरुष्व करुणां मयि ॥
अथ मां पृष्ठतः कृत्वा वनमेव भवानितः ।
गमिष्यति गमिष्यामि भवता सार्धमप्यहम् ॥
तथा भरतेनोक्तो रामो वर्णाश्रमे स्थितः ।
तदं वचनमक्लीबं मध्ये परिषदोऽब्रवीत् ॥
उपपन्नमिदं वाक्यं यस्त्वमेवमभाषथाः ।
जातः पुत्रो दशरथात् कैकेय्यां राजसत्तमात् ॥
पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् ।
मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ॥
सा सम्प्रतिश्राव्य तव माता यशस्विनी ।
अयाचत नरश्रेष्ठ द्वौ वरौ वरवर्णिनी ॥
तव राज्यं नरव्याघ्र मम प्रव्राजनं तथा ।
तच्च राजा तथा तस्यै नियुक्तः प्रददौ वरम् ॥
तेन पित्राहमप्यत्र नियुक्तः पुरुषर्षभ ।
चतुर्दश वने वासं वर्षाणि वरदानिकम् ॥
सोऽहं वनमिदं दुर्गं निर्जनं लक्ष्मणान्वितः ।
अभीतश्चागतो वीर सत्यवाक्ये स्थितः पितुः ॥
भवानपि तथा क्षिप्रं पितरं सत्यवादिनम् ।
कर्तुमर्हति राजेन्द्र क्षिप्रमेवाभिषेचनात् ॥
ऋणान्मोचय राजानं मत्कृते भरत प्रभुम् ।

पितरं त्राहि धर्मज्ञ मातरञ्चाभिनन्दय ॥

अयोध्यां गच्छ भरत प्रकृतीरनुरञ्जय ।

मन्त्रसहितो वीर सह सर्वैर्द्विजातिभिः ॥

प्रवेक्ष्ये दण्डकारण्यमहमप्यविलम्बयन् ।

आभ्यान्तु सहितो वीर सीतया लक्ष्मणेन च ॥

——०००——

सम्पूर्णम् ।

तावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि। तथापि व्याघ्रो मानुषं खादतीति लोकापवादो दुर्निवारः। मया च धर्मशास्त्राण्यधीतानि। शृणु

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा।
आत्मौपम्येन भूतानां दयां कुर्वन्ति साधवः॥

त्वञ्चातीव दुर्गतस्तेन तत्तुभ्यं दातुं सयत्नोऽहम्। तथा चोक्तम्

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।

ततो यावदसौ तद्वचःप्रतीतो लोभात् सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। तं पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् अहह महापङ्के पतितोऽसि अतस्त्वामहमुत्थापयामि। इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्

न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः॥

अपरञ्च

सर्व्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्व्वान् स्वभावो मूर्द्धि वर्त्तते ॥

तस्मात् भद्रं न कृतं यदत्र मारात्मके विश्वासः कृत इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अतः सर्व्वथा अविचारितं कर्म्म न कर्त्तव्यमिति ।

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह — किमेवमुच्यते ।

वृद्धस्य वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्व्वत्रैवं विचारे तु भोजनेऽप्यप्रवर्त्तनम् ॥

यतः

शङ्काभिः सर्व्वमाक्रान्तमन्नं पानञ्च भूतले ।
प्रवृत्तिः कुत्र कर्त्तव्या जीवितव्यं कथं नु वा ॥
ईर्ष्यी घृणी त्वसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥

अनन्तरं सर्व्वे तण्डुलकणलोभेन नभोमण्डलादवतीर्य्य जालनिबद्धा बभूवुः ।

ततो यस्य वचनात्तत्रावलम्बितास्तं सर्व्वे तिरस्कुर्व्वन्ति ।

यतः

न गणस्याग्रतो गच्छेत् सिद्धे कार्य्ये समं फलम्।
यदि कार्य्यविपत्तिः स्यान्मुखरस्तत्र हन्यते॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच नायमस्य दोषः।

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने॥

विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्य्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्।

यतः। विपदि धैर्य्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्॥

अन्यच्च

षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता॥

इदानीमेवं क्रियतां सर्व्वैरेकचित्तीभूय जालमादाय उड्डीयताम्।

यतः

अल्पानामपि वस्तूनां संहतिः कार्य्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः॥

इति श्रुत्वा पक्षिणः सर्व्वे जालमादाय उत्प-

तिताः। अनन्तरं स व्याधः सुदूरादलक्ष्यान्
तानवलोक्य पश्चाद्धावितोऽचिन्तयत्

संहतास्तु हरन्तीमे जालं मम विहङ्गमाः।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा॥

ततस्तेषु चक्षुर्विषयमतिक्रान्तेषु पक्षिषु स व्याधो
निवृत्तः।

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः। कि-
मिदानीं कर्तुमुचितम्। चित्रग्रीव उवाच अस्माकं
मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे
चित्रवने निवसति सोऽस्माकं पाशांश्छेत्स्यति
इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः।
हिरण्यकश्च सर्वदा अपायशङ्कया शतद्वारं वि-
वरं कृत्वा निवसति। ततो हिरण्यकः कपोतावपा-
तभयाच्चकितस्तूष्णीं स्थितः।

चित्रग्रीव उवाच सखे हिरण्यक कथमस्मा-
न्न सम्भाषसे। ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय
ससम्भ्रमं बहिर्निःसृत्याब्रवीत् आः पुण्यवानस्मि
प्रियसुहृन्मे चित्रग्रीवः समायातः।

यस्य मित्रेण सम्भाषो यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥

अथ पाशबद्धांश्चैतान् दृष्ट्वा सविस्मयः क्षणं स्थि-

उवाच सखे किमेतत्। चित्रग्रीव उवाच सखे अस्माकमविमृश्यकारितायाः फलमेतत्।

रोगशोकपरीतापबन्धनव्यसनानि च।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्॥

मूषिकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति। चित्रग्रीव उवाच मित्र मैवं कुरु। पूर्व्वमस्मदाश्रितानामेषां तावत् पाशांश्छिन्धि मम पाशं पश्चात् छेत्स्यसि। हिरण्यकोऽप्याह अहमल्पशक्तिः दन्ताश्च मे कोमलाः तदेतेषां पाशांश्छेत्तुं कथं समर्थः। तत् यावन्मे दन्ता न त्रुट्यन्ति तावत्तव पाशं छिनद्मि। अनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि। चित्रग्रीव उवाच। अस्त्वेवं तथापि यथाशक्ति बन्धनमेतेषां खण्डय।

हिरण्यकेनोक्तम् आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिवेदिनां सम्मतम्।

यतः

धर्म्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः।
तान्निघ्नता किन्न हतं रक्षता किन्न रक्षितम्॥

चित्रग्रीव उवाच नीतिस्तावदीदृश्येव। किन्त्वहमस्मदाश्रितानां दुःखं सोढुं सर्व्वथैवासमर्थस्तेनेदं ब्रवीमि।

अयमपरश्चासाधारणो हेतुः

जातिद्रव्यबलानाञ्च साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किन्तद्भविष्यति ॥

किञ्च

धनानि जीवितञ्चैव परार्थे प्राज्ञ उत्सृजेत्
सन्निमित्ते वरं त्यागो विनाशे नियते सति
यदि नित्यमनित्येन निर्म्मलं मलवाहिना ।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम
शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम्
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणा

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पु
कितः सन्नब्रवीत् साधु मित्र साधु अनेनाश्रि
वात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्य
एवमुक्त्वा तेन सर्व्वेषां बन्धनानि छिन्नानि ।
हिरण्यकः सर्व्वान् सादरं सम्पूज्याह सखे चित्रग्
सर्व्वथा अत्र जालबन्धनविधौ सति दोषमाश
आत्मन्यवज्ञा न कर्त्तव्या । इति प्रबोध्याति
कृत्वा आलिङ्ग्य च संप्रेषितश्चित्रग्रीवः सप
वारो यथेष्टदेशान् ययौ । हिरण्यकोऽपि स्व
वरं प्रविष्टः ।

अथ लघुपतनकनामा वायसः सर्व्ववृत्तान्त

आश्चर्यमिदमाह अहो हिरण्यक श्लाघ्योऽसि ।
अतोऽहमपि त्वया सह मैत्रीमिच्छामि । त्वं मां
मैत्र्येणानुग्रहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यकोऽ-
पि विवराभ्यन्तरादाह कस्त्वम् । स ब्रूते लघुप-
तनकनामा वायसोऽहम् । हिरण्यको विहस्याह
आः का त्वया सह मैत्री ।

यतः

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥

अपरञ्च

भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं यतः ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥

वायसोऽब्रवीत् कथमेतत् । हिरण्यकः कथयति ।

अस्ति मगधदेशे चम्पकवती नामारण्यानी ।
तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः ।
स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचित्
शृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत्
आः कथमेतन्मांसं सुललितं भक्षयामि । भवतु
विश्वासं तावदुत्पादयामि । इत्यालोच्य उपसृत्य-
ाब्रवीत् मित्र कुशलं ते । मृगेणोक्तं कस्त्वम् ।
स ब्रूते क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये

बन्धुहीनो मृतवन्निवसामि। इदानीं त्वां मि
मासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि
अधुना तवानुचरेण मया सर्वथा भवितव्यमि
मृगेणोक्तमेवमस्तु।

ततः पश्चादस्तं गते सवितरि भगवति मरी
मालिनि तौ मृगस्य वासभूमिं गतौ। तत्र च
कवृक्षशाखायां सुबुद्धिनामा काको मृगस्य चि
रमित्रं निवसति। तौ दृष्ट्वा काकोऽवदत् सखे को
द्वितीयः। मृगो ब्रूते जम्बुकोऽयमस्मत्सख्य
च्छन्नागतः। काको ब्रूते मित्र अकस्मादागन्
सह मैत्री न युक्ता।

तथा चोक्तम्

अज्ञातकुलशीलस्य वासो देयो न कस्यचि
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः

तावाहतुः कथमेतत्। काकः कथयति

अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्व
महान् पर्कटी वृक्षः। तस्य कोटरे जरद्गवना
वृद्धो गृध्रः प्रतिवसति। अथ कृपया तज्जीवन
तद्वृक्षवासिनः पक्षिणः स्वाहारात् किञ्चिदुद्धृत्य द
तेनासौ जीवति।

अथ कदाचिद्दीर्घकर्णनामा मार्जारः पक्षि

कान् भक्षितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा
शावकैर्भयार्त्तैः कोलाहलः कृतः । तच्छ्रुत्वा
रद्गवेनोक्तं कोऽयमायाति । दीर्घकर्णो गृध्रमव-
लोक्य सभयमाह हा हतोऽस्मि ।

यतः

तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।
आगतन्तु भयं वीक्ष्य प्रतिकुर्य्याद्यथोचितम् ॥

धुना संन्निधाने पलायितुमक्षमः । तद्भवतु तावत्
विश्वासमुत्पाद्य अस्य समीपमुपगच्छामि । इत्या-
लोच्य उपसृत्याब्रवीत् आर्य्य त्वामभिवन्दे ।
गृध्रोऽवदत् कस्त्वम् सोऽवदत् मार्जारोऽहम् ।
गृध्रो ब्रूते दूरमपसर न चेद्धन्तव्योऽसि मया ।
मार्जारोऽवदत् श्रूयतां तावत् मम वचनम् । ततो
यद्यहं वध्यस्तदा हन्तव्यः ।

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥

गृध्रो ब्रूते ब्रूहि किमर्थमागतोऽसि ।
सोऽवदत् अहमत्र गङ्गातीरे नित्यस्नायी
निरामिषाशी ब्रह्मचारी चान्द्रायणव्रतमाचरं-
स्तिष्ठामि । युष्मान् धर्म्मज्ञानरतान् विश्वासभूमय
एते पक्षिणः सर्व्वे सर्व्वदा ममाग्रे प्रस्तुवन्ति ।

अतो भवद्भ्योविद्यावयोवृद्धेभ्यो धर्म्मं श्रोतुमिहा गतः। भवन्तश्चैतादृशा धर्म्मज्ञाः यन्मामतिथिं हन्तु मुद्यताः। गृहस्थधर्म्मश्चैषः

अरावप्युचितं कार्य्यमातिथ्यं गृहमागते।
छेत्तुः पार्श्वगतां छायां नोपसंहरति द्रुमः॥

यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्य एव।

यतः

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नो च्छिद्यन्ते कदाचन॥

न्यच्च

उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः॥

गृध्रोऽवदत् मार्जारा हि मांसरुचयः पक्षिशा काश्चात्र निवसन्ति तेनाहमेवं ब्रवीमि। तच्छ्रु मार्ज्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च म धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्र यणमध्यवसितम्। यतः परस्परं विवदमाना मपि धर्मशास्त्राणां अहिंसा परमो धर्म इत्यत्रैक मत्यम्।

सर्व्वहिंसानिवृत्ता ये नराः सर्वंसहाश्च ये।

सर्व्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥
एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥
योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम् ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्व्विमुच्यते ॥
स्वच्छन्दवनजातेन शाकेनापि प्रपूर्य्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्य्यात् पातकं महत् ॥
एवं विश्वास्य स मार्ज्जारस्तरुकोटरे स्थितः ।

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । येषामपत्यानि खादितानि तैः शोकार्त्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत् परिज्ञाय मार्ज्जारः कोटरान्निःसृत्य बहिः पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरम् अनेनैव जरद्गवेनास्माकं शावकाः खादिता इति सर्व्वैः पक्षिभिर्न्निश्चित्य गृध्रो व्यापादितः ।

इत्याकर्ण्य जम्बुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एवासीत् । तत् कथं भवता सह एतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्द्धते ।

अथवा

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥
अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ॥

यथायं मृगो मम बन्धुस्तथा भवानपि । मृगो ब्रवीत् किमनेनोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखमनुभवद्भिः स्थीयताम् ।

यतः

न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥

काकेनोक्तमेवमस्तु ।

एकदा निभृतं शृगालो ब्रूते सखे मृग अस्मिन् वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति । तदहं त्वां नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति । अथ क्षेत्रपतिना तद् दृष्ट्वा पाशो योजितः । अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत् को मामितः कालपाशादिव व्याधपाशात् त्रातुं समर्थो मित्रादन्यः । अत्रान्तरे शृगालस्तत्रागत्य उपस्थितोऽचिन्तयत् फलिता तावदस्माकं कपटप्रबन्धेन मनोरथावाप्तिः । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तानि अस्थीनि मयाव

साध्यानि । तानि च बाहुल्येन भोजनानि भवि-
ष्यन्ति । मृगस्तं दृष्ट्वोल्लासितो ब्रूते सखे किञ्चि-
द्वञ्चक अन्यं मनुष्यं तावत्स्य भाक् ।

उक्तं च :

उत्सवे व्यसने चैव दुर्भिक्षे शत्रुविग्रहे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥

जम्बुकः पाशं विलोक्य मुहुश्चिन्तयन् दृढ-
स्तावदयं बन्धः । ब्रूते च सखे स्नायुनिर्मिता-
स्तावत्पाशास्तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि ।
मित्र यदि चित्ते नान्यथा मन्यसे तदा प्रभाते
यत्त्वया वक्तव्यं तत् कर्तव्यमिति ।

अनन्तरं स काकः प्रदोषकाले मृगमनागतम-
वलोक्य इतस्ततोऽन्विष्यन् तथाविधं दृष्ट्वोवाच सखे
किमेतत् । मृगेणोक्तम् अवधीरितसुहृद्वाक्य-
स्य फलमेतत् ।

तथा चोक्तम्

सुहृदां हितकामानां यः शृणोति न भाषितम् ।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः ॥

काको ब्रूते स वञ्चकः क्वास्ते । मृगेणोक्तं मन्मां-
सार्थी तिष्ठत्यत्रैव । काको ब्रूते उक्तमेव
मया पूर्वम् ।

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम् ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥
परोक्षे कार्य्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्ज्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥

ततः काको दीर्घं निश्वस्य अरे वञ्चक किं त्वया पापकर्म्मणा कृतम् ।

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि ॥

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशं गच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तं सखे मृग त्वमात्मानं मृतवत् सन्दर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ । अहं तव चक्षुषी चञ्च्वा विलिखामि । यदाहं शब्दं करोमि त्वमुत्थाय सत्वरं पलायिष्यसि । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । आः स्वयं मृतोऽसि इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान् ग्रहीतुं सत्वरो बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो व्यापादितः ।

एतत् श्रुत्वा लघुपतनकः पुनराह

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ॥

हिरण्यको ब्रूते चपलस्त्वं चपलेन सह स्नेहः सर्वथा न कर्त्तव्यः । किञ्चान्यत् शत्रुपक्षो भवा नस्माकम् । उक्तञ्चैतत्

शत्रुणा नहि सन्दध्यात् सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥

दुर्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥

लघुपतनको ब्रूते श्रुतं मया सर्वम् । तथापि ममै तावानेव सङ्कल्पः यत् त्वया सह सौहृद्यमवश्यं करणीयमिति । नोचेदनाहारेणात्मानं तव द्वारि व्यापादयिष्यामि ।

एतद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह आप्यायितोऽहं भवतामनेन वचनामृतेन ।

किञ्च

वश्यमैत्री याच्ञा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥

एतद्वचनोक्तमेकमपि दूषणं त्वयि न लक्ष्यते । तद्भवतु भवतोऽभिमतमेव । इत्युक्त्वा हिरण्यको मैत्रं विधाय भोजनविशेषैर्वायसं [illegible]

वायसोऽपि स्वस्थानं गतः। ततः प्रभृति तयोरन्योन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कालोऽतिवर्त्तते।

एकदा लघुपतनको हिरण्यकमाह सखे वायसस्य कष्टलभ्याहारमिदं स्थानम्। तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि। हिरण्यको ब्रूते मित्र क्व गन्तव्यम्। वायसो ब्रूते अस्ति सुनिर्व्वापितं स्थानम्। हिरण्यकोऽवदत् किन्तत्। वायसो ब्रूते अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः। तत्र चिरकालोपार्ज्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्म्मः सहजधार्म्मिकः प्रतिवसति। स च भोजनविशेषैर्मां संवर्द्धयिष्यति। हिरण्यकोऽप्याह तत् किमत्रावस्थाय मया कर्त्तव्यं मामपि तत्र नय।

अथ वायसस्तेन मित्रेण सह चित्रालापकथासुखेन तस्य सरसः समीपं ययौ। ततो मन्थरो दूरादेव लघुपतनकमालोक्य उत्थाय यथोचितमातिथ्यं विधाय मूषिकस्याप्यतिथिसत्कारं चकार। वायसोऽवदत् सखे मन्थर सविशेषमाभ्यां विधेहि यतोऽयं पुण्यकर्म्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यको नाम मूषिकराजः। एतस्य गुणस्तुतिं

तन्महामहत्त्वद्वयेन यदि सर्पराजः कदाचित् कर्ण्
नयः स्यादित्युक्त्वा चित्रग्रीवोपाख्यानं कथितवान्।
तो मन्थरः सादरं हिरण्यकं प्रोवाच भद्र
त्समयो निर्जनवनागमनकारणमाख्यातुमर्हसि।
हिरण्यकोऽवदत् कथयामि श्रूयताम्।

अस्ति चम्पकाभिधानायां नगर्यां परिव्राजका-
लयः। तत्र चूडाकर्णो नाम परिव्राजकः प्रति-
वसति। स च भोजनावशिष्टभिक्षान्नसहितं भिक्षा-
पात्रं नागदन्तकेऽवस्थाप्य स्वपिति। अहञ्च तदन्नम्-
उत्प्लुत्य प्रत्यहं भक्षयामि। एकदा तस्य प्रियसुहृद्
वीणाकर्णो नाम परिव्राजकः समायातः। तेन
सह कथाप्रसङ्गावस्थितो मम त्रासार्थं जर्जरवंश-
खण्डेन चूडाकर्णो भूमिमताडयत्। वीणाकर्ण
उवाच सखे किमिति मम कथाविरक्तोऽन्यासक्तो-
ऽसि। चूडाकर्ण उवाच भद्र नाहं विरक्तः किन्तु
पश्यायं मूषिको ममापकारी सदा पात्रस्थं भिक्षा-
न्नमुत्प्लुत्य भक्षयति। वीणाकर्णो नागदन्तकम्
अवलोक्याह कथं मूषिकः स्वल्पबलोऽप्येतावद्दूरम्-
उत्पतति। तदत्र केनापि कारणेन भवितव्यम्।
क्षणं विचिन्त्य परिव्राजकेनोक्तं कारणमत्र धन-

अतः

धनवान् बलवान् लोके सर्व्वः सर्व्वत्र सर्व्वदा ।

प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥

ततः खनित्रमादाय तेन विवरं खनित्वा चिर-सञ्चितं मम धनं गृहीतम् । ततः प्रभृति निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमक्षमः सत्रासं मन्दं मन्दमुपसर्पन् चूडाकर्णेनावलोकितोऽहम् ततस्तेनोक्तम् ।

धनेन बलवान् लोको धनाद्भवति पण्डितः ।

पश्यैनं मूषिकं पापं स्वजातिसमतां गतम् ॥

एतदाकर्ण्य मयालोचितं ममात्रावस्थानमयुक्तमिदानीम् । यच्चान्यस्मै एतद्वृत्तान्तकथनं तदप्यनुचितम् यच्च याच्ञया जीवनं तदप्यतीव गर्हितम् तत् किमहं परपिण्डेनात्मानं पोषयामि । कष्टं भोः तदपि द्वितीयं मृत्युद्वारम् । यतः

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।

यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥

इत्यालोच्यापि लोभात् पुनरपि तदीयमन्नं ग्रहीतुं ग्रहमकरवम् ।

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जर-वंशखण्डेन ताडितोऽचिन्तयं लुब्धो ह्यसन्तुष्टो नियत-मात्मद्रोही भवति ।

सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ।
सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम् ॥
सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥
असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीबवचनं धन्यं कस्यापि जीवनम् ॥
न योजनशतं दूरं बाध्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥

तदत्रावस्थोचितकार्यपरिच्छेदः श्रेयान् । इत्या-लोच्याहं निर्जनवनमागतः । ततोऽस्मत्पुण्योदया-दनेन मित्रेणाहं स्नेहानुवृत्त्या अनुगृहीतः । अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः ।

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः सन्तुष्टाः सुखं तिष्ठन्ति स्म ।

अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासि-तोऽभ्यागत्य मिलितः । ततः पश्चादायान्तं भयहेतुं सम्भाव्य मन्थरो जलं प्रविष्टः मूषिकश्च विवरं गतः काकोऽपि उड्डीय वृक्षमारूढः । ततो लघुपतनकेन

मुहूर्तं निरूप्य भयहेतुर्न कोऽप्यालोकितः। पश्चा-
त्तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः।
मन्थरेणोक्तं भद्र मृग कुशलं ते। स्वेच्छयोदका-
द्याहारोऽनुभूयताम्। अत्रावस्थानेन वनमिदं
सनाथीक्रियताम्।

चित्राङ्गो ब्रूते लुब्धकत्रासितोऽहं भवतां शर-
णमागतः भवद्भिः सह सख्यमिच्छामि। हिरण्यको
वदत् मित्रत्वं तावदस्माभिः सह अयत्नेनैव निष्पन्नं
भवतः तदत्र भवता स्वगृहनिर्विशेषेण स्थीयताम्।
तच्छ्रुत्वा मृगः सानन्दः कृतस्वेच्छाहारः पानीयं
पीत्वा जलासन्नतरुच्छायायामुपविष्टः।

अथ मन्थरेणोक्तं सखे मृग केन त्रासितोऽसि
अस्मिन् विजने वने कदाचित् किं व्याधाः
सञ्चरन्ति।

मृगेणोक्तम् अस्ति कलिङ्गविषये रुक्माङ्गदो नाम
नृपतिः। स च दिग्विजयव्यापारक्रमेणागत्य चन्द्र-
भागानदीतीरे समावासितकटको वर्त्तते। प्रा-
तस्तेनात्रागत्य कर्पूरसरःसमीपे भवितव्यमिति।
व्याधानां मुखात् किंवदन्ती श्रूयते। तदत्रापि प्रा-
तरवस्थानं भयहेतुकमित्यालोच्य यथा कार्यं त-
दनुष्ठीयताम्। तच्छ्रुत्वा कूर्मः सभयमाह जलाशया

गच्छामि। काककूर्मावपि उक्तवन्तौ एवमस्तु। ततो हिरण्यको ब्रूते पुनर्जलाशये प्राप्ते मन्थरस्य कुशलं स्थले गच्छतोऽस्य कः प्रकारः।

तदिदं तस्य वचनमाकर्ण्य महता भयेन विमृश्य तं जलाशयमुत्सृज्य मन्थरश्चलितः। हिरण्यकादयः स्नेहादनिष्टं शङ्कमाना मन्थरमनुगच्छन्। ततः स्थले गच्छन् केनापि व्याधेन कानने पर्यटता मन्थरः प्राप्तः। तं गृहीत्वा धनुषि बद्ध्वा व्याधः स्वगृहाभिमुखं चलितः।

अथ ते मृगवायसमूषिकाः परं विषादमुपगता अनुगच्छन्ति स्म। ततो हिरण्यको विलपति

एकस्य दुःखस्य न यावदन्तं
गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे
छिद्रेष्वनर्था बहुलीभवन्ति॥

स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति॥
न मातरि न दारेषु न सोदर्ये न चात्मजे।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे॥

इति मुहुर्विचिन्त्य अहो दुर्दैवम्।

स्वकर्मसन्तानविचेष्टितानि
कालान्तरावर्त्तिशुभाशुभानि ।
इहैव दृष्टानि मयैव यानि ।
जन्मान्तराणीव दशान्तराणि ॥

अथवा इत्थमेवैतत्

काय: सन्निहितापाय: सम्पद: पदमापदाम्
समागमा: सापगमा: सर्वमुत्पादि भङ्गुरम् ।

एवं बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतन
काह यावदयं व्याधो वनान्न नि:सरति तावन्म
मोचयितुं यत्न: क्रियताम् । तावूचतु: सत्वरं क
मुपदिश । हिरण्यको ब्रूते चित्राङ्गो जलसमी
गत्वा मृतमिव आत्मानं निश्चेष्टं दर्शयतु । लघु
तकस्तु तस्योपरि स्थित्वा चञ्च्वा किमपि विलिख
नूनमनेन लुब्धकेन मृगमांसार्थिना कच्छपं परि
सत्वरं तत्र गन्तव्यम् । ततोऽहं मन्थरस्य
छेत्स्यामि । सन्निहिते लुब्धके भवद्भ्यां पला
तव्यम् ।

ततश्चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा
अनुष्ठिते सति स व्याध: श्रान्त: पानीयं पीत्वा
रधस्तादुपविष्टस्तथाविधं मृगमवलोक्य कच्छपं
समीपे निधाय कर्तरिकामादाय प्रहृष्टमना

तिकं चलितः। अत्रान्तरे हिरण्यकेनागत्य छिन्नबन्धनः स कूर्मः सत्वरं जलाशयं प्रविष्टः। स च लुब्धः आसन्नं तं आश्रममालोक्योत्थाय दूरं पलायितः।

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि॥

ततोऽसौ निराशः कटकं प्रविष्टः। मन्थरादयस्तु सर्वे मुक्तापदः स्वस्थाः सन्तो यथासुखमवस्थिताः।

विष्णुपुराणम्।

इन्द्रं प्रति दुर्वाससः कोपः।

दुर्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम्।
स ददर्श स्रजं दिव्यामृषिर्विद्याधरीकरे॥
सन्तानकानामखिलं यस्या गन्धेन वासितम्।
अतिसेव्यमभूद्ब्रह्मंस्तद्वनं वनचारिणाम्॥

उन्मत्तव्रतधृग्विप्रः स दृष्ट्वा शोभनां स्रजम्
तां ययाचे वरारोहां विद्याधरवधूं ततः ॥
याचिता तेन तन्वङ्गी मालां विद्याधराङ्गना
ददौ तस्मै विशालाक्षी सादरं प्रणिपत्य तम्
तामादायात्मनो मूर्ध्नि स्रजमुन्मत्तरूपधृक्
कृत्वा स विप्रो मैत्रेय परिबभ्राम मेदिनीम् ।
स ददर्श समायान्तमुन्मत्तैरावते स्थितम्
त्रैलोक्याधिपतिं देवं सह देवैः शचीपतिम्
तामात्मनः स शिरसः स्रजमुन्मत्तषट्पदाम्
आदायामरराजाय चिक्षेपोन्मत्तवन्मुनिः
गृहीत्वामरराजेन स्रगैरावतमूर्द्धनि ।
न्यस्ता रराज कैलासशिखरे जाह्नवी यथा
मदान्धकारिताक्षोऽसौ गन्धाकृष्टेन वारणः
करेणाघ्राय चिक्षेप तां स्रजं धरणीतले ।
ततश्चुक्रोध भगवान् दुर्वासा मुनिपुङ्गवः ।
मैत्रेय देवराजं तं क्रुद्धश्चैतदुवाच ह ।
ऐश्वर्यमत्त दुष्टात्मन्नतिस्तब्धोऽसि वासव
श्रियो धाम स्रजं यस्त्वं मद्दत्तां नाभिनन्दसि
प्रसाद इति नोक्तं ते प्रणिपातपुरःसरम्
हर्षोत्फुल्लकपोलेन न चापि शिरसा धृता
मया दत्तामिमां मालां यस्मान्न बहु मन्यसे

त्रैलोक्यश्रीरतो मूढ विनाशमुपयास्यति ॥
मां मन्यतेऽन्यैः सदृशं नूनं शक्र भवान् द्विजैः
ज्ञातोऽवमानमस्माकं मानिना भवता कृतम् ।
मद्दत्ता भवता यस्मात् क्षिप्ता माला महीतले
तस्मात् प्रनष्टलक्ष्मीकं त्रैलोक्यं ते भविष्यति ।
यस्य सञ्जातकोपस्य भयमेति चराचरम् ।
तं त्वं मामतिगर्वेण देवराजावमन्यसे ॥
महेन्द्रो वारणस्कन्धादवतीर्य त्वरान्वितः
प्रसादयामास तदा दुर्वाससमकल्मषम् ॥
प्रसाद्यमानः स तदा प्रणिपातपुरःसरम् ।
प्रत्युवाच सहस्राक्षं दुर्वासा मुनिसत्तमः ॥
नाहं कृपालुहृदयो न च मां भजते क्षमा ।
अन्ये ते मुनयः शक्र दुर्वाससमवेहि माम् ।
गौतमादिभिरन्यैस्त्वं गर्वमापादितो मुधा ।
अक्षान्तिसारसर्वस्वं दुर्वाससमवेहि माम् ।
वसिष्ठाद्यैर्दयासारैः स्तोत्रं कुर्वद्भिरुच्चकैः ।
गर्वं गतोऽसि येनैवं मामप्यत्रावमन्यसे ॥
ज्वलज्जटाकलापस्य भृकुटीकुटिलं मुखम् ।
निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम् ।
नाहं क्षमिष्ये बहुना किमुक्तेन शतक्रतो ।
विडम्बनामिमां भूयः करोष्यनुनयात्मिकाम्

इत्युक्त्वा प्रययौ विप्रो देवराजोऽपि तं पुनः ।
आरुह्यैरावतं ब्रह्मन् प्रययावमरावतीम् ॥

ध्रुवोपाख्यानम् ।

पराशर उवाच ।

प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु
द्वौ पुत्रौ सुमहावीर्यौ धर्म्मज्ञौ कथितौ तव
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद्ब्रह्मन् पितुरत्यन्तवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज
स नातिप्रीतिमांस्तस्यां तस्य चाभूद्ध्रुवः सुत
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम्
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
प्रत्यक्षं भूपतेस्तस्याः सुरुच्या नाभ्यनन्दत ।
प्रणयेनागतं पुत्रमुत्सङ्गारोहणोत्सुकम् ॥

सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम्
पितुः पुत्रं तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥
क्रियते किं वृथा वत्स महानेष मनोरथः ।
अन्यस्त्रीगर्भजातेन असम्भूय ममोदरे ॥

उत्तमोत्तमसंप्राप्यमविवेको हि वाञ्छसि ।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः ॥
एतद्राजासनं सर्वं भूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥
उच्चैर्मनोरथस्तेऽयं मत्पुत्रस्येव किं वृथा ।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ॥

उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयेदमभाषत ॥
वत्स कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥
इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालं प्रत्यक्षमतिगर्विता ॥

विनिःश्वस्येति कथिते तस्मिन् पुत्रे सुदुर्मनाः ।
श्वासक्षामेक्षणा दीना सुनीतिर्वाक्यमब्रवीत् ॥
सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्रक ।
न हि पुण्यवतां वत्स सपत्नैरेवमुच्यते ॥
नोद्वेगस्तात कर्तव्यः कृतं यद्भवता पुरा ।
तत्कोऽपहर्तुं शक्नोति दातुं कश्चाकृतं त्वया ॥
राजासनं तथा छत्रं वराश्वा वरवारणाः ।

यस्य पुण्यानि तस्यैते मत्वैतच्छाम्य पुत्रक ॥
अन्यजन्मकृतैः पुण्यैः सुरुच्यां सुरुचिर्नृपः ।
भार्य्येति प्रोच्यते चान्या मद्विधा भाग्यवर्ज्जि
पुण्योपचयसम्पन्नस्तस्याः पुत्रस्तथोत्तमः ।
मम पुत्रस्तथा जातः स्वल्पपुण्यो ध्रुवो भवान्
तथापि दुःखं न भवान् कर्त्तुमर्हति पुत्रक ।
यस्य यावत् स तेनैव स्वेन तुष्यति बुद्धिमान्
यदि वा दुःखमत्यर्थं सुरुच्या वचसा तव ।
तत्पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे ॥
सुशीलो भव धर्म्मात्मा मैत्रः प्राणिहिते र
निम्नं यथापः प्रवणाः पात्रमायान्ति सम्पद

ध्रुव उवाच ।

अम्ब यत्त्वमिदं प्रात्थ प्रशमाय वचो म
नैतद्दुर्व्वचसा भिन्ने हृदये मम तिष्ठति ॥
सोऽहं तथा यतिष्यामि यथा सर्व्वोत्तमोत्तम
स्थानं प्राप्स्याम्यशेषाणां जगतामपि पूजित
सुरुचिर्दयिता राज्ञस्तस्या जातो ऽस्मि नोद
प्रभावं पश्य मेऽम्ब त्वं वृद्धस्यापि तवोदरे
उत्तमः स मम भ्राता यो गर्भे न धृतस्त
स राजासनमाप्नोतु पित्रा दत्तं तथास्तु त
नान्यदत्तमभीप्सामि स्थानमम्ब स्वकर्म्मणा

इच्छामि तदहं स्थानं यन्न प्राप पिता मम ॥
निर्जगाम गृहात्तस्मात् ... मातरं ध्रुवः ।
पुरात् निष्क्रम्य ... महाद्युतिः ॥

भरतोपाख्यानम् ।

मैत्रेय उवाच ।

...भगवानाह भरतस्य महीपतेः ।
... चरितं तन्ममाख्यातुमर्हसि ॥

पराशर उवाच ।

शालग्रामे महाभागो भगवन्न्यस्तमानसः ।
स उवास चिरं कालं मैत्रेय पृथिवीपतिः ॥
अहिंसादिष्वशेषेषु गुणेषु गुणिनां वरः ।
अवाप परमां काष्ठां मनसश्चापि संयमे ॥
... सर्वं ... ।
... कर्म्माणि निःसङ्गो योगतापसः ॥
... महानदीम् ।
... तत्र तदा चक्रे स्नानस्यानन्तरक्रियाः ॥
अथाजगाम तत्तीर्थं जलं पातुं पिपासिता ।
आसन्नप्रसवा ... हरिणी वनात् ॥

ततः समभवत्तत्र पीतप्राये जले तथा ।
सिंहस्य नादः सुमहान् सर्वप्राणिभयङ्करः ॥
ततः सा सहसा त्रासादाकुलता निम्नगातटम् ।
अत्युच्चारोहणेनास्या नद्यां गर्भः पपात ह ॥
तमुह्यमानं वेगेन वीचिमालापरिप्लुतम् ।
जग्राह स नृपो गर्भात् पतितं मृगपोतकम् ॥
गर्भप्रच्युतिदोषेण प्रोत्तुङ्गाक्रमणेन च ।
मैत्रेय सापि हरिणी पपात च ममार च ॥
हरिणीं तां विलोक्याथ विपन्नां नृपतापसः
मृगपोतं समादाय निजमाश्रममागतः ॥
चकारानुदिनञ्चासौ मृगपोतस्य वै नृपः ।
पोषणं पुष्यमाणश्च स तेन ववृधे मुने ॥
चचाराश्रमपर्य्यन्ते तृणानि गहनेषु सः ।
दूरं गत्वा च शार्दूलत्रासादभ्याययौ पुनः ॥
प्रातर्गत्वातिदूरञ्च सायमायात्यथाश्रमम् ।
पुनश्च भरतस्याभूदाश्रमस्योटजाजिरे ॥
तस्य तस्मिन् मृगे दूरसमीपपरिवर्त्तिनि ।
आसीच्चेतः समासक्तं न ययावन्यतो द्विज ॥
विमुक्तराज्यतनयः प्रोज्झिताशेषबान्धवः
ममत्वं स चकारोच्चैस्तस्मिन् हरिणबालके
किं वृकैर्भक्षितो व्याघ्रैः किं सिंहेन निपातितः

चिरायमाणे निष्क्रान्ते तस्यासीदिति मानसम् ॥
एषा वसुमती तस्य खुराग्रक्षतकर्बुरा ।
प्रीतये मम जातोऽसौ क्व सैणकबालकः ॥
विषाणाग्रेण मद्बाहुं कण्डूयनपरो हि सः ।
क्षेमेणाभ्यागतोऽरण्यादपि मां सुखयिष्यति ॥
एते लूनशिखास्तस्य दशनैरचिरोद्गतैः ।
कुशाः काशा विराजन्ते बटवः सामगा इव ॥

इत्थं चिरगते तस्मिन् स चक्रे मानसं मुनिः ।
प्रीतः प्रसन्नवदनः पार्श्वस्थे चाभवन्मृगे ॥
समाधिभङ्गस्तस्यासीत् तन्मयत्वादृतात्मनः ।
सन्त्यक्तराज्यभोगर्द्धिस्वजनस्यापि भूपतेः ॥
चपलं चपले तस्मिन् दूरगं दूरगामिनि ।
मृगपोतेऽभवच्चित्तं स्थैर्यवत्तस्य भूपतेः ॥
कालेन गच्छता सोऽथ कालं चक्रे महीपतिः ।
पितेव सास्रं पुत्रेण मृगपोतेन वीक्षितः ॥
मृगमेव तदाद्राक्षीत् त्यजन्प्राणानसावपि ।
तन्मयत्वेन मैत्रेय नान्यत् किञ्चिदचिन्तयत् ॥

महाभारतम् ।

परीक्षिदुपाख्यानम् ।

ततोऽपरस्मिन् सम्प्राप्ते काले कस्मिंश्चिदेव तु ।
परीक्षिन्नाम राजासीत् ब्रह्मन् कौरववंशजः ।
मृगान् विध्यन् वराहांश्च तरक्षून् महिषांस्तथा ।
अन्यांश्च विविधान् वन्यांश्चचार पृथिवीपतिः ॥

स कदाचिन्मृगं विद्ध्वा बाणेनानतपर्व्वणा ।
पृष्ठतो धनुरादाय ससार गहने वने ॥
परिश्रान्तः पिपासार्त्त आससाद मुनिं वने ।
गवां प्रचारेष्वासीनं वत्सानां मुखनिःसृतम् ।
भूयिष्ठमुपयुञ्जानं फेनमापिबतां पयः ॥
तमभिद्रुत्य वेगेन स राजा संशितव्रतम् ।
अपृच्छद्धनुरुद्यम्य तं मुनिं क्षुच्छ्रमान्वितः ॥
भो भो ब्रह्मन्नहं राजा परीक्षिदभिमन्युजः ।
मया विद्धो मृगो नष्टः कच्चित्तं दृष्टवानसि ॥
स मुनिस्तं तु नोवाच किञ्चिन्मौनव्रते स्थितः ।

तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासजत् ।
समुत्क्षिप्य धनुष्कोट्या स चैनं समुपैक्षत ।

न स किञ्चिदुवाचैनं शुभं वा यदि वाशुभम् ॥
स राजा क्रोधमुत्सृज्य व्यथितस्तं तथागतम् ।
दृष्ट्वा जगाम नगरमृषिस्त्वास्ते तथैव सः ॥
नहि तं राजशार्दूलं क्षमाशीलो महामुनिः ।
स्वधर्मनिरतं भूपं समाक्षिप्तोऽप्यधर्षयत् ॥
नहि तं राजशार्दूलस्तथा धर्मपरायणम् ।
जानाति भरतश्रेष्ठस्तत एनमधर्षयत् ॥

तरुणस्तस्य पुत्रोऽभूत्तिग्मतेजा महातपाः ।
शृङ्गी नाम महाक्रोधो दुष्प्रसादो महाव्रतः ॥
सख्योक्तः क्रीड़मानेन स तत्र हसता किल ।
ऋषिपुत्रेण नर्म्मार्थं कृशेन द्विजसत्तम ॥
तेजस्विनस्तव पिता तथैव च तपस्विनः ।
शवं स्कन्धेन वहति मा शृङ्गिन् गर्व्वितो भव ॥
क्व ते पुरुषमानित्वं क्व ते वाचस्तथाविधाः ।
दर्पजाः पितरं द्रष्टा यस्त्वं शवधरं तथा ॥
एवमुक्तः स तेजस्वी शृङ्गी कोपसमन्वितः ।
मृतधारं गुरुं श्रुत्वा पर्य्यतप्यत मन्युना ॥
स तं कृशमभिप्रेक्ष्य सूनृतां वाचमुत्सृजन् ।
अपृच्छत्तं कथं तातः स मेऽद्य मृतधारकः ॥

कृश उवाच ।

राज्ञा परिक्षिता तात मृगयां परिधावता ।

अवसक्तः पितुस्तेऽद्य मृतः स्कन्धे भुजङ्गमः ॥

शृङ्गी उवाच ।

किं मे पित्रा कृतं तस्य राज्ञोऽनिष्टं दुरात्मनः ।
ब्रूहि तत् कृश तत्त्वेन पश्य मे तपसो बलम् ॥

कृश उवाच ।

स राजा मृगयां यातः परीक्षिदभिमन्युजः ।
ससार मृगमेकाकी विद्धा बाणेन शीघ्रगम् ॥
न चापश्यन्मृगं राजा चरंस्तस्मिन् महावने ।
पितरं ते स दृष्ट्वैव पप्रच्छानभिभाषिणम् ॥
तं स्थाणुभूतं तिष्ठन्तं क्षुत्पिपासाश्रमातुरः ।
पुनः पुनर्मृगं नष्टं पप्रच्छ पितरं तव ॥
स च मौनव्रतोपेतो नैव तं प्रत्यभाषत ।
तस्य राजा धनुष्कोट्या सर्पं स्कन्धे समासृजत्
शृङ्गिंस्तव पिता सोऽपि तथैवास्ते यतव्रतः ।
सोऽपि राजा स्वनगरं प्रस्थितो गजसाह्वयम्

श्रुत्वैवमृषिपुत्रस्तु शवं स्कन्धे प्रतिष्ठितम् ॥
कोपसंरक्तनयनः प्रज्वलन्निव मन्युना ॥
आविष्टः स हि कोपेन शशाप नृपतिं तदा ।
वार्य्युपस्पृश्य तेजस्वी क्रोधवेगबलात्कृतः ॥
योऽसौ वृद्धस्य तातस्य तथा कृच्छ्रगतस्य ह
स्कन्धे मृतं समास्राक्षीत् पन्नगं राजकिल्बिषी ॥

तं पाधमतिसंक्रुद्धस्तक्षकः पन्नगेश्वरः ।
[illegible]नाक्रवमन्तारं कुरूणामयशस्करम् ।
समरात्सादितो नेता यमस्य सदनं प्रति ॥
इति प्रसृतिर्संक्रुद्धः शृङ्गी पितरमभ्यगात् ।
[illegible]सीनं गोव्रजे तस्मिन् वहन्तं शवपन्नगम् ॥
स तमालक्ष्य पितरं शृङ्गी स्कन्धगतेन वै ।
[illegible]नेन भुजगेनासीद्भूयः क्रोधसमाकुलः ॥
[illegible]खाच्चाश्रूणि मुमुचे पितरञ्चेदमब्रवीत् ।
[illegible]त्वेमां धर्षणां तात तव तेन दुरात्मना ।
[illegible] धर्षिता कोपादशपं तमहं नृपम् ॥
सप्तमेऽहनि तं पापं तक्षकः पन्नगोत्तमः ।
[illegible]वस्वतस्य सदनं नेता परमदारुणम् ॥
तमब्रवीत् पिता ब्रह्मंस्तथा कोपसमन्वितम् ।
[illegible] मे प्रियं कृतं तात नैष धर्मस्तपस्विनाम् ॥
[illegible] तस्य नरेन्द्रस्य विषये निवसामहे ।
[illegible]यतो रक्षितास्तेन तस्य पापं न रोचये ॥
यदि राजा न संरक्षेत् पीडा नः परमा भवेत् ।
न [illegible] कुयाम चारितुं धर्मं पुत्र यथासुखम् ॥
[illegible]क्ष्यमाणा वयं तात राजभिर्धर्मदृष्टिभिः ।
[illegible]मो विपुलं धर्मं तेषां भागोऽस्ति धर्मतः ॥
[illegible]राजके [illegible] दोषा जायन्ति वै सदा ।

उद्वृत्तं सततं लोकं राजा दण्डेन शास्ति वै
नोद्विग्नश्चरते धर्म्मं नोद्विग्नश्चरते क्रियाम् ।
राज्ञा प्रतिष्ठितो धर्म्मो धर्म्मात् स्वर्गः प्रतिष्ठि
परीक्षित्तु विशेषेण यथास्य प्रपितामहः ।
रक्षत्यस्मांस्तथा राज्ञा रक्षितव्याः प्रजा विभो
तेनेह क्षुधितेनाद्य श्रान्तेन च तपस्विना ।
अजानता कृतं मन्ये व्रतमेतदिदं मम ॥
कस्मादिदं त्वया बाल्यात् सहसा दुष्कृतं कृतं
न सोऽर्हति नृपः शापमस्मत्तः पुत्र सर्व्वथा ॥

शृङ्गी उवाच ।

यद्येतत् साहसं तात यदि वा दुष्कृतं कृतम्
प्रियं वाप्यप्रियं वा ते वागुक्ता न मृषा भवेत्
नैवान्यथेदं भविता पितरेष ब्रवीमि ते ।
नाहं मृषा ब्रवीम्येव स्वैरेष्वपि कुतः शपन् ॥

शमीक उवाच ।

जानाम्युग्रप्रभावं त्वां तात सत्यगिरं तथा ।
नानृतं चोक्तपूर्व्वं ते नैतन्मिथ्या भविष्यति ॥
पित्रा पुत्रो वयःस्थोऽपि सततं वाच्य एव तु
किं पुनर्बाल एव त्वं तपसा भावितः सदा ॥
सोऽहं पश्यामि वक्तव्यं त्वयि धर्म्मभृतां वर
पुत्रत्वं बालताञ्चैव तवावेक्ष्य च साहसम् ॥

स त्वं शमपरो भूत्वा वन्यमाहारमाचरन्।
चर क्रोधमिमं हत्वा नैवं धर्मं प्रहास्यसि॥
क्रोधो हि धर्मं हरति यतीनां दुःखसञ्चितम्।
शम एव यतीनां हि क्षमिणां सिद्धिकारकः॥
क्षमावतामयं लोकः परश्चैव क्षमावताम्।
तस्माच्चरेथाः सततं क्षमाशीलो जितेन्द्रियः॥

ययात्युपाख्यानम्।

क्रुद्धेनोशनसा शप्तो ययातिर्नाहुषस्तदा।
पूर्वं वयः परित्यज्य जरां सद्योऽन्वपद्यत॥

ययातिरुवाच।

अतृप्तो यौवनस्याहं ध्रुवं भृगुकुलोद्वह।
प्रसादं कुरु मे ब्रह्मन् जरा मां न विशेद्यथा।

शुक्र उवाच।

नाहं मृषा ब्रवीम्येतज्जरां प्राप्तोऽसि भूमिप।
जरां त्वेतां त्वमन्यस्मिन् संक्रामय यदीच्छसि॥

ययातिरुवाच।

राज्यभाक् स भवेद्ब्रह्मन् पुण्यभाक् कीर्त्तिभाक् तथा।
यो मे दद्याद्वयः पुत्रस्तद्भवाननुमन्यताम्॥

शुक्र उवाच।

संक्रामयिष्यसि जरां यथेष्टं नहुषात्मज।

मामनुध्याय भावेन न च पापमवाप्स्यसि ॥
वयो दास्यति ते पुत्रो यः स राजा भविष्यति ।
आयुष्मान् कीर्त्तिमांश्चैव बह्वपत्यस्तथैव च ॥
जरां प्राप्य ययातिस्तु स्वपुरं प्राप्य चैव हि ।
पुत्रं ज्येष्ठं वरिष्ठञ्च यदुमित्यब्रवीद्वचः ॥
जरा वली च मां तात पलितानि च पर्य्यगुः ।
काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ॥
त्वं यदो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन त्वदीयेन चरेयं विषयानहम् ॥
पूर्णे वर्षसहस्रे तु पुनस्ते यौवनं त्वहम् ।
दत्त्वा स्वं प्रतिपत्स्यामि पाप्मानं जरया सह ।

यदुरुवाच ।

जरायां बहवो दोषाः पानभोजनकारिताः ।
तस्माज्जरां न ते राजन् ग्रहीष्य इति मे मतिः ॥
सितश्मश्रुर्निरानन्दो जरया शिथिलीकृतः ।
वलीसन्ततगात्रस्तु दुर्द्दर्शो दुर्ब्बलः कृशः ॥
अशक्तः कार्य्यकरणे परिभूतः सयौवनैः
सहोपजीविभिश्चैव तां जरां नाभिकामये ।
सन्ति ते बहवः पुत्रा मत्तः प्रियतरा नृप ।
जरां ग्रहीतुं धर्म्मज्ञ तस्मादन्यं वृणीष्व वै ॥

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मादराज्यभाक् तात प्रजा तव भविष्यति ॥
तुर्वसो प्रतिपद्यस्व पाप्मानं जरया सह ।
यौवनेन चरेयं वै विषयांस्तव पुत्रक ॥
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वञ्चैव प्रतिपत्स्यामि पाप्मानं जरया सह ॥

तुर्वसुरुवाच ।

न कामये जरां तात कामभोगप्रणाशिनीम् ।
बलरूपान्तकरणीं बुद्धिप्राणप्रणाशिनीम् ॥

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।
तस्मात् प्रजा समुच्छेदं तुर्वसो तव यास्यति ॥
एवं स तुर्वसुं शप्त्वा ययातिः सुतमात्मनः ।
शर्म्मिष्ठायाः सुतं द्रुह्युमिदं वचनमब्रवीत् ॥
द्रुह्यो त्वं प्रतिपद्यस्व वर्णरूपविनाशिनीम् ।
जरां वर्षसहस्रं मे यौवनं स्वं ददस्व च ॥
पूर्णे वर्षसहस्रे तु पुनर्दास्यामि यौवनम् ।
स्वञ्चादास्यामि भूयोऽहं पाप्मानं जरया सह ॥

द्रुह्युरुवाच ।

गजं न रथं नाश्वं जीर्णो भुङ्क्ते न च स्त्रियम् ।—

वाग्भङ्गश्चास्य भवति तां जरां नाभिकामये ॥

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।

तस्मात् द्रुह्यो प्रियः कामो न ते सम्पत्स्यते क्वचि

अनो त्वं प्रतिपद्यस्व पाप्मानं जरया सह

वर्षसहस्रन्तु चरेयं यौवनेन ते ॥

अनुरुवाच ।

जीर्णः शिशुवदादत्ते कालेऽन्नमशुचिर्यथा ।

न जुहोति च कालेऽग्निं तां जरां नाभिकामये

ययातिरुवाच ।

यत्त्वं मे हृदयाज्जातो वयः स्वं न प्रयच्छसि ।

जरादोषस्त्वया प्रोक्तस्तस्मात्त्वं प्रतिलप्स्यसे ॥

प्रजाश्च यौवनं प्राप्ता विनशिष्यन्त्यनो तव ।

अग्निप्रस्कन्दनपरस्त्वं चाप्येवं भविष्यसि ॥

पूरो त्वं मे प्रियः पुत्रस्त्वं वरीयान् भविष्य

जरा वली च मां तात पलितानि च पर्य्यगुः ॥

काव्यस्योशनसः शापान्न च तृप्तोऽस्मि यौवने ।

पूरो त्वं प्रतिपद्यस्व पाप्मानं जरया सह ॥

पूरुरुवाच ।

एवमुक्तः प्रत्युवाच पूरुः पितरमञ्जसा ।

यदात्थ मां महाराज तत् करिष्यामि ते वचः ॥

प्रतिपत्स्यामि ते राजन् पाप्मानं जरया सह ।
गृहाण यौवनं मत्तश्चर कामान् यथेप्सितान् ॥
जरयाहं प्रतिच्छन्नो वयोरूपधरस्तव ।
यौवनं भवते दत्त्वा चरिष्यामि यथात्थ माम् ॥

ययातिरुवाच ।

पूरो प्रीतोऽस्मि ते वत्स प्रीतश्चेदं ददामि ते ।
सर्व्वकामसमृद्धा ते प्रजा राज्ये भविष्यति ॥
एवमुक्त्वा ययातिस्तु स्मृत्वा काव्यं महातपाः ।
संक्रामयामास जरां तदा पूरौ महात्मनि ॥
पौरवेणाथ वयसा ययातिर्नहुषात्मजः ।
प्रीतियुक्तो नृपश्रेष्ठश्चचार विषयान् प्रियान् ।
यथाकामं यथोत्साहं यथाकालं यथासुखम् ॥
दीनाननुग्रहैरिष्टैः दस्यून् संनिग्रहेण च ।
अतिथीनन्नपानैश्च विशश्च परिपालनैः ॥
धर्म्मेण च प्रजाः सर्व्वा यथावदनुरञ्जयन् ।
ययातिः पालयामास साक्षादिन्द्र इवापरः ॥
स राजा सिंहविक्रान्तो युवा विषयगोचरः ।
अविरोधेन धर्म्मस्य चचार सुखमुत्तमम् ॥
स सम्प्राप्य शुभान् कामांस्तृप्तः खिन्नश्च पार्थिवः ।
कालं वर्षसहस्रान्तं सस्मार मनुजाधिपः ।
यदा स [illegible]ते कालं धर्म्मात्मा तं महीपतिः ।

पूर्णं मत्वा ततः कालं पूरुं पुत्रमुवाच ह ॥
यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्र यौवनेन मया तव ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ॥
यत् पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रि
एकस्यापि न पर्य्याप्तं तस्मात्तृष्णां परित्यजेत्
या दुस्त्यजा दुर्म्मतिभिर्या न जीर्य्यति जीर्य्यत
योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः स
पूर्णं वर्षसहस्रं मे विषयासक्तचेतसः ।
तथाप्यनुदिनं तृष्णा ममैतेष्वभिजायते ॥
तस्मादेनामहं त्यक्त्वा ब्रह्मण्याधाय मानसम्
निर्द्वन्द्वो निर्म्ममो भूत्वा चरिष्यामि मृगैः स
पूरो प्रीतोऽस्मि भद्रन्ते गृहाणेदं स्वयौवनं
राज्यं चेदं गृहाण त्वं त्वं हि मे प्रियकृत्सु

प्रतिपेदे जरां राजा ययातिर्नाहुषस्तद
यौवनं प्रतिपेदे च पूरुः स्वं पुनरात्मनः ॥
अभिषेक्तुकामं नृपतिं पूरुं पुत्रं कनीयस
ब्राह्मणप्रमुखा वर्णा इदं वचनमब्रुवन् ॥
कथं शुक्रस्य नप्तारं देवयान्याः सुतं प्रभो
जेष्ठं यदुमतिक्रम्य राज्यं पूरोः प्रयच्छसि

यदुर्ज्येष्ठस्तव सुतो जातस्तमनु तुर्व्वसुः ।
शर्म्मिष्ठायाः सुतो द्रुह्युस्ततोऽनुः पूरुरेव च ॥
कथं ज्येष्ठानतिक्रम्य कनीयान् राज्यमर्हति ।
एतत् सम्बोधयामस्त्वां धर्म्मं त्वं प्रतिपालय ॥

ययातिरुवाच ।

ब्राह्मणप्रमुखा वर्णाः सर्व्वे शृण्वन्तु मे वचः ।
ज्येष्ठं प्रति यथा राज्यं न देयं मे कथञ्चन ॥
मम ज्येष्ठेन यदुना नियोगो नानुपालितः ।
प्रतिकूलः पितुर्यश्च न स पुत्रः सतां मतः ॥
मातापित्रोर्वचनकृद्धितः पथ्यश्च यः सुतः ।
स पुत्रः पुत्रवद्यश्च वर्त्तते पितृमातृषु ॥
यदुनाहमवज्ञातस्तथा तुर्व्वसुनापि च ।
द्रुह्युना चानुना चैव मय्यवज्ञा कृता भृशम् ॥
पूरुणा तु कृतं वाक्यं मानितश्च विशेषतः ।
कनीयान् मम दायादो धृता येन जरा मम ॥
शुक्रेण च वरो दत्तः काव्येनोशनसा स्वयम् ।
पुत्रो यस्त्वानुवर्त्तेत स राजा पृथिवीपतिः ॥
भवतोऽनुनयाम्येवं पूरू राज्येऽभिषिच्यताम् ॥

प्रकृतय ऊचुः ।

यः पुत्रो गुणसम्पन्नो मातापित्रोर्हितः सदा ।
सर्व्वमर्हति कल्याणं कनीयानपि सत्तम ॥

अर्हः पूरुरिदं राज्यं यः सुतः प्रियकृत्तव ।
वरदानेन शुक्रस्य न शक्यं वक्तुमन्तरम् ॥
पौरजानपदैस्तुष्टैरित्युक्तो नाहुषस्तदा ।
अभ्यषिञ्चत्ततः पूरुं राज्ये स्वे सुतमात्मनः ।
दत्वा च पूरवे राज्यं वनवासाय दीक्षितः ।
पुरात् स निर्ययौ राजा ब्राह्मणैस्तापसैः स

जतुगृहदाहः ।

वैशम्पायन उवाच ।

शृणु विस्तरशो राजन् वदतो मे परन्तप
दाहं जतुगृहस्यैतत् पाण्डवानाञ्च मोक्षणं
प्राणाधिकं भीमसेनं कृतविद्यं धनञ्जयम् ।
दुर्य्योधनो लक्षयित्वा पर्य्यतप्यत दुर्मनाः ॥
ततो वैकर्त्तनः कर्णः शकुनिश्चापि सौवलः
अनेकैरभ्युपायैस्तां जिघांसन्ति स्म पाण्डव
पाण्डवा अपि तत् सर्व्वं प्रतिचक्रुर्यथागतं
उद्भावनमकुर्व्वन्तो विदुरस्य मते स्थिताः
गुणैः समुदितान् दृष्ट्वा पौराः पाण्डुसुतां
कथयाञ्चक्रिरे तेषां गुणान् संसत्सु भा॰
प्रज्ञाचक्षुरचक्षुष्ट्वाद्धृतराष्ट्रो जनेश्वरः ।
राज्यं न प्राप्तवान् पूर्व्वं स कथं न पतिर्भवे

तथा शान्तनवो भीष्मः सत्यसन्धो महाव्रतः ।
प्रत्याख्याय पुरा राज्यं न स जातु ग्रहीष्यति ॥
ते वयं पाण्डवं ज्येष्ठं तरुणं वृद्धशीलिनम् ।
अभिषिञ्चाम साध्वद्य सत्यकारुण्यवेदिनम् ॥
स हि भीष्मं शान्तनवं धृतराष्ट्रञ्च धर्म्मवित् ।
सपुत्रं विविधैर्भोगैर्योजयिष्यति पूजयन् ॥
तेषां दुर्य्योधनः श्रुत्वा तानि वाक्यानि जल्पताम् ।
युधिष्ठिरानुरक्तानां पर्य्यतप्यत दुर्म्मतिः ॥
स तप्यमानो दुष्टात्मा तेषां वाचो न चक्षमे ।
ईर्ष्यया चापि सन्तप्तो धृतराष्ट्रमुपागमत् ॥
ततो विरहितं दृष्ट्वा पितरं प्रतिपूज्य सः ।
पौरानुरागसन्तप्तः पश्चादिदमभाषत ॥
श्रुता मे जल्पतां तात पौराणामशिवा गिरः ।
त्वामनादृत्य भीष्मञ्च पतिमिच्छन्ति पाण्डवम् ॥
मतमेतच्च भीष्मस्य न स राज्यं बुभूषति ।
अस्माकन्तु परां पीड़ां चिकीर्षन्ति पुरे जनाः ॥
पितृतः प्राप्तवान् राज्यं पाण्डुरात्मगुणैः पुरा ।
त्वमप्यगुणसंयोगात् प्राप्तं राज्यं न लब्धवान् ॥
स एष पाण्डोर्दायाद्यं यदि प्राप्नोति पाण्डवः ।
तस्य पुत्रो ध्रुवं प्राप्तस्तस्य तस्यापि चापरः ॥
ते वयं राजवंशेन हीनाः सह सुतैरपि ।

अवज्ञाता भविष्यामो लोकस्य जगतीपते ॥
सततं निरयं प्राप्ताः परपिण्डोपजीविनः ।
न भवेम यथा राजंस्तथा नीतिर्विधीयताम्
एवं श्रुत्वा तु पुत्रस्य प्रज्ञाचक्षुर्नराधिपः
धृतराष्ट्रो द्विधाचित्तः शोकार्त्तः समपद्यत
दुर्य्योधनश्च कर्णश्च शकुनिः सौबलस्तथा ।
दुःशासनचतुर्थास्ते मन्त्रयामासुरेकतः ॥
ततो दुर्य्योधनो राजा धृतराष्ट्रमभाषत ॥
पाण्डवेभ्यो भयं न स्यात्तान् विवासयतां भवान्
निपुणेनाभ्युपायेन नगरं वारणावतम् ॥
धृतराष्ट्रस्तु पुत्रेण श्रुत्वा वचनमीरितम् ।
मुहूर्त्तमिव सञ्चिन्त्य दुर्य्योधनमथाब्रवीत् ॥
धर्म्मनित्यः सदा पाण्डुस्तथा धर्म्मपरायणः ।
सर्व्वेषु ज्ञातिषु तथा मयि त्वासीद्विशेषतः ॥
तस्य पुत्रो यथा पाण्डुस्तथा धर्म्मपरायणः ।
गुणवान् लोकविख्यातः पौरवाणां सुसम्मतः
स कथं शक्यतेऽस्माभिरपाकर्त्तुं बलादितः ।
पितृपैतामहाद्राज्यात् ससहायो विशेषतः ॥
भृता हि पाण्डुनामात्या बलञ्च सततं भृतं ।
भृताः पुत्राश्च पौत्राश्च तेषामपि विशेषतः ।
ते पुरा सत्कृतास्तात पाण्डुना नागरा जनाः ।

कथं युधिष्ठिरस्यार्थे न नो हन्युः सबान्धवान् ॥

दुर्य्योधन उवाच ।

तात प्रकृतयः सर्व्वा अर्थमानेन पूजिताः —
ध्रुवमस्मत्सहायास्ता भविष्यन्ति प्रधानतः ॥
स भवान् पाण्डवानाशु विवासयितुमर्हति ।
मृदुनैवाभ्युपायेन नगरं वारणावतम् ॥
यदा प्रतिष्ठितं राज्यं मयि राजन् भविष्यति ।
तदा कुन्ती सहापत्या पुनरेष्यति भारत ॥

धृतराष्ट्र उवाच ।

दुर्य्योधन ममाप्येतद्धृदि संपरिवर्त्तते ।
अभिप्रायस्य पापत्वान्नैवं तु विवृणोम्यहम् ॥
नच भीष्मो नच द्रोणो नच क्षत्ता न गौतमः ।
विवास्यमानान्कौन्तेयानन्विच्छन्त्यथ कर्हिचित् ॥
समा हि कौरवेयाणां वयं ते चैव पुत्रक ।
नैते विषममिच्छेयुर्धर्म्मयुक्ता मनस्विनः ॥
ते वयं कौरवेयाणामेतेषाञ्च महात्मनाम् ।
कथं न वध्यतां तात गच्छेम जगतस्तथा ॥

दुर्य्योधन उवाच ।

मध्यस्थः सततं भीष्मो द्रोणपुत्रो मयि स्थितः ।
यतः पुत्रस्ततो द्रोणो भविता नात्र संशयः ॥

कृपः शारद्वतश्चैव यत एते ततो भवेत् ।
द्रोणश्च भागिनेयश्च न स त्यक्ष्यति कर्हिचि
क्षत्तार्थबद्धस्त्वस्माकं प्रच्छन्नं संयतः परैः
नचैकः स समर्थोऽस्मान् पाण्डवार्थेऽधिबाधि
सुविस्रब्धं पाण्डुपुत्रान् सह माता विवास
वारणावतमद्यैव यथा यान्ति तथा कुरु ॥
विनिद्रकरणं घोरं हृदि शल्यमिवार्पितः
शोकपावकमुद्भूतं कर्मणैतेन नाशय ॥
ततो दुर्योधनो राजा सर्वाः प्रकृतयः
अर्थमानप्रदानाभ्यां संजहार सहानुजः ॥
धृतराष्ट्रप्रयुक्तास्ते केचित् कुशलमन्त्रिणः ।
कथयाञ्चक्रिरे रम्यं नगरं वारणावतम् ॥
कथ्यमाने तथा रम्ये नगरे वारणावते ।
गमने पाण्डुपुत्राणां जज्ञे तत्र मतिर्नृप ॥
यदा त्वमन्यत नृपो जातकौतूहला इति ।
उवाच चैनानथ तान् पाण्डवानम्बिकासुतः
ममैते पुरुषा नित्यं कथयन्ति पुनः पुनः ।
रमणीयतमं लोके नगरं वारणावतम् ॥
ते ताता यदि मन्यध्वमुत्सवं वारणावते ।
सगणाः सान्वयाश्चैव विहरध्वं यथामराः
कञ्चित् कालं विहृत्यैवमनुभूय परां मुदम्

हृष्टा वै हास्तिनपुरं सुखिनः पुनरैष्यथ ॥
धृतराष्ट्रस्य तं काममनुबुद्ध्वा युधिष्ठिरः ।
आत्मनश्चासहायत्वं तथेति प्रत्युवाच तम् ॥
ततो भीष्मं शान्तनवं विदुरञ्च महामतिम् ।
द्रोणञ्च वाह्लिकञ्चैव सोमदत्तञ्च कौरवम् ।
कृपमाचार्य्यपुत्रञ्च भूरिश्रवसमेव च ।
मान्यानन्यानमात्यांश्च ब्राह्मणांश्च तपोधनान् ।
पुरोहितांश्च पौरांश्च गान्धारीञ्च यशस्विनीम् ।
युधिष्ठिरः शनैर्दीन उवाचेदं वचस्तदा ॥
रमणीये जनाकीर्णे नगरे वारणावते ।
सगणास्तत्र यास्यामो धृतराष्ट्रस्य शासनात् ॥
प्रसन्नमनसः सर्व्वे पुण्या वाचो विमुञ्चत ।
आशीर्भिर्वृंहितानस्मान्न पापं प्रसहिष्यते ॥
एवमुक्तास्तु ते सर्व्वे पाण्डुपुत्रेण कौरवाः ।
प्रसन्नवदना भूत्वा तेऽन्ववर्त्तन्त पाण्डवान् ॥
स्वस्त्यस्तु वः पथि सदा भूतेभ्यश्चैव सर्व्वशः ।
मा च वोऽस्त्वशुभं किञ्चित् सर्व्वशः पाण्डुनन्दनाः ॥
ततः कृतस्वस्त्ययना राज्यलाभाय पार्थिवाः ।
कृत्वा सर्व्वाणि कार्य्याणि प्रययुर्वारणावतम् ॥
एवमुक्तेषु राज्ञा तु पाण्डुपुत्रेषु भारत ।
दुर्य्योधनः परं हर्षमगच्छत् स दुरात्मवान् ॥

स पुरोचनमेकान्तमानीय भरतर्षभ ।
गृहीत्वा दक्षिणे पाणौ सचिवं वाक्यमब्रवीत् ॥
ममेयं वसुसम्पूर्णा पुरोचन वसुन्धरा ।
यथेयं मम तद्वत्ते स तां रक्षितुमर्हसि ॥
न हि मे कश्चिदन्योऽस्ति विश्वासिकतरस्त्वया
सहायो येन सन्धाय मन्त्रयेयं यथा त्वया ॥
स रक्ष तात मन्त्रञ्च सपत्नांश्च समोद्धर ।
निपुणेनाभ्युपायेन यद्ब्रवीमि तथा कुरु ॥
पाण्डवा धृतराष्ट्रेण प्रेषिता वारणावतम् ।
उत्सवे विहरिष्यन्ति धृतराष्ट्रस्य शासनात् ॥
स त्वं रासभयुक्तेन स्यन्दनेनाशुगामिना ।
वारणावतमद्यैव यथा यासि तथा कुरु ॥
तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ।
नगरोपान्तमाश्रित्य कारयेथा महाधनम् ॥
शणसर्ज्जरसादीनि यानि द्रव्याणि कानिचि
आग्नेयान्युत सन्तीह तानि तत्र प्रदापय ॥
सर्पिस्तैलवसाभिश्च लाक्षया चाप्यनल्पया ।
मृत्तिकां मिश्रयित्वा त्वं लेपं कुड्येषु दापय ।
शणं तैलं घृतञ्चैव जतु दारूणि चैव हि ।
तस्मिन् वेश्मनि सर्वाणि निक्षिपेथाः समन्ततः
यथा च तन्न पश्येरन् परीक्षन्तोऽपि पाण्डवाः

आग्नेयमिति तत्कार्यमपि चान्येऽपि मानवाः ॥
वेश्मन्येवं कृते तत्र गत्वा तान् परमार्चितान् ।
वासयेथाः पाण्डवेयान् कुन्तीं च ससुहृज्जनाम् ॥
आसनानि च दिव्यानि यानानि शयनानि च ।
विधातव्यानि पाण्डूनां यथा तुष्येत वै पिता ॥
ज्ञात्वा च तान् सुविश्वस्तान् शयानानकुतोभयान् ।
अग्निस्त्वया ततो देयो द्वारतस्तस्य वेश्मनः ॥

स तथेति प्रतिज्ञाय कौरवाय पुरोचनः ।
प्रायाद्रासभयुक्तेन स्यन्दनेनाशुगामिना ॥
स गत्वा त्वरितं राजन् दुर्योधनमते स्थितः ।
यथोक्तं राजपुत्रेण सर्वं चक्रे पुरोचनः ॥
पाण्डवास्तु रथान् युक्ता सदश्वैरनिलोपमैः ।
आरोहमाणा भीष्मस्य पादौ जगृहुरार्तवत् ॥
राज्ञश्च धृतराष्ट्रस्य द्रोणस्य च महात्मनः ।
अन्येषां चैव वृद्धानां कृपस्य विदुरस्य च ॥
एवं सर्वान् कुरून् वृद्धानभिवाद्य यतव्रताः ।
समालिङ्ग्य समानान् वै बालैश्चाप्यभिवादिताः ॥
सर्वा मातॄस्तथापृष्ट्वा कृत्वा चैव प्रदक्षिणम् ।
सर्वाः प्रकृतयश्चैव प्रययुर्वारणावतम् ॥
विदुरश्च महाप्राज्ञस्तथान्ये कुरुपुङ्गवाः ।
पौराश्च पुरुषव्याघ्रानन्वयुः शोककर्शिताः ॥

तत्र केचित् ब्रुवन्ति स्म ब्राह्मणा निर्भयास्तदा
दीनान् दृष्ट्वा पाण्डुसुतानतीव भृशदुःखिताः
विषमं पश्यते राजा सर्व्वथा च सुमन्दधीः
कौरव्यो धृतराष्ट्रस्तु नच धर्म्मं प्रपश्यति ॥
नहि पापमपापात्मा रोचयिष्यति पाण्डवः
भीमो वा बलिनां श्रेष्ठः कौन्तेयो वा धनञ्जयः
कुत एव महात्मानौ माद्रीपुत्रौ करिष्यतः ।
तान् राज्यं पितृतः प्राप्तान् धृतराष्ट्रो न मृष्यते
अधर्म्यमिदमत्यन्तं कथं भीष्मोऽनुमन्यते ।
विवास्यमानानस्थाने नगरे योऽभिमन्यते ॥
पितेव हि नृपोऽस्माकमभूच्छान्तनवः पुरा ।
विचित्रवीर्य्यो राजर्षिः पाण्डुश्च कुरुनन्दनः
स तस्मिन् पुरुषव्याघ्रे देवभावं गते सति ।
राजपुत्रानिमान् बालान् धृतराष्ट्रो न मृष्यते
वयमेतदनिच्छन्तः सर्व्व एव पुरोत्तमात् ।
गृहान् विहाय गच्छामो यत्र गन्ता युधिष्ठिरः ।
तांस्तथावादिनः पौरान् दुःखितान् दुःखकर्शितान्
उवाच मनसा ध्यात्वा धर्मराजो युधिष्ठिरः
पिता मान्यो गुरुः श्रेष्ठो यदाह पृथिवीपतिः
अशङ्कमानैस्तत्कार्य्यमस्माभिरिति नो व्रतम् ॥
भवन्तः सुहृदोऽस्माकमस्मान् कृत्वा प्रदक्षिणम्

प्रतिनन्द्य तथाशीर्भिर्निवर्त्तध्वं यथागृहम् ॥
यदा तु कार्य्यमस्माकं भवद्भिरुपपत्स्यते ।
तदा करिष्यथास्माकं प्रियाणि च हितानि च ॥
एवमुक्तास्ततः पौराः कृत्वा चापि प्रदक्षिणम् ।
आशीर्भिरभिनन्द्यैतान् जग्मुर्नगरमेव च ॥
पौरेषु विनिवृत्तेषु विदुरः सर्व्वधर्म्मवित् ।
बोधयन् पाण्डवश्रेष्ठमिदं वचनमब्रवीत् ॥
यो जानाति परप्रज्ञां नीतिशास्त्रानुसारिणीम् ।
विज्ञायेह तथा कुर्य्यादापदं निस्तरेद्यथा ॥
नाचक्षुर्वेत्ति पन्थानं नाचक्षुर्विन्दते दिशः ।
नाधृतिर्बुद्धिमाप्नोति बुध्यस्वैवं प्रबोधितः ॥
चरन् मार्गान् विजानाति नक्षत्रैर्विन्दते दिशः ।
आत्मना चात्मनः पञ्च पीडयन्नानुपीड्यते ॥
एवमुक्तः प्रत्युवाच धर्म्मराजो युधिष्ठिरः ।
विदुरं विदुषां श्रेष्ठं ज्ञातमित्येव पाण्डवः ॥
अनुशिक्ष्यानुगम्यैतान् कृत्वा चैव प्रदक्षिणम् ।
पाण्डवानभ्यनुज्ञाय विदुरः प्रययौ गृहान् ॥
निवृत्ते विदुरे चापि भीष्मे पौरजने तथा ।
अजातशत्रुमासाद्य कुन्ती वचनमब्रवीत् ॥
क्षत्ता यदब्रवीद्वाक्यं जनमध्येऽब्रुवन्निव ।
त्वया च स तथेत्युक्तो जानीमो न च तद्वयम् ॥

यदीदं शक्यमस्माभिर्ज्ञातुं न च सदोषवत् ।
श्रोतुमिच्छामि तं सर्व्वं संवादं तव तस्य च ॥

युधिष्ठिर उवाच ।

गृहादग्निश्च बोद्धव्य इति मां विदुरोऽब्रवीत् ।
पन्थाश्च वो नाविदितः कश्चित् स्यादिति धर्म्मधीः ॥
जितेन्द्रियश्च वसुधां प्राप्स्यतीति च सोऽब्रवीत् ।
विज्ञातमिति तत्सर्व्वं प्रत्युक्तो विदुरो मया ॥
अष्टमेऽहनि रोहिण्यां प्रयाताः फाल्गुनस्य ते ।
वारणावतमासाद्य ददृशुर्नागरं जनम् ॥
ततः सर्व्वाः प्रकृतयो नगराद्वारणावतात् ।
अभिजग्मुर्नरश्रेष्ठान् श्रुत्वैव परया मुदा ॥
ते समासाद्य कौन्तेयान् वारणावतका जनाः ।
कृत्वा जयाशिषः सर्व्वे परिवार्य्यावतस्थिरे ॥
तैर्वृतः पुरुषव्याघ्रो धर्म्मराजो युधिष्ठिरः ।
विबभौ देवसङ्काशो वज्रपाणिरिवामरैः ॥
सत्कृताश्चैव पौरैस्ते पौरान् सत्कृत्य चानघ ।
अलङ्कृतं जनाकीर्णं विविशुर्वारणावतम् ॥
ते प्रविश्य पुरीं वीरास्तूर्णं जग्मुरथो गृहान् ।
ब्राह्मणानां महीपाल रतानां स्वेषु कर्म्मसु ॥
नगराधिकृतानाञ्च गृहाणि रथिनां तदा ।

अन्तर्ध्यनरश्रेष्ठा वैश्मगृह्वन्टहाण्यपि ॥
अर्च्चिताश्च नरैः पौरैः पाण्डवा भरतर्षभ ।
जग्मुरावसथं पश्चात् पुरोचनपुरःसराः ॥
तेभ्यो भक्ष्याणि पानानि शयनानि शुभानि च ।
आसनानि च मुख्यानि प्रददौ स पुरोचनः ॥
तत्र ते सत्कृतास्तेन सुमहार्हपरिच्छदाः ।
उपास्यमानाः पुरुषैरूषुः पुरनिवासिभिः ॥
दशरात्रोषितानान्तु तत्र तेषां पुरोचनः ।
निवेदयामास गृहं शिवाख्यमशिवं तदा ॥
तत्र ते पुरुषव्याघ्रा विविशुः सपरिच्छदाः ।
पुरोचनस्य वचनात् कैलासमिव गुह्यकाः ॥
तच्चागारमभिप्रेक्ष्य सर्व्वधर्मभृतां वरः ।
उवाचाग्नेयमित्येवं भीमसेनं युधिष्ठिरः ॥
जिघ्रन् हि व्यक्तमाग्नेयमिदं वेश्म परन्तप ।
शणसर्ज्जरसं व्यक्तमानीय गृहकर्मणि ॥
विश्वस्तं मामयं पापो दग्धुकामः पुरोचनः ।
तथा हि वर्त्तते मन्दः सुयोधनवशे स्थितः
इमान्तु तां महाबुद्धिर्विदुरो दृष्टवांस्तदा ।
आपदं तेन मां पार्थ स सम्बोधितवान् पुरा ॥
ते वयं बोधितास्तेन नित्यमस्मद्धितैषिणा ।
पित्रा कनीयसा स्नेहाद्बुद्धिमन्तोऽशिवं गृहम् ।

भीमसेन उवाच।

यदीदं गृहमाग्नेयं विहितं मन्यते भवान्।
तत्रैव साधु गच्छामो यत्र पूर्व्वोषिता वयम्॥

युधिष्ठिर उवाच।

इह यत्तैर्निराकारैर्वस्तव्यमिति रोचये।
अप्रमत्तैर्व्विचिन्वद्भिर्गतिमिष्टां ध्रुवामितः॥
यदि विन्देत चाकारमस्माकं स पुरोचनः।
क्षिप्रकारी ततो भूत्वा प्रसह्यापि दहेत नः॥
नायं बिभेत्युपक्रोशादधर्माद्वा पुरोचनः।
तथाहि वर्त्तते मन्दः सुयोधनवशे स्थितः॥
वयं तु यदि दाहस्य बिभ्यतः प्रद्रवेम हि।
स्पशैर्निघातयेत् सर्व्वान् राज्यलुब्धः सुयोधनः
अपदस्थान् पदे तिष्ठन्नपक्षान् पक्षसंस्थितः।
हीनकोषान् महाकोषः प्रयोगैर्घातयेद्ध्रुवम्॥
तदस्माभिरिमं पापं तञ्च पापं सुयोधनम्।
वञ्चयद्भिर्निवस्तव्यं छन्नावासं क्वचित् क्वचित्॥
ते वयं मृगयाशीलाश्चराम वसुधामिमाम्।
तथा नो विदिता मार्गा भविष्यन्ति पलायताम्
भौमञ्च बिलमद्यैव करवाम सुसंवृतम्।
गूढोच्छ्वासान्न नस्तत्र हुताशः संप्रधक्ष्यति॥
वसतोऽत्र यथा चास्मान्न बुध्येत पुरोचनः।

पौरो वापि जनः कश्चित्तथा कार्य्यमतन्द्रितैः ॥

विदुरस्य सुहृत् कश्चित् खनकः कुशलो नरः ।
विविक्ते पाण्डवान् राजन्निदं वचनमब्रवीत् ॥
प्रहितो विदुरेणास्मि खनकः कुशलो ह्यहम् ।
पाण्डवानां प्रियं कार्य्यमिति किं करवाणि वः ॥
कृष्णपक्षे चतुर्द्दश्यां रात्रावस्यां पुरोचनः ।
भवनस्य तव द्वारि प्रदास्यति हुताशनम् ॥
मात्रा सह प्रदग्धव्याः पाण्डवाः पुरुषर्षभाः ।
इति व्यवसितं तस्य धार्त्तराष्ट्रस्य दुर्मतेः ॥
किञ्चिच्च विदुरेणोक्तो म्लेच्छवाचासि पाण्डव ।
त्वया च तत्तथेत्युक्तमेतद्विश्वासकारणम् ॥

उवाच तं सत्यधृतिः कुन्तिपुत्रो युधिष्ठिरः ।
अभिजानामि सौम्य त्वां सुहृदं विदुरस्य वै ।
शुचिमाप्तं प्रियञ्चैव सदा च दृढभक्तिकम् ॥
न विद्यते कवेः किञ्चिदविज्ञातं प्रयोजनम् ।
यथा तस्य तथा नस्त्वं निर्व्विशेषा वयं त्वयि ॥
इदं शरणमाग्नेयं मदर्थमिति मे मतिः ।
पुरोचनेन विहितं धार्त्तराष्ट्रस्य शासनात् ॥
स पापः कोषवांश्चैव ससहायश्च दुर्मतिः ।
अस्मानपि च पापात्मा नित्यकालं प्रबाधते ॥
स भवान् मोक्षयत्वस्मान् यत्नेन हुताशनात् ।

अस्मास्विह हि दग्धेषु सकामः स्यात् सुयोधनः
इदं तदशुभं नूनं तस्य कर्म्म चिकीर्षितम्।
प्रागेव विदुरो वेद तेनास्मानन्वबोधयत्॥
सेयमापदनुप्राप्ता क्षत्ता यां दृष्टवान् पुरा।
पुरोचनस्याविदितानस्मांस्त्वं प्रतिमोचय॥

स तथेति प्रतिश्रुत्य खनको यत्नमास्थितः।
चक्रे च वेश्मनस्तस्य मध्ये नातिमहद्बिलम्।
कपाटयुक्तमज्ञातं समं भूम्यास्तु भारत॥
तत्र ते सायुधाः सर्वे वसन्ति स्म क्षपां नृप।
दिवा चरन्ति मृगयां पाण्डवेया वनाद्वनम्।
विश्वस्तवदविश्वस्ता वञ्चयन्तः पुरोचनम्।
अतुष्टास्तुष्टवद्राजन्नूषुः परमविस्मिताः॥
न चैनानन्वबुध्यन्त नरा नगरवासिनः।
अन्यत्र विदुरामात्यात्तस्मात् खनकसत्तमात्।
तांस्तु दृष्ट्वा सुमनसः परिसंवत्सरोषितान्।
विश्वस्तानिव संलक्ष्य हर्षं चक्रे पुरोचनः॥
पुरोचने तथा हृष्टे कौन्तेयोऽथ युधिष्ठिरः।
भीमसेनार्जुनौ चोभौ यमौ प्रोवाच धर्मवित्॥
अस्मानयं सुविश्वस्तान् वेत्ति पापः पुरोचनः।
वञ्चितोऽयं नृशंसात्मा कालं मन्ये पलायने॥
अथ दानापदेशेन कुन्ती ब्राह्मणभोजनम्।

चक्रे निशि महाराज आजग्मुस्तत्र योषितः ॥
ता विहृत्य यथाकामं भुक्त्वा पीत्वा च भारत ।
जग्मुर्निशि गृहानेव समनुज्ञाप्य माधवीम् ॥
निषादी पञ्चपुत्रा तु तस्मिन् भोज्ये यदृच्छया ।
अन्नार्थिनी समभ्यागात् सपुत्रा कालनोदिता ॥
सा पीत्वा मदिरां मत्ता सपुत्रा मदविह्वला ।
सह सर्वैः सुतै राजंस्तस्मिन्नेव निवेशने ।
सुष्वाप विगतज्ञाना मृतकल्पा नराधिप ॥
अथ प्रवाते तुमुले निशि सुप्ते जने तदा ।
तदुपादीपयद्भीमः शेते यत्र पुरोचनः ॥
ततो जतुगृहद्वारं दीपयामास पाण्डवः ।
समन्ततो ददौ पश्चादग्निं तत्र निवेशने ॥
ज्ञात्वा तु तद्गृहं सर्वमादीप्तं पाण्डुनन्दनाः ।
सुरुङ्गां विविशुस्तूर्णं मात्रा सार्धमरिन्दमाः ॥
ततः प्रतापः सुमहान् शब्दश्चैव विभावसोः ।
प्रादुरासीत्तदा तेन बुबुधे स जनव्रजः ॥
तदवेक्ष्य गृहं दीप्तमाहुः पौराः कृशानना ।
दुर्योधनप्रयुक्तेन पापेनाकृतबुद्धिना ।
गृहमात्मविनाशाय कारितं दाहितञ्च तत् ॥
अहो धिक् धृतराष्ट्रस्य बुद्धिर्नातिसमञ्जसी ।
यः शुचीन् पाण्डुदायादान् दाहयामास शत्रुवत् ॥

दिष्ट्या त्विदानीं पापात्मा दग्धोऽयमतिदुः
अनागसः सुविश्वस्तान् यो ददाह नरोत्त
एवं ते विलपन्ति स्म वारणावतका जनाः
परिवार्य्य गृहं तच्च तस्थू रात्रौ समन्ततः
पाण्डवाश्चापि ते सर्व्वे सह मात्रा सुदुःखि
बिलेन तेन निर्गत्य जग्मुर्द्रुतमलक्षिताः ॥

द्रौपदीयुधिष्ठिरसंवादः ।

ततो वनगताः पार्थाः सायाह्ने सह कृ
उपविष्टाः कथाश्चक्रुर्दुःखशोकपरायणाः
प्रिया च दर्शनीया च पण्डिता च पतिव्र
अथ कृष्णा धर्म्मराजमिदं वचनमब्रवीत्
न नूनं तस्य पापस्य दुःखमस्मासु किञ्चन ।
विद्यते धार्त्तराष्ट्रस्य नृशंसस्य दुरात्मनः ।
यस्त्वां राजन् मया सार्द्धमजिनैः प्रतिवा
वनं प्रस्थाप्य दुष्टात्मा नान्वतप्यत दुर्मतिः
आयसं हृदयं नूनं तस्य दुष्कृतकर्म्मणः ।
यस्त्वां धर्म्मपरं ज्येष्ठं रूक्षाण्यश्रावयत्तदा
सुखोचितमदुःखार्हं दुरात्मा ससुहृद्गणः ।
ईदृशं दुःखमानीय मोदते पापपूरुषः ॥

चतुर्णामेव पापानामस्रं न पतितं तदा ।
त्वयि भारत निष्क्रान्ते वनायाजिनवाससि ॥
दुर्य्योधनस्य कर्णस्य शकुनेश्च दुरात्मनः ।
दुर्भ्रातुस्तस्य चोग्रस्य राजन् दुःशासनस्य च ।
इतरेषाञ्च सर्व्वेषां कुरूणां कुरुसत्तम ।
दुःखेनाभिपरीतानां नेत्रेभ्यः प्रापतज्जलम् ॥
इदञ्च शयनं दृष्ट्वा यच्चासीत्ते पुरातनम् ।
शोचामि त्वां महाराज दुःखानर्हं सुखोचितम् ।
यदपश्यं सभायां त्वां राजभिः परिवारितम् ।
तच्च राजन्नपश्यन्त्याः का शान्तिर्हृदयस्य मे ॥
या त्वाहं चन्दनादिग्धमपश्यं सूर्य्यवर्च्चसम् ।
सा त्वां पङ्कमलादिग्धं दृष्ट्वा मुह्यामि भारत ॥
या त्वाहं कौषिकैर्वस्त्रैः शुभ्रैराच्छादितं पुरा ।
दृष्टवत्यस्मि राजेन्द्र सा त्वां पश्यामि चीरिणम् ॥
यांस्ते भ्रातॄन् महाराज युवानो मृष्टकुण्डलाः ।
अभोजयन्त मिष्टान्नैः सूदाः परमसंस्कृतैः ॥
सर्व्वांस्तानद्य पश्यामि वने वन्येन जीविनः ।
अदुःखार्हान् मनुष्येन्द्र नोपशाम्यति मे मनः ॥
भीमसेनमिमञ्चापि दुःखितं वनवासिनम् ।
ध्यायतः किं न मन्युस्ते प्राप्ते काले विवर्द्धते ॥
अयं कुरून् रणे सर्व्वान् हन्तुमुत्सहते प्रभुः ।

न्वत्प्रियार्थं प्रतीक्षन्ते सहतेऽयं वृकोदरः ॥
योऽर्जुनेनार्जुनस्तुल्यो द्विबाहुर्बहुबाहुना ।
शरावमर्दे शीघ्रत्वात् कालान्तकयमोपमः ॥
यस्य शस्त्रप्रतापेन प्रणताः सर्वपार्थिवाः ।
यज्ञे तव महाराज ब्राह्मणानुपतस्थिरे ॥
तमिमं पुरुषव्याघ्रं पूजितं देवदानवैः ।
ध्यायन्तमर्जुनं दृष्ट्वा कस्माद्राजन्न कुप्यसि
दृष्ट्वा वनगतं पार्थमदुःखार्हं सुखोचितम् ।
न च ते वर्द्धते मन्युस्तेन मुह्यामि भारत ॥
यो देवांश्च मनुष्यांश्च सर्पांश्चैकरथोऽजयत्
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
यो यानैरद्भुताकारैर्हयैर्नागैश्च संवृतः ।
प्रसह्य वित्तान्यादत्त पार्थिवेभ्यः परन्तपः
क्षिपत्येकेन वेगेन पञ्च बाणशतानि यः ।
तं ते वनगतं दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
श्यामं बृहन्तं तरुणं चर्मिणामुत्तमं रणे
नकुलं ते वने दृष्ट्वा कस्मान्मन्युर्न वर्द्धते ॥
दर्शनीयञ्च शूरञ्च माद्रीपुत्रं युधिष्ठिर ।
सहदेवं वने दृष्ट्वा कस्मात् क्षमसि पार्थिव
नकुलं सहदेवञ्च दृष्ट्वा ते दुःखितावुभौ ।
अदुःखार्हौ मनुष्येन्द्र कस्मान्मन्युर्न वर्द्धते

द्रुपदस्य कुले जातां स्नुषां पाण्डोर्महात्मनः ।
धृष्टद्युम्नस्य भगिनीं वीरपत्नीमनुव्रताम् ।
मां वै वनगतां दृष्ट्वा कस्मात् क्षमसि पार्थिव ॥
नूनञ्च तव वै नास्ति मन्युर्भरतसत्तम ।
यत्ते भ्रातॄंश्च माञ्चैव दृष्ट्वा न व्यथते मनः ॥
न निर्मन्युः क्षत्रियोऽस्ति लोके निर्व्वचनं स्मृतम् ।
तदद्य त्वयि पश्यामि क्षत्रिये विपरीतवत् ॥
यो न दर्शयते तेजः क्षत्रियः काल आगते ।
सर्व्वभूतानि तं पार्थ सदा परिभवन्त्युत ॥
तत्त्वया न क्षमा कार्य्या शत्रून् प्रति कथञ्चन ।
तेजसैव हि ते शक्या निहन्तुं नात्र संशयः ॥
तथैव यः क्षमाकाले क्षत्रियो नोपशाम्यति ।
अप्रियः सर्व्वभूतानां सोऽमुत्रेह च नश्यति ॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रह्लादस्य च संवादं बलेर्वैरोचनस्य च ॥
असुरेन्द्रं महाप्राज्ञं धर्म्माणामागतागमम् ।
बलिः पप्रच्छ दैत्येन्द्रं प्रह्लादं पितरं पितुः ॥
क्षमा स्विच्छ्रेयसी तात उताहो तेज इत्युत ।
एष मे संशयस्तात यथावद्ब्रूहि पृच्छते ॥
श्रेयो यदत्र धर्म्मज्ञ ब्रूहि मे तदसंशयम् ।
करिष्यामि हि तत्सर्व्वं यथावदनुशासनम् ।

तस्मै प्रोवाच तत्सर्वमेवं पृष्टः पितामहः।
सर्वनिश्चयवित् प्राज्ञः संशयं परिपृच्छते॥
न श्रेयः सततं तेजो न नित्यं श्रेयसी क्षमा
इति तात विजानीहि द्वयमेतदसंशयम्॥
यो नित्यं क्षमते तात बहून् दोषान् स विन्दति।
भृत्याः परिभवन्त्येनमुदासीनास्तथारयः॥
सर्वभूतानि चाप्यस्य न नमन्ते कदाचन
तस्मान्नित्यं क्षमा तात पण्डितैरपवादिता।
अवज्ञाय हि तं भृत्या भजन्ते बहुदोषताम्
आदातुञ्चास्य वित्तानि प्रार्थयन्तेऽल्पचेतसः
यानं वस्त्राण्यलङ्कारान् शयनान्यासनानि च
भोजनान्यथ पानानि सर्वोपकरणानि च।
आददीरन्नधिकृता यथाकाममचेतसः।
प्रदिष्टानि च देयानि न दद्युर्भर्तृशासनात्
न चैनं भर्तृपूजाभिः पूजयन्ति कथञ्चन।
अवज्ञानं हि लोकेऽस्मिन् मरणादपि गर्हितम्
क्षमिणं तादृशं तात ब्रुवन्ति कटुकान्यपि।
प्रेष्याः पुत्राश्च भृत्याश्च तथोदासीनवृत्तयः
एते चान्ये च बहवो नित्यं दोषाः क्षमावताम्
अथ वैरोचने दोषानिमान् विद्ध्यक्षमावताम्
अस्थाने यदि वा स्थाने सततं रजसावृतः।

क्रुद्धो दण्डान् प्रणयति विविधान् स्वेन तेजसा ॥
मित्रैः सह विरोधञ्च प्राप्नुते तेजसावृतः ।
आप्नोति द्वेष्यतांश्चैव लोकात् स्वजनतस्तथा ॥
तस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव ॥
यस्मादुद्विजते लोकः कथं तस्य भवो भवेत् ।
अन्तरं तस्य दृष्ट्वैव लोको विकुरुते ध्रुवम् ॥
तस्मान्नात्युत्सृजेत्तेजो न च नित्यं मृदुर्भवेत् ।
काले काले तु संप्राप्ते मृदुस्तीक्ष्णोऽपि वा भवेत ॥
काले मृदुर्यो भवति काले भवति दारुणः ।
स वै सुखमवाप्नोति लोकेऽमुष्मिन्निहैव च ॥
क्षमाकालांस्तु वक्ष्यामि शृणु मे विस्तरेण तान् ।
ये ते नित्यमसंत्याज्या यथा प्राहुर्मनीषिणः ॥
पूर्व्वोपकारी यस्ते स्यादपराधे गरीयसि ।
उपकारेण तत्तस्य क्षन्तव्यमपराधिनः ॥
अबुद्धिमाश्रितानान्तु क्षन्तव्यमपराधिनाम् ।
नहि सर्व्वत्र पाण्डित्यं सुलभं पुरुषेण वै ॥
अथ ये बुद्धिजं कृत्वा ब्रूयुस्ते तदबुद्धिजम् ।
पापान् स्वल्पेऽपि तान् हन्यादपराधे तथानृजून् ॥
सर्व्वस्यैकोऽपराधस्ते क्षन्तव्यः प्राणिनो भवेत् ।
द्वितीये सति दण्डस्तु स्वल्पेऽप्यपकृते भवेत् ॥
अजानता भवेत् कश्चिदपराधः कृतो यदि ।

क्षन्तव्यमेव तस्याहुः सुपरीक्ष्य परीक्षया ।
तथा लोकभयाच्चैव क्षन्तव्यमपराधिनः ॥
एत एवंविधाः कालाः क्षमायाः परिकीर्त्ति
अतोऽन्यथानुवर्त्तत्सु तेजसः काल उच्यते
तदहं तेजसः कालं तव मन्ये नराधिप ।
धार्त्तराष्ट्रेषु लुब्धेषु सततञ्चापकारिषु ॥
न हि कश्चित् क्षमाकालो विद्यतेऽद्य कुरून्
तेजसश्चागते काले तेज उत्स्रष्टुमर्हसि ॥
मृदुर्भवत्यवज्ञातस्तीक्ष्णादुद्विजते जनः ।
काले प्राप्ते द्वयञ्चैतद्यो वेद स महीपतिः ।

युधिष्ठिर उवाच ।

क्रोधो हन्ता मनुष्याणांक्रोधोभावयिता
इति विद्धि महाप्राज्ञे क्रोधमूलौ भवाभवौ
यो हि संहरते क्रोधं भवस्तस्य सुशोभने
यः पुनः पुरुषः क्रोधं नित्यं न सहते शुभे
तस्याभवाय भवति क्रोधः परमदारुणः ॥
क्रोधमूलो विनाशो हि प्रजानामिह दृश्
तत् कथं मादृशः क्रोधमुत्सृजेल्लोकनाशनम्
क्रुद्धः पापं नरः कुर्य्यात् क्रुद्धो हन्याद्गुरून्
क्रुद्धः परुषया वाचा श्रेयसोऽप्यवमन्यते ॥
वाच्यावाच्ये हि कुपितो न प्रजानाति कर्हि

नाकार्य्यमस्ति क्रुद्धस्य नावाच्यं विद्यते तथा ॥
एतान् दोषान् प्रपश्यद्भिर्जितः क्रोधो मनीषिभिः
इच्छद्भिः परमं श्रेय इह चामुत्र चोत्तमम् ॥
तं क्रोधं वर्ज्जितं धीरैः कथमस्मद्विधश्चरेत् ।
एतत् द्रौपदि सन्धाय न मे मन्युः प्रवर्द्धते ॥
आत्मानञ्च परांश्चैव त्रायते महतो भयात् ।
क्रुध्यन्तमप्रतिक्रुध्यन् द्वयोरेष चिकित्सकः ॥
यस्तु क्रोधं समुत्पन्नं प्रज्ञया प्रतिबाधते ।
तेजस्विनं तं विद्वांसो मन्यन्ते तत्त्वदर्शिनः ॥
दाक्ष्यं ह्यमर्षः शौर्य्यञ्च शीघ्रत्वमिति तेजसः ।
गुणाः क्रोधाभिभूतेन न शक्याः प्राप्तुमञ्जसा ॥
यदि न स्युर्मानुषेषु क्षमिणः पृथिवीसमाः ।
न स्यात् सन्धिर्मनुष्याणां क्रोधमूलो हि विग्रहः ॥
क्षमा तेजस्विनां तेजः क्षमा ब्रह्म तपस्विनाम् ।
क्षमा सत्यं सत्यवतां क्षमा यज्ञः क्षमा शमः ॥
तां क्षमां तादृशीं कृष्णे कथमस्मद्विधस्त्यजेत् ।
यस्यां ब्रह्म च सत्यञ्च यज्ञा लोकाश्च धिष्ठिताः ॥
क्षन्तव्यमेव सततं पुरुषेण विजानता ।
यदा हि क्षमते सर्व्वं ब्रह्म सम्पद्यते तदा ॥
इह सम्मानमृच्छन्ति परत्र च शुभां गतिम् ।
येषां मन्युर्मनुष्याणां क्षमयाभिहतः सदा ॥

धृतराष्ट्रविलापः ।

जयत्सु पाण्डुपुत्रेषु श्रुत्वा सुमहदप्रियम् ।
धृतराष्ट्रश्चिरं ध्यात्वा सञ्जयं वाक्यमब्रवीत् ॥

यदाश्रौषं जातुषाद्वेश्मनस्तान्
मुक्तान् पार्थान् पञ्च कुन्त्या समेतान् ।
युक्तश्चैषां विदुरः स्वार्थसिद्धौ
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं द्रौपदीं रङ्गमध्ये
लक्ष्यं भित्त्वा निर्जितामर्जुनेन ।
शूरान् पाञ्चालान् पाण्डवेयांश्च युक्तान्
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं मागधानां वरिष्ठं
जरासन्धं क्षत्रमध्ये ज्वलन्तम् ।
दोर्भ्यां हतं भीमसेनेन गत्वा
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं दिग्जये पाण्डुपुत्रै-
र्वशीकृतान् भूमिपालान् प्रसह्य ।
महाक्रतुं राजसूयं कृतञ्च
तदा नाशंसे विजयाय सञ्जय

यदाश्रौषं द्यूतराज्यं युधिष्ठिरं
पराजितं सौबलेनाक्षवत्याम् ।

अभ्यागतं भ्रातृभिरप्रमेयै-
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं स्नातकानां सहस्रै-
रन्वागतं धर्म्मराजं वनस्थम् ।
भिक्षाभुजां ब्राह्मणानां महात्मनां
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं घोषयात्रागतानां
बन्धं गन्धर्व्वैर्मोक्षणञ्चार्ज्जुनेन ।
स्वेषां सुतानां कर्णबुद्धौ रतानां
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं न विदुर्मामकास्तान्
प्रच्छन्नरूपान् वसतः पाण्डवेयान् ।
विराटराष्ट्रे सह कृष्णया तान्
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं मामकानां वरिष्ठान्-
धनञ्जयेनैकरथेन भग्नान् ।
विराटराष्ट्रे वसता महात्मना
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं निर्ज्जितस्याधनस्य
प्रव्राजितस्य स्वजनात् प्रच्युतस्य ।
अक्षौहिण्यः सप्त युधिष्ठिरस्य

तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं लोकहिताय कृष्णं
शमार्थिनमुपयातं कुरूणाम् ।
शमं कुर्व्वाणमकृतार्थञ्च यातं
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं मन्त्रिणं वासुदेवं
तथा भीष्मं शान्तनवं तेषाम् ।
भारद्वाजञ्चाशिषोऽनुब्रुवाणं
तदा नाशंसे विजयाय सञ्जय ॥

यदा कर्णो भीष्ममवाच्य वाक्यं
नाहं योत्स्ये युध्यमाने त्वयीति ।
हित्वा सेनामपचक्राम चापि
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं वासुदेवार्ज्जुनौ तौ
तथा धनुर्गाण्डीवमप्रमेयम् ।
त्रीण्युग्रवीर्य्याणि समागतानि
तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं भीष्ममभितकर्षणं
निघ्नन्तमाजावयुतं रथानाम् ।
नैषां कश्चिद्वध्यते ख्यातरूप-
स्तदा नाशंसे विजयाय सञ्जय ॥

यदाश्रौषं भीष्ममत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
शिखण्डिनं पुरतः स्थापयित्वा
तदा नाशंसे विजयाय सञ्जय ॥
यदा द्रोणो विविधानस्त्रमार्गान्
निदर्शयन् समरे चित्रयोधी ।
न पाण्डवान् श्रेष्ठतमान् निहन्ति
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं चास्मदीयान् महारथान्
व्यवस्थितानर्जुनस्यान्तकाय ।
संशप्तकान् निहतानर्जुनेन
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं व्यूहमभेद्यमन्यै-
र्भारद्वाजेनात्तशस्त्रेण गुप्तम् ।
भित्त्वा सौभद्रं वीरमेकं प्रविष्टं
तदा नाशंसे विजयाय सञ्जय ॥
यदाभिमन्युं परिवार्य बालं
सर्वे हत्वा हृष्टरूपा बभूवुः ।
महारथाः पार्थमशक्नुवन्त-
स्तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषमभिमन्युं निहत्य

हर्षान्मूढान् क्रोशतो धार्त्तराष्ट्रान् ।
क्रोधादुक्तं सैन्धवे चार्ज्जुनेन
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं सैन्धवार्थे प्रतिज्ञां
प्रतिज्ञातां तद्वधायार्ज्जुनेन ।
सत्यां तीर्णां शत्रुमध्ये च तेन
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं नागबलैः सुदुःसहं
द्रोणानीकं युयुधानं प्रमथ्य ।
यातं वार्ष्णेयं यत्र तौ कृष्णपार्थौ
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं द्रोणं कृतवर्म्मा कृपञ्च
कर्णं द्रौणिं मद्रराजञ्च शूरम् ।
अमर्षयन्तं सैन्धवं वध्यमानं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं द्रोणमाचार्य्यमेकं
धृष्टद्युम्नेनाभ्यतिक्रम्य धर्म्मम् ।
रथोपस्थे प्रायगतं विशस्तं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं भीमसेनेन पीतं
रक्तं भ्रातुर्युधि दुःशासनस्य ।

निवारितं नान्यतमेन भीमं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं कर्णमत्यन्तशूरं
हतं पार्थेनाहवेष्वप्रधृष्यम् ।
तस्मिन् भ्रातॄणां विग्रहे देवगुह्ये
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं निहतं मद्रराजं
रणे शूरं धर्म्मराजेन सूत ।
सदा संग्रामे स्पर्द्धते यस्तु कृष्णं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं कलहद्यूतमूलं
मायाबलं सौबलं पाण्डवेन ।
हतं संग्रामे सहदेवेन पापं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं श्रान्तमेकं प्रयातं
ह्रदं गत्वा स्तम्भयित्वा तदम्भः ।
दुर्य्योधनं विरथं भग्नशक्तिं
तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं पाण्डवांस्तिष्ठमानान्
गत्वा ह्रदे वासुदेवेन सार्द्धम् ।
अमर्षणं धर्षयतः सुतं मे

तदा नाशंसे विजयाय सञ्जय ॥
यदाश्रौषं विविधांश्चित्रमार्गान्
गदायुद्धे मण्डलांश्चरन्तम् ।
मिथ्याहतं वासुदेवस्य बुद्ध्या
तदा नाशंसे विजयाय सञ्जय ॥
शोच्या गान्धारी पुत्रपौत्रैर्विहीना
तथा बन्धुभिः पितृभिर्भ्रातृभिश्च ।
कृतं कार्यं दुष्करं पाण्डवेयैः
प्राप्तं राज्यमसपत्नं पुनस्तैः ॥
कष्टं युद्धे दश शेषाः श्रुता मे
त्रयोऽस्माकं पाण्डवानाञ्च सप्त ।
द्व्यूना विंशतिराहताक्षौहिणीनां
तस्मिन् संग्रामे भैरवे क्षत्रियाणाम् ॥
तमस्त्वतीव विस्तीर्णं मोह आविशतीव माम् ।
संज्ञां नोपलभे सूत मनो विह्वलतीव मे ॥
इत्युक्त्वा धृतराष्ट्रोऽथ विलप्य बहुदुःखितः ।
मूर्छितः पुनराश्वस्तः सञ्जयं वाक्यमब्रवीत् ॥
सञ्जयैवं गते प्राणांस्त्यक्तुमिच्छामि माचिरम् ।
स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे ॥
तं तथावादिनं दीनं विलपन्तं महीपतिम् ।
निश्वसन्तं यथा नागं मुह्यमानं पुनः पुनः ।

गावल्गणिरिदं धीमान् महार्थं वाक्यमब्रवीत् ॥
श्रुतवानसि वै राजन् महोत्साहान् महाबलान् ।
महत्सु राजवंशेषु गुणैः समुदितेषु च ।
जातान् दिव्यास्त्रविदुषः शक्रप्रतिमतेजसः ।
धर्म्मेण पृथिवीं जित्वा यज्ञैरिष्ट्वा सदक्षिणैः ।
अस्मिन् लोके यशः प्राप्य ततः कालवशं गतान् ॥
हित्वा सुविपुलान् भोगान् बुद्धिमन्तो महाबलाः ।
राजानो निधनं प्राप्तास्तव पुत्रा इव प्रभो ॥
येषां दिव्यानि कर्म्माणि विक्रमस्त्याग एव च ।
माहात्म्यमपि चास्तिक्यं सत्यं शौचं दयार्ज्जवम् ।
विद्वद्भिः कथ्यते लोके पुराणे कविसत्तमैः ।
सर्व्वर्द्धिगुणसम्पन्नास्ते चापि निधनं गताः ॥
तव पुत्रा दुरात्मानः प्रतप्ताश्चैव मन्युना ।
लुब्धा दुर्व्वृत्तभूयिष्ठा न तान् शोचितुमर्हसि ।
श्रुतवानसि मेधावी बुद्धिमान् प्राज्ञसम्मतः ।
येषां शास्त्रानुगा बुद्धिर्न ते मुह्यन्ति भारत ॥
भवितव्यं तथा तच्च नानुशोचितुमर्हसि ।
दैवं प्रज्ञाविशेषेण को निवर्त्तितुमर्हति ।
विधातृविहितं मार्गं न कश्चिदतिवर्त्तते ॥
कालमूलमिदं सर्व्वं भावाभावौ सुखासुखे ॥
कालः सृजति भूतानि कालः संहरते प्रजाः ।

कालः सुप्तेषु जागर्त्ति कालो हि दुरतिक्रमः ॥
अतीतानागता भावा ये च वर्त्तन्ति साम्प्रतम् ।
तान् कालनिर्मितान् बुद्ध्वा न संज्ञां हातुमर्हसि ॥
इत्येवं पुत्रशोकार्त्तं धृतराष्ट्रं जनेश्वरम् ।
आश्वास्य स्वस्थमकरोत् सूतो गावल्गणिस्तदा ॥

भट्टिकाव्यम् ।

प्रथमः सर्गः ।

अभून्नृपो विबुधसखः परन्तपः
श्रुतान्वितो दशरथ इत्युदाहृतः ।
गुणैर्वरं भुवनहितच्छलेन यं
सनातनः पितरमुपागमत् स्वयम् ॥

सोऽध्यैष्ट वेदांस्त्रिदशानयष्ट
पितॄनतार्प्सीत् सममंस्त बन्धून् ।
व्यजेष्ट षड्वर्गमरंस्त नीतौ
समूलघातं न्यवधीदरींश्च ॥

वसूनि तोयं घनवद्व्यकारीत्
सहासनं गोत्रभिदाध्यवात्सीत् ।
न त्र्यम्बकादन्यमुपास्थितासौ
यशांसि सर्वेषुभृतां निरास्थत् ॥

पुण्यो महाब्रह्मसमूहजुष्टः
सन्तर्पणो नाकसदां वरेण्यः ।
जज्वाल लोकस्थितये स राजा
यथाध्वरे वह्निरभिप्रणीतः ॥

स पुण्यकीर्तिः शतमन्युकल्पो
महेन्द्रलोकप्रतिमां समृद्ध्या ।
अध्यास्त सर्वर्तुसुखामयोध्या-
मध्यासितां ब्रह्मभिरिद्धबोधैः ॥

निर्माणदक्षस्य समीहितेषु
सीमेव पद्मासनकौशलस्य ।
ऊर्ध्वस्फुरद्रत्नगभस्तिभिर्या
स्थिताऽवहस्येव पुरं मघोनः ॥

सद्रत्नमुक्ताफलवज्रभाञ्जि
विचित्रधातूनि सकाननानि ।
स्त्रीभिर्युतान्यप्सरसामिवौघै-
र्मेरोः शिरांसीव गृहाणि यस्याम् ॥

अन्तर्निविष्टोज्ज्वलरत्नभासो
गवाक्षजालैरभिनिष्पतन्त्यः ।
हिमाद्रिकूटादिव भान्ति यस्यां
गङ्गाम्बुपातप्रतिमा गृहेभ्यः ॥

धर्म्यासु कामार्थयशस्करीषु
मतासु लोकेऽधिगतासु काले ।
विद्यासु विद्वानिव सोऽभिरेमे
पत्नीषु [illegible] तिसृषूत्तमासु ॥

कौशल्ययासावि सुतेन रामः
प्राक् कैकयीतो भरतस्ततोऽभूत् ।
प्रापोष्ट शत्रुघ्नमुदारचेष्ट-
मेका सुमित्रा सह लक्ष्मणेन ॥

वेदोऽङ्गवानखिलोऽध्यगायि
शस्त्रास्त्रपाठं सह त्रिवर्गाणि ।
ते शिक्षितान्यपि मानसानि
सर्वं कलानां कुशलोऽभवत्सः ॥

ततोऽभ्यगाद्गाधिसुतः क्षितीन्द्रं
रक्षोभिरुद्धाहृतकर्म्मशर्मा ।
रामं वरीतुं परिरक्षणार्थं
राज्ञार्चितस्तं मधुपर्कपाणिः ॥

एषीः पुनर्जन्मजयाय यत्त्वं
रूपादिबोधान्तरहस्य यत्तं ।
तत्त्वान्यबुद्धाः प्रतनूनि येन
ध्यानं स्वपञ्चिक्षुवमित्यवादीत् ॥

आरभ्यमुनिस्तस्य शिवं समाधे-
र्विघ्नन्ति रक्षांसि वने क्रतुं स्म ।
तानि द्विषद्भीर्व्यनिराकरिष्णु-
स्तूर्णं तु रामः सह लक्ष्मणेन ॥

स शुश्रुवांस्तद्वचनं मुमोह
राजा महिष्याः सुतविप्रयोगम् ।
अङ्कं युनाथ क्षितिपः शुभंयु
रूचे वचस्तापरकुम्भकेण ॥

यथा त्वमाप्स्याः शरणं भयेषु
वनं त्वयाप्याश्रुहि धर्म्महेतोः ।
चातं द्विजत्वस्य परस्परार्थं
शक्त्या तथा मा प्रहिणु स्वसूनुम् ॥

वाणिज्यते तेन महान् विपक्षः
स्थापिष्यते येन रणे पुरस्तात् ।
मा मां महात्मन् परिभूरयोग्यं
न मद्विधो न्यस्यति भारमग्र्यम् ॥

क्रुध्यन् कुलं धक्ष्यति विप्रवह्नि-
र्दीप्यन् सुतश्चाप्यति मां समन्युम् ।
इत्थं नृपः पूर्ब्बमवालुलोचे
ततोऽनुजज्ञे गमनं सुतस्य ॥

आशीर्भिरभ्यर्च्य ततः क्षितीन्द्रं
प्रीतः प्रतस्थे मुनिराश्रमाय ।
तं पृष्ठतः प्रेष्ठविधाय नम्रो
क्लिष्टेषु हीनाम्बरधरः कुमारः ॥

अस्त्रास्यतः पुष्यबलाय जिष्णो
रामस्य रोचिष्णुमुखस्य धृष्णुः ।
द्वैमातुरः कृत्स्नजितास्त्रशस्त्रः
सध्र्यङ् रतः श्रेयसि लक्ष्मणोऽभूत् ॥

उपगति रघुसिंहे दन्दशूकान् जिघांसौ
धनुरर्तिभिरसह्यं मुष्टिपीडं दधाने ।
व्रजति पुरतरुण्यो बद्धचित्ताङ्गुलित्रे
कथमपि गुरुशोकान्मारुदन् माङ्गलिन्यः ॥

अथ जगदुरनीचैराशिषस्तस्य विप्रा-
स्तुमुलकलनिनादं तूर्यमाजघ्नुरन्ये ।
अभिमतफलशंसी चारु पुस्फोर बाहु-
स्तरुषु चुकुवुरुच्चैः पक्षिणश्चानुकूलाः ॥

द्वितीयः सर्गः ।

वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशाञ्च ।
निर्याय तस्याः स पुरः समन्तात्
श्रियं दधानां शरदं ददर्श ॥

तरङ्गसङ्गाच्चपलैः पलाशै-
र्ज्वालाश्रियं सातिशयां दधन्ति ।

सधूमदीप्ताग्निरुचीनि रेजु-

स्ताम्रोत्पलान्याकुलषट्पदानि ॥

त्रिभागतैस्तीरवनैः समृद्धिं

निजां विलोक्यापहृतां पयोभिः ।

कूलानि सामर्षतयेव तेनुः

सरोजलक्ष्मीं स्थलपद्महासैः ॥

निशातुषारैर्नयनाम्बुकल्पैः

पत्रान्तपर्यागलदच्छबिन्दुः ।

उपारुरोदेव नदत्पतङ्गः

कुमुद्वतीं तीरतरुर्दिनादौ ॥

वनानि तोयानि च नेत्रकल्पैः

पुष्पैः सरोजैश्च निलीनभृङ्गैः ।

परस्परां विस्मयवन्ति लक्ष्मी-

मालोकयाञ्चक्रुरिवादरेण ॥

दत्तावधानं मधुलेहिगीतौ

प्रशान्तचेष्टं हरिणं जिघांसुः ।

आकर्णयन्नुत्सुकहंसनादान्

लक्ष्ये समाधिं न दधे मृगावित् ॥

गिरेर्नितम्बे मरुता विभिन्नं

तोयावशेषेण हिमाभमभ्रम् ।

सरित्सु साध्वम्बु समादधानं

शैलाधिपस्याभ्युदयाय लक्ष्मीम् ।

[illegible] हरिः साम्भसि शैलकुञ्जे

[illegible]नीनाम्बुनान्निगम्य ।

क्रमं बबन्ध क्रमितुं सकोप-

प्रतर्कयन्नुल्लसमिन्दुनादान् ॥

[illegible] नवोत्पलानि

[illegible] चाघ्रोपित षट्पदानाम् ।

[illegible]भाति तान् [illegible]

[illegible]विन्दन्यतिपङ्क्तां [illegible] ॥

[illegible] कुमुदान्यपङ्कात्

[illegible]न्दमपास्य गच्छ ।

[illegible]कालिलोदवेः

[illegible] ईयत् [illegible] आशा ॥

[illegible]जितान्यहरात्

[illegible] प्रभाते सलिलान्यपश्यत् ॥

[illegible]भिरिव द्रुतानि

तेजांसि भानोर्भुवि सम्भृतानि ॥

[illegible]चनलोभनीया

[illegible]: लेहोकेव स्ववर्णाः ।

अध्यायताः शस्यविशेषपङ्क्ती-
स्तुतोऽपि पश्यन् विलसान्तरालाः ॥

[illegible]ोगदुःखानुभवानभिज्ञैः
काले नृपांशं विहितं ददद्भिः ।
[illegible]हार्य्यशोभारहितैरकार्त्रैः-
[illegible]श्चित् पुम्भिः प्रचितान् स गोष्ठान् ॥

[illegible] चेष्टितमप्रगल्भं
[illegible]ण्यपि वीक्षितानि ।
ऋजूंश्च विश्वासकृतः स्वभावान्
गोपाङ्गनानां मुमुदे विलोक्य ॥

निर्विवलकुञ्चैः अवसानभागात्
कुकूलं [illegible] ननान तस्य ।
मेदस्विगोपान्तवनोपशोभं
कदम्बकं वातमजं मृगाणाम् ॥

सितारविन्दप्रचयेषु लीनाः
संसक्तफेनेषु च सैकतेषु ।
कुन्दावदाताः कलहंसमालाः
प्रतीयिरे श्रोत्रसुखैर्निनादैः ॥

न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम् ।

न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः ॥

[illegible] यातजृम्भाः सह मित्रमृत्यै-
[illegible] आम्रदकुम्भहस्ताः ।
[illegible]वगाः पुष्पफलेन वाके।
मानञ्जुरर्घ्यां जगद्वन्दनीयम् ॥

विद्याकर्षं विजयां जयाञ्च
[illegible] निपुणमविज्ञताब्जा ।
अध्यापिपद्माधिकृतौ कथायन्
निशान्तविघ्नन शौर्य शातयन्तः ,

[illegible]योध्यं प्रायुक्तमकुजान
[illegible]ोघकर्णञ्जमहालयाय ।
ददौ वधाय क्षणदाचराणां
तयौ मुनिः चैत्रश्च जागरूकः ॥

तं विप्रद्वौ सतयालयाला
या [illegible] वने बालिवरौ ढुढौके ।
जन्मानुबद्धं धृतभानुराग-
हा ताडकाख्यां निजघान रामः

अथानलोके कृतधूमकेतु-
शिखाञ्जनस्निग्धमसक्तभावम् ।

तपोवनं प्राप्य जनाभिभूत-
समृद्धरक्षारुपतन्निमिग्नम् ॥
मदान्धजन्तुर्विरुतान् मृगेन्द्रा
छिन्नाध्वगान् पक्षिगणैः सकम्पान् ।
संनम्यमानाः फलदित्सयेव
चकाशिरे तत्र लता विलोलाः
अपप्लुतान् विटपाद्यमालैर्-
[illegible]निष्कलिता वनवासिसङ्घा ।
प्रत्यग्रहीतां मधुपर्कमिश्रं
तावासनादि क्षितिपात्मजौ ॥
इत्थाभिभूतस्य खवासवोढ-
सत्त्वस्य दोर्भिर्भुवनस्य भारम् ।
हर्षोऽपि सम्पूर्णय रक्षतं तौ
तपोधनैरित्थमभाषिषाताम् ॥
तान् प्रत्यवादीदथ राघवोऽपि
यथेप्सितं प्रस्तुत कर्म धर्म्यम् ।
तपोसमृद्धिर्भजतां प्रताग्निः
संधुक्ष्यतां नोऽरिसमिन्धनेषु ॥
प्रतुष्टुवुः कर्म ततः प्रक्रमे-
ते यज्ञियैर्द्रव्यगणैर्यथावत् ।

[illegible]लिप्सयदिदं जनमार्गवर्ती-
स्तदा यातुधानैस्त्रिदिवे प्रसर्पन् ॥
[illegible]पिङ्गकेशोर्ध्वशिरस्कबालैः
[illegible]करालजङ्घैर्विकटदंष्ट्रैः ।
ततः स्वदाढैः पृथुपिङ्गलाक्षैः
सर्वं [illegible]रूपैर्बहुभिर्व चान्यैः ॥
[illegible]धिकवाण[illegible] छिन्ननासाकृति
क[illegible]भुजाग्रैर्विस्तृतदंष्ट्रिणोऽन्यः ।
तान् [illegible]द्भाग्यः कल्पितकालदण्डः
जघान शत्रुं परमन्दकार्यं ॥
[illegible]यदिदं विरम रमस्तं
[illegible] मायाचनकाक्ष पृष्ठः ।
त्यक्त्वा रणे स्वैरमृतो जगाद
[illegible]ारीभसदृत्र्वं नमं कथार्यन् ।
[illegible]क्षयानिस्वं पिशितैर्नराणां
[illegible]ग्नीन् हंसि वनस्थलीनाम् ।
[illegible]ीर्थक्षितकाल विभवा न येषां
वर्जन्ति तेषां हवषे न कस्मात् ॥
अद्यो द्विजान् देवयजीन् निहंसः
कुर्मः पुरं प्रेतनराधिवासम् ।

धर्म्मो ह्ययं दाशरथे निजो नो
नैवाध्यकारि स्म हि वेदहन्ते ॥
धर्म्मोऽस्ति सत्यं तव राक्षसाय-
मन्यो व्यतिस्ते तु ममापि धर्म्मः ।
ब्रह्मद्विषस्ते प्रणिहन्मि येन
राजन्यवर्गैर्धृतकार्म्मुकेषु ॥
इत्थं प्रवादं युधि सम्प्रहारं
प्रचक्रतू रामनिशाविहारौ ।
तृणाय मत्वा रघुनन्दनोऽथ
वाणेन रक्षः प्रधनान्निरास्यत् ।
जगुः प्रसादं द्विजमानसानि
दौर्व्विदिका पुष्पचयं बभूव ।
निर्व्याजभक्त्या वदते वचश्च
भूयो बभाषे मुनिना कुमारः ।
महीयमाना भवतातिमात्रं
सुराध्वरे वत्सरजित्वरेण ।
दिवोऽपि वज्रायुधभूषणाया
ह्रीणीयते वीरवती न भूमिः ॥
बलिर्बबन्धे जलधिर्ममन्थे
जह्रेऽमृतं दैत्यकुलं विजिग्ये ।

कल्पान्तदुःस्था वसुधा तथोर्व्वी
येनैष भारोऽतिगुरुर्न तस्य ॥

इति ब्रुवाणो मधुरं हितञ्च
तमाङ्ग्रहर्म्याग्निलस्कम्भमिन् ।

रामं रतिः प्रीतमना समग्रां
समांसि राज्ञां निजिघृक्षयिष्यन्

इतः स मित्रावरुणौ किलेतौ
किमश्विनौ सोमरसं पिपासू ।

अर्थं समस्तं जनकात्समग्रं
रूपेण गार्गीजितनौ नृसिंहौ ।

अजीग्रहत्तं जनको धनुस्तत्
येनार्दिदत्त्रिपुरं पिनाकी ।

जिघांसमानो बलमस्य राज्ञो-
ऽसज्यमासीद्रघुनन्दनस्तत् ॥

ततो नदीभाजान् पथिकान् गिरिस्थान्
ज्ञायकान् भूमिपतेरयोध्याम् ।

दिशः सुतां योधवरैस्तुरङ्गै-
र्व्यसर्जयन्मैथिलमर्त्यमुख्यः ॥

क्षिप्रं ततोऽश्वन्यतुरङ्गयायी
यविष्टवद्वृद्धतमोऽपि राजा ।

आख्यायकेभ्यः श्रुतसूनुवृत्ति-
रक्लानयानो मिथिलामगच्छत् ॥
हन्तिष्ठमार्शीर्वसुधाधिपानां
तं प्रेष्ठमेतं गुरुवद्गरिष्ठम् ।
सहस्रहान्तं सुभ्रताधिवासं
वंशिष्ठकीर्त्तिर्यशसा वरिष्ठम् ॥
त्रिवर्गपारीणममी भवन्त-
मभ्यासयन्नागमनेकमिन्द्रः ।
विवेकदृश्वत्वमगात् सुराणां
तं मैथिलो वाक्यमिदं बभाषे ।
छिरन्तनी शाखलतेव जह्नुता
ब्रुता दिवः स्याद्गुरिवाधिरप्रभा ।
प्रभाङ्ककान्तेरधिदेवताकृतिः
सुता ददे तस्य सुताय मैथिली ॥
लब्धां ततो विश्वजनीनवृत्ति-
स्तामात्मनीनामुदवोढ रामः ।
सद्रत्नमुक्ताफलभक्तिभूषां
संवंश्ययन्तीं रघुवंशलक्ष्मीम् ॥
सुप्रातमासादितमम्बुदं तत्
वन्दारुभिः संस्तुमनभ्ययोध्यम् ।

आख्येटकाजन्यकहारिकाव्य-
समात् सराजं बलसंव्रतीनम् ।
[illegible]रुढो [illegible]लसि बाणपाणिः
सुमत्तनागेन्द्र [illegible] पुरस्तात् ।
शौर्येण धनुष्मानुपजान्तरालि
[illegible]ति स्म रामं पथि जामदग्न्यः
[illegible]हैरसौ [illegible]वाकृतेर्
[illegible]नः सवाणं कुरु मानितामीः ।
[illegible]क्रमयुक्तः [illegible]युक्तमितं
[illegible] क्षितीन्द्रो नृनिनीषु[illegible]वं ।
[illegible]नेरुषो नि[illegible]तराजकस्य
[illegible]महारोपोतैर्दशकालोपैः ।
संजिघ्य संरम्भमसद्विपन्नं
कार्म्युकैकेऽखिलाव राम रामे ॥
[illegible]जीवनदूराभवदं न वाक्यं
[illegible] स दर्पेण तदा कुमारः ।
[illegible]नुष्यकार्षीद्रुकबाणगर्भं
लोकान्तलादीद्विजितांश्च तस्य ॥
जिते नृपारौ सुमनीभवन्ति
[illegible]दायमानानमुमैर[illegible]ङ्कम् ।

वृद्धस्य राज्ञोऽनुमते बलानि
अगाहिरेऽनेकमुखानि मार्गान् ॥
अथ पुरजवयोगान्निर्दयद्दूरसंस्थं
द्रवयदतिरयेण ग्रामभूर्व्वीविभागम् ।
भ्रमरहितमचेतन्नीरजीकान्तिकान्तां
सलमपहितशोभां तूर्णमासादयोध्याम् ॥

तृतीयः सर्गः ।

दर्पेन सर्वेन पिशिताशनानां
तत्रान्तकस्याभिभवेन चैव ।
आहारभूविष्णुर्यशसा कुमारः
प्रियम्भविष्णुर्न स यस्य नासीत् ॥
ततः स चेतीकृतपौरभृत्यो
राज्येऽभिषेक्ष्य सुतमित्यनीचैः ।
आघोषयन् भूमिपतिः समस्तं
भूयोऽपि लोकं सुमनीचकार ॥
आदित्यवद्दीप्तकृशानुकल्पं
सिंहासनं तस्य सपादपीठम् ।
सन्तप्तचामीकरवल्गुवज्र
विभागविन्यस्तमनर्घरत्नम् ॥

प्रास्थापयत् पूगकृतान् स्वपौरं
कृशान् दयलाहृदगानवन्धान् ।
सभक्तिकुम्भान् पुरुषान् वसन्तात्
पत्न्यापिपार्थीर्थजलार्थकाश्च ॥

कृत्वाप्यचक्रनगरस्य मार्गान्
आज्ञाय शत्रुघ्नमकृत स्वधृतान् ।
विभक्त पुष्पैस्तवकैर्विचित्रै-
रसैद् राज्ञा निपुणा नियुक्ताः ॥

कालान्तमत्वावासकपैयिवांसं
सौख्यादपश्यत् भवनं तदानीम् ।
तत् कैकयी सा हृदयमक्रमाना
अवाप तापं स्वनप्रयाणम् ॥

क्रौञ्चपराहिलस्यात्स्वलोपः
स्त्रैणेन लीला विकृतिं नपिक्ता ।
रामप्रवासे व्यकृणत्त दोषं
जनापवादं सनरेन्द्रमृत्युम् ॥

वसूनि देशांश्च निवर्त्तयिष्यन्
रामं नृपः संगिरमाण एव ।
तथावजह्रे भरताभिषेको
विषादशङ्कश्च मतो निवर्त्ते ॥

ततः प्रविव्राजयिषुः कुमार-
मादिक्षदस्याभिगमं वनाय ।
सौमित्रिसीतानुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन् ॥

केचिद्विनिन्दुर्नृपमप्रशान्तं
विचुक्रुशुः केचन सान्त्वमुच्चैः ।
ऊचुस्तथान्ये भरतस्य मायां
धिक् केकयीमित्यपरो जगाद ॥

गतो वनं स्वो भवितेति रामः
शोकेन देहे जनतातिमात्रम् ।
धीरास्तु तत्र च्युतमन्यवोऽन्ये
दध्युः कुमारानुगते मनांसि ॥

प्रस्थास्यमानावुपसेदुषस्तौ
शोशुच्यमानानिदमूचतुस्तान् ।
किं शोचतेहाभ्युदये वनास्थान्
नियोगलाभेन पितुः कृतार्थान् ।

असृष्ट यो यस्य भयेष्वरक्षीत्
यः सर्वदास्मानपुषत् स्वपोषम् ।
महोपकारस्य किमस्ति तस्य
तुल्येन दानेन वनस्य मोक्षः ॥

विद्युत्प्रणामं स वरं प्रनष्टो
वड्डोर्ध्वशोषं त्वणवद्विशुष्कः ।
यद्यै दुरापे किमत प्रवासे
[illegible] शामनेऽवाकिथत यो [illegible]णाम् ।
[illegible] निवर्त्स्यंकिति न्यगादीन्
[illegible] शोकापनुदा भवेत ।
मा दर्शनान्यं भरतस्तु मन्तो
निवर्त्तयेत्याह [illegible] सूतम् ॥
[illegible]वेङ्गितैर्गत्वरतां जना[illegible]-
[illegible] शयित्वा रजनीं सपौरः ।
[illegible] वनं वाससृताड्डयात्तान्
प्रातस्थ्लतेनापजगाम [illegible] ॥
[illegible] कलणं रूवन्तो
मज्जन्तुङ्गन्दिश्वसितः कवोष्णम् ।
हा राम हा कष्टमिति ब्रुवन्तः
पराङ्मुखैरो न्यहनन्मनोभिः ॥
सूतोऽपि गङ्गासलिलैः पवित्वा
महा[illegible]मनल्पमन्युः ।
सशीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश ॥

ऽनीयुषा पृष्ठहृतो जनेन
द्यौर्भानुशीतांशुनिराकृतेव ।
राजन्यनक्षत्रसमन्वितापि
शोकान्धकारक्षतसर्व्वचेष्टा ॥

त्रिलोक्य रामेण विना सुमन्त्र-
मच्योष्ट सत्त्वान्नृपतिर्हताशः ।
मधूनि नैषीद्व्यलिपन्न गन्धै-
र्मनोरमे न व्यवसिष्ट वस्त्रैः ॥

आसिष्ट नैकत्र शुचा व्यरंसीत्
कृताकृतेभ्यः क्षितिपालभाग्भ्यः ।
स चन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद्द्युनिवासभूयम् ॥

विचक्रशुर्भूमिपतेर्महिष्यः
केशान् लुलुञ्चुः स्ववपूंषि जघ्नुः ।
विभूषणान्युन्मुमुचुः क्षमायां
पेतुर्बभञ्जुर्वलयानि चैव ॥

ताः सान्त्वयन्ती भरतप्रतीक्षा
तं बन्धुता न्यक्षिपदाशु तैले ।
दूतांश्च राजात्मजमानिनीषून्
प्रास्थापयन्मन्त्रिमतेन यूनः ॥

सृमो नभस्तः पतितं निरीक्ष्या-
ऽर्कं विवस्वन्तमधःस्फुरन्तम् ।
आख्यद्वसन् मातृकुले सचिन्तः
पश्यन् प्रमादं भरतोऽपि राज्ञः ॥

अथाश्ववन्नात्ययिकं समेत्य
दूता यदार्थं प्रवियासयन्तः ।
आदिष्ट आप्ताभिहितस्तदासा-
वुत्कण्ठमानो भरतो गुरूणाम् ॥

तम्यूनथाङ्क्ष्ट समाकुलत्वा-
दाशेद्रुपः [illegible]पायम् ।
गोमायुसारङ्गगणांश्च सव्यक्
मायान्विपूर्भीमनराशिपूंश्च ॥

स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्
शुश्राव घोषं न जनौघजन्यम् ।
आकर्णयामास न वेदनादान्
न चोपलेभे वणिजां पणायाः ॥

चक्रन्दुरुच्चैर्नृपतिं समेत्य
तं मातरोऽभ्यर्णमुपागतास्ताः ।
पुरोहितामात्यमुखाश्च योधाः
विष्टब्धमन्युप्रतिपूर्णमन्याः ॥

ऽिहृत्यमाणः परितः समीतं
रामं यदा नैच्छत लक्ष्मणञ्च ।
संरुध्यमानः स तदाऽभ्यषिञ्चत्
यथावदात्मप्रभवं समस्तम् ॥

आवद्धभीमभ्रुकुटीविभङ्गः
गेऽर्चीयमानारुणरौद्रनेत्रः ।
उन्नैकपालञ्च स कैकयीञ्च
गोके सुदुःखाविरतं व्यमार्ज्जीत्

नृपात्मजौ चिक्षिपतुः समीतौ
ममार राजा विधवा भवत्यः ।
शोच्या वयं भूपनृपा बभूवं
कैकय्यपत्यं तव कल्मषं सत् ॥

नैतत् मतं मत्कमिति ब्रुवाणः
महत्सुशोऽसौ शपथानशप्यत् ।
उद्दाह्यमानः पितरं सरामं
कुर्वन् सशोको भुवि रोदमानम्

तं मन्त्रयन्तः सचिवा नरेन्द्रं
विधान्वयन्तः समदुःखराशेः ।
अन्त्याहुतिं हावयितुं सविप्रा-
स्त्रिवोधयन्तोऽङ्कपालजातम् ॥

संप्राप्य तीरं तमसापगाया
गङ्गाम्बुसम्पर्कविशुद्धिभाजः ।
विगाहितुं यामुनकच्छ पुण्यं
ययुर्निरुद्धश्रमवृत्तयस्ते ॥

ते भरद्वाजमुनेर्निकेतं
तस्मिन् विशश्राम समेत्य रामः ।
श्वेताश्वनाद्यः फलवृद्धिभूत्या
व्यस्यन्नुदन्यां शिशिरैः पयोभिः

[illegible]सान् स्थण्डिलशायिनस्तु
अस्त्रागमाननिशं समभ्यन् ।
अध्यापयन्तं विनयात् प्रणेमुः
पञ्चा भरद्वाजमुनिं सशिष्यम् ॥

तस्मात्प्रयानं प्रयनस्तु नाना
कल्यावकाशे रुचिसंप्रक्लृप्तम् ।
तान् प्रीतिमानाह मुनिस्ततः स्म
निबद्धमाङ्गन् पिबतास्त सौख्यम् ॥

ते भुक्तवन्तः सुसुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते ।
द्रुतं समश्वा रथवाजिमार्गै-
र्मन्दाकिनीं रम्यवनां समीयुः ॥

उदक्षिपन् पट्टदुकूलकेतून्
अवादयन् वेणुमृदङ्गकांस्यम् ।
कम्बूंश्च नारानधमन् समन्तात्
न्यानयन् कुङ्कुमचन्दनानि ॥

श्रीलाक्षिनामावदनं सकृत्स
कृत्वाजिने प्राक्शिरसं निधाय ।
अश्रित्य पालाशि यथाविधानं
ऋत्विग् जुहाव ज्वलितं चिताग्निम् ॥

कृतेषु पिण्डोदकसञ्चयेषु
कृत्वाभिषेकं प्रकृतं प्रजाभिः ।
प्रत्यानिनीषु विनयेन रामं
प्रायादरण्यं भरतः सपौरः ॥

शीघ्रायमाणैः ककुभोऽवानै-
र्जनैरपन्थानमुपेत्य रूक्षैः ।
शोकाद्भुवैरधि मस्तकासा-
श्चकार नागेन्द्ररथाश्वमिश्रैः ॥

उच्छिक्यिरे पुष्पफलं वनानि
सस्नुः पितृन् पिप्रियुरापगासु ।
आरेभुरित्वा पुलिनान्यशङ्कं
छायां समाश्रित्य विशश्रमश्च ॥

वैखानसेभ्यः श्रुतरामवार्त्ता-
स्ततो विविक्षञ्जानपतन्निसङ्गम् ।
अभ्रंलिहाग्रं रविमार्गभङ्ग-
मानंहिरेऽद्रिं प्रति चित्रकूटम् ॥

उद्गीर्णवाणान् ककुभो बलौघान्
वितत्य शार्ङ्गं कवचं पिनह्य ।
तस्थौ शिरस्त्रामयिषुः शितेषुः
सौमित्रिरभ्युत्क्षिहानः ॥

शक्रोत्तरासङ्गभृतो विवस्वान्
पादैः शनैरापततः समन्यून् ।
सौहित्य तान् वीतविकङ्कवक्षीन्
विवन्दिषून् दाशरथिः स्ववर्ग्यान् ॥

स कल्कापं चक्रुरुदन्तो
रामान्तिकं रंहितमश्ववेगः ।
आवेदयन्तः क्षितिपालसन्नैः-
कारं मृतं रामवियोगशोकात् ॥

चिरं रुदित्वा करुणं सशब्दं
गोत्राभिधायं सरितं समेत्य ।
मध्येजलाद्राघवलक्ष्मणाभ्यां
प्रत्तं जलं स्वञ्जलमन्तिकेऽपाम् ॥

अरण्ययाने सुकरे पिता मां
प्रायुङ्क्त राज्ये बत दुष्करे त्वाम् ।
मागाः शुचं वीर भरं वहामु-
माभाषि रामेण वचः कनीयान् ॥

कर्त्ता कृती दृष्टमतेषु धीमान्
त्वं पैतृकं चेद्वचनं न कुर्य्याः ।
विच्छिद्यमानेऽपि कुले परस्य
पुंसः कथं स्यादिह पुत्रकाम्या ॥

अस्माकमुक्तं बहु मन्यसे चेत्
यदीशिषे त्वं न मयि स्थिते च ।
निवृत्यतिष्ठन् यदि तातवाक्ये
जहीहि शङ्कां व्रज शाधि पृथ्वीम् ॥

वृद्धैरमां राज्यधुरां प्रवोढुं
कथं कनीयानहमुत्सहेयम् ।
मा मां प्रयुङ्क्था: कुलकीर्त्तिलोपे
प्राह स्म रामं भरतोऽपि धर्म्यम् ॥

ऊर्ज्जस्वलं हस्तितुरङ्गमेत-
द्रमूनि रत्नानि च राजभाञ्जि ।
राजन्यकं चैतदहं क्षितीन्द्र-
त्वयि स्थिते स्यामिति शास्मेतत् ॥

इति निगदितवन्तं राघवस्तं जगाद
व्रज भरत गृहीत्वा पादुके त्वं मदीये ।
च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयास्मत्कृतेन ॥

ऋतुसंहारम्

ग्रीष्मवर्णना ।

मृगाः प्रचण्डातपतापिता भृशं
तृषा महत्या परिशुष्कतालवः ।
वनान्तरे तोयमिति प्रधाविताः
निरीक्ष्य भिन्नाञ्जनसन्निभं नभः ॥

रवेर्मयूखैरभितापितो भृशं
विदह्यमानः पथि तप्तपांशुभिः ।
अवाङ्मुखो जिह्मगतिः श्वसन् मुहु
फणी मयूरस्य तले निषीदति ॥

तृषा महत्या हतविक्रमोद्यमः
श्वसन् मुहुर्भूरिविदारिताननः ।
न हन्त्यदूरेऽपि गजान् मृगाधिपो
विलोलजिह्वश्चलिताग्रकेसरः ॥

विशुष्ककण्ठोद्गतसीकराम्भसो
गभस्तिभिर्भानुमतोऽभितापिताः ।
प्रवृद्धतृष्णोपहता जलार्थिनो
न दन्तिनः केसरिणोऽपि बिभ्यति

हुताग्निकल्पैः सवितुर्मरीचिभिः
कलापिनः क्लान्तशरीरचेतसः ।
न भोगिनं घ्नन्ति समीपवर्त्तिनं
कलापचक्रेषु निवेशिताननम् ॥

सभद्रमुस्तं परिपाण्डुकर्द्दमं
सरः खनन्नायतपोत्रमण्डलैः ।
प्रदीप्तभासा रविणाभितापितो
वराहयूथो विशतीव भूतलम् ॥

विवस्वता तीक्ष्णतरांशुमालिना
सपङ्कतोयात् सरसोऽभितापितः ।
उत्प्लुत्य भेकस्तृषितस्य भोगिनः
फणातपत्रस्य तले निषीदति ॥

समुद्धृताशेषमृणालजालकं
विपन्नमीनं द्रुतभीतसारसम् ।
परस्परोत्पीडनसंहतैर्गजैः
कृतं सरः सान्द्रविमर्द्दकर्द्दमम् ॥

रविप्रभोद्भिन्नशिरोमणिप्रभो
विलोलजिह्वाद्वयलीढमारुतः ।
विषाग्निसूर्य्यातपतापितः फणी
न हन्ति मण्डूककुलं तृषाकुलः ॥

सफेनलालावृतवक्त्रसंपुटं
विनिर्गतालोहितजिह्वमुन्मुखम् ।
तृषाकुलं निःसृतमद्रिगह्वरात्
गवेषमाणं महिषीकुलं जलम् ॥

पटुतरवनदाहात् त्रस्तसस्यप्ररोहाः
परुषपवनवेगात् क्षिप्तसंशुष्कपर्णाः ।
दिनकरपरितापात् क्षीणतोयाः समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ॥

श्वसिति विहगवर्गः शीर्णपर्णद्रुमस्थः
कपिकुलमुपयाति क्लान्तमद्रेर्निकुञ्जम् ।
भ्रमति गवययूथः सर्वतस्तोयमिच्छन्
शरभकुलमजिह्मं प्रोद्धरत्यम्बु कूपात् ॥

विकचनवकुसुम्भस्वच्छसिन्दूरभासा
प्रबलपवनवेगोद्भूतवेगेन तूर्णम् ।
तटविटपलताग्रालिङ्गनव्याकुलेन
दिशि दिशि परिदग्धा भूमयः पावकेन ॥

ध्वनति पवनविद्धः पर्वतानां दरीषु
स्फुटति पटुनिनादः शुष्कवंशस्थलीषु ।
प्रसरति तृणमध्ये लब्धवृद्धिः क्षणेन
ग्लपयति मृगयूथं प्रान्तलग्नो दवाग्निः

बहुतर इव जातः शाल्मलीनां वनेषु
स्फुटति कनकगौरः कोटरेषु द्रुमाणाम् ।
परिणतदलशाखादुत्पतत्यांशु वृक्षात्
भ्रमति पवनधूतः सर्वतोऽग्निर्वनान्ते ॥

गजगवयमृगेन्द्रा वह्निसन्तप्तदेहाः
सुहृद इव समेता द्वन्द्वभावं विहाय ।
हुतवहपरिखेदादाशु निर्गत्य कक्षात्
विपुलपुलिनदेशां निम्नगां संश्रयन्ते ।

वर्षावर्णना ।

तृषाकुलैश्चातकपक्षिणां कुलैः
प्रयाचितास्तोयभरावलम्बिनः ।
प्रयान्ति मन्दं नववारिवर्षिणो
बलाहकाः श्रोत्रमनोहरस्वनाः ॥

बलाहकाश्चाशनिशब्दभूषणाः
सुरेन्द्रचापं दधतस्तडिद्गुणम् ।
सुतीक्ष्णधारापतनोग्रसायका-
स्तुदन्ति चेतो ध्वनिभिः प्रवासिनाम् ।

प्रभिन्नवैदूर्य्यनिभैस्तृणाङ्कुरैः
समाचिता प्रोत्थितकन्दलीदलैः ।

विभाति शुक्लेतररत्नभूषिता
वराङ्गनेव क्षितिरिन्द्रगोपकैः ॥
सदा मनोज्ञं स्वनदुत्सवोत्सुकं
विभाति विस्तीर्णकलापशोभितम् ।
ससंभ्रमालिङ्गनचुम्बनाकुलं
प्रवृत्तनृत्यं कुलमद्य बर्हिणाम् ॥
तृणोत्करैरुद्गतकोमलाङ्कुरै-
श्चितानि नीलैर्हरिणीमुखक्षतैः ।
वनानि रम्याणि हरन्ति मानसं
विभूषितान्युद्गतपल्लवैर्द्रुमैः ॥
विलोलनेत्रोत्पलशोभिताननै-
र्मृगैः समन्तादुपजातसाध्वसैः ।
समाचिता सैकतिनी वनस्थली
समुत्सुकत्वं प्रकरोति चेतसः ॥
विपाण्डरं कीटरजस्तृणान्वितं
भुजङ्गवद्वक्रगति प्रसर्पितम् ।
ससाध्वसैर्भेककुलैर्विलोकितं
प्रयाति निम्नाभिमुखं नवोदकम् ॥
[illegible]पत्रां न[illegible] समुत्सुकाः
विहाय [illegible] श्रुतिहारिनिःस्वनाः ।

मन्दानिलाकुलितचारुतराग्रशाखः
पुष्पोद्गमप्रचयकोमलपल्लवाग्रः ।
मत्तद्विरेफपरिपीतमधुप्रसेकः
चित्तं विदारयति कस्य न कोविदारः ॥

तारागणप्रवरभूषणमुद्वहन्ती
मेघोपरोधपरिमुक्तशशाङ्कवक्त्रा
ज्योत्स्नादुकूलममलं रजनी दधाना
वृद्धिं प्रयात्यनुदिनं प्रमदेव बाला ॥

कारण्डवाननविघट्टितवीचिमालाः
कादम्बसारसकुलाकुलतीरदेशाः ।
कुर्व्वन्ति हंसविरुतैः परितो जनस्य
प्रीतिं सरोरुहरजोऽरुणितास्तु नद्यः

आकम्पयन् फलभारानतशालिजालान्
आनर्त्तयन् कुरवकान् कुसुमावनम्रान् ।
प्रोत्फुल्लपङ्कजवनां नलिनीं विधुन्वन्
यूनां मनो मदयति प्रसभं नभस्वान् ॥

सोन्मादहंसमिथुनैरुपशोभितानि
स्वच्छप्रफुल्लकमलोत्पलभूषितानि ।

भिन्नांता-

धनुर्बलभिदो जलदोदरेषु
सौदामिनी स्फुरति नाद्य वियत्पताका।
धुन्वन्ति पक्षपवनैर्न नभो बलाकाः
पश्यन्ति नोन्नतमुखा गगनं मयूराः
शेफालिकाकुसुमगन्धमनोहराणि
[illegible]ण्डजगणप्रतिनादितानि।
पर्यन्तसंस्थितमृगीनयनोत्पलानि
प्रोत्कण्ठयन्त्युपवनानि मनांसि पुंसाम्
कह्लारपद्मकुमुदानि मुहुर्विधुन्वन्
तत्सङ्गमादधिकशीतलतामुपेत्य।
[illegible] करोति हृदयं पवनः प्रभाते
पत्रान्तलग्नतुहिनानि हरंस्तरूणाम्।
केशान् नितान्तघननीलविकुञ्चिताग्रान्
आपूरयन्ति वनिता नवमालतीभिः।
कर्णेषु च प्र[illegible]कुण्डलेषु
नीलोत्पलानि विविधानि निवेशयन्ते
स्फुटकुमुदचितानां राजहंसाश्रितानां
मरकतमणिभासा वारिणा भूषि[illegible]

क्रिया[illegible]